उदयनाचार्यास्तु–"शब्दोऽपि न बाधकमनुमानानतिरेकादिति वैशेषिकादयः, तथाहि–यद्यप्येते पदार्था मिथःसंसर्गवन्तो वाक्यत्वादिति व्यधिकरणम्, पदार्थत्वादिति चानैकान्तिकम्, पदैः स्मारितत्वादित्यपि तथा, यद्यपि चैतानि पदानि स्मारितार्थसंसर्गवन्ति तत्स्मारकत्वादित्यादौ साध्याभावः, नह्यत्र मत्वर्थः संयोगः समवायस्तादात्म्यं विशेषणविशेष्यभावो वा सम्भवति, ज्ञाप्यज्ञापकभावस्तु स्वातन्त्र्येणानुमानान्तर्भाववादिभिर्नेष्यते, न च लिङ्गतया ज्ञापकत्वं, यल्लिङ्गस्य विषयस्तदेव तस्य परस्पराश्रयणप्रसङ्गात्, तदुपलम्भे हि व्याप्तिसिद्धिस्तत्सिद्धौ च तदनुमानमिति, तथाप्याकाङ्क्षादिमद्भिः पदैः स्मारितत्वात् गामभ्याजेति पदार्थवदिति स्यात्, न च विशेषासिद्धिर्दोषः, संसर्गस्य संसृज्यमानविशेषादेव विशिष्टत्वात्, यद्वा एतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्त्वे सति तत्स्मारकत्वात् गामभ्याजेति पदवत्; न चैवमर्थासिद्धिः, ज्ञानावच्छेदकतयैव तत्सिद्धेः, तस्य च संसृज्यमानस्यैवावच्छेदकत्वान्न विशेषाप्रतिलम्भ इति; अत्रोच्यते—

अनैकान्तः परिच्छेदे सम्भवे च न निश्चयः ।
आकाङ्क्षा सत्तया हेतुर्योग्यासत्तिरबन्धना ॥ १ ॥

एते पदार्था मिथःसंसर्गवन्त इति संसृष्टा एवेति नियमो वा साध्यः, सम्भावितसंसर्गा इति वा, न प्रथमः–अनाप्तपदकदम्बस्मारितैरनैकान्तात्, आप्तोक्त्या विशेषणीयमिति चेत्? न–वाक्यार्थप्रतीतेः प्राक् तदसिद्धेः, नह्यविप्रलम्भकत्व-

मात्रमिहाप्तशब्देन विवक्षितम्, तदुक्तेरपि पदार्थसंसर्गव्यभिचारात्, अपि तु तदनुभवप्रामाण्यमपि, न चैतच्छक्यमसर्वज्ञेन सर्वदा सर्वविषये सत्यज्ञानवानयमिति निश्चेतुम्, भ्रान्तेः पुरुषधर्मत्वात्, यत्र क्वचिदाप्तत्वमनाप्तस्याप्यस्तीति न तेनोपयोगः, ततोऽस्मिन्नर्थेऽयमाप्त इति केनचिदुपायेन ग्राह्यम्, न चैतत् संसर्गविशेषमप्रतीत्य शक्यम्, बुद्धेरर्थभेदमन्तरेण निरूपयितुमशक्यत्वात्, पदार्थमात्रे चाभ्रान्तत्वसिद्धौ न किञ्चित्, अनाप्तसाधारण्यात्, एतेषां संसर्गेऽयमभ्रान्त इति शक्यमिति चेत्? न–एतेषां संसर्ग इत्यस्या एव बुद्धेरसिद्धेः, अननुभूतचरे स्मरणायोगात्, तदनुभवस्य लिङ्गाधीनतया तस्य च विशेषणासिद्धत्वेनानुपपत्तेरिति; नापि द्वितीयः–योग्यतामात्रसिद्धावपि संसर्गानिश्चयात्, वाक्यस्य च तदेकफलत्वात्, योग्यतामात्रस्य प्रागेव सिद्धेः, अन्यथा तदसिद्धावासन्नसाकाङ्क्षपदस्मारितत्वादित्येव हेतुः स्यात्, तथा चाग्निना सिञ्चेदित्यादिना स्मारितैरनैकान्तः, तथाविधानां सर्वथा संसर्गायोग्यत्वादिति। द्वितीयेऽपि प्रयोगे हेतुराकाङ्क्षादिमत्त्वे सतीति, तत्र केयमाकाङ्क्षा नाम?, न तावद्विशेष्यविशेषणभावः, तस्य संसर्गस्वभावतया साध्यत्वात्, नापि तद्योग्यता, योग्यतयैव गतार्थत्वात्, नाप्यविनाभावः, नीलं सरोजमित्यादौ तदभावेऽपि वाक्यार्थप्रत्ययात्; तत्रापि विशेषाक्षिप्तसामान्ययोरविनाभावोऽस्तीति चेत्? न–अहो विमलं जलं नद्याः कच्छे महिषश्चरतीत्यादौ वाक्यभेदानुपपत्तिप्रसङ्गात्, नापि प्रतिपत्तुर्जिज्ञासा, पटो भवतीत्यादौ शुक्लादिजिज्ञासायां रक्तः पटो भवतीत्यस्यैकदेशवत् सर्वदा वाक्यापर्यवसानप्रसङ्गात्, गुणक्रियाद्यशेषविशेषजिज्ञासायामपि पदस्मारितविशेषजिज्ञासा आकाङ्क्षा, पट इत्युक्ते किंरूपः कुत्र किं करोतीत्यादिरूपजिज्ञासा, तत्र भवतीत्युक्ते किं करोतीत्येषैव पदस्मारितविषया न तु किंरूप इत्यादिरपि, यदा तु रक्त इत्युच्यते तदा किंरूप इत्येषाऽपि स्मारितविषया स्यादिति न किञ्चिदनुपपन्नमिति चेत्? एवं तर्हि चक्षुषी निमील्य परिभावयतु भवान्–किमस्यां जातायामन्वयप्रत्ययोऽथ ज्ञातायामिति, तत्र प्रथमे नानया व्यभिचारव्यावर्तनाय हेतुर्विशेषणीयः, मनःसंयोगादिवत् सत्तामात्रेणोपयोगात्, आसत्तियोग्यतामात्रेण विशिष्टस्तु निश्चितोऽपि न गमकः, अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ व्यभिचारात्, द्वितीयस्तु स्यादपि, यद्यनुमानान्तरवत् तत्सद्भावेऽपि तज्ज्ञानवैधुर्यादन्वयप्रत्ययो न जायते, न त्वेतदस्ति, आसत्तियोग्यतामात्रप्रतिसन्धानादेव साकाङ्क्षस्य सर्वत्र वाक्यार्थप्रत्ययात्, निवृत्ताकाङ्क्षस्य

च तद्भावात्, कथमेष निश्चयः साकाङ्क्ष एव प्रत्येति न तु ज्ञाताकाङ्क्ष इति चेत्? तावन्मात्रेणोपपत्तावनुपलभ्यमानज्ञानकल्पनानुपपत्तेः, अन्यत्र तथा दर्शनाच्च, यदा हि दूराद्दृष्टसामान्यो जिज्ञासते–कोऽयमिति, प्रत्यासीदँश्च स्थाणुरयमिति प्रत्येति, तदाऽस्य ज्ञातुमहमिच्छामीत्यनुव्यवसायाभावेऽपि स्थाणुरयमित्यर्थप्रत्ययो भवति, तथेहाप्यविशेषात् विशेषोपस्थानकाले संसर्गावगतिरेव जायते, न तु जिज्ञासाऽवगतिरिति, न च विशेषोपस्थानात् प्रागेव जिज्ञासाऽवगतिः प्रकृतोपयोगिनी, तावन्मात्रस्यानाकाङ्क्षत्वात्, न चैवम्भूतोऽप्ययमैकान्तिको हेतुः, यदा हि अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामिति वक्तोच्चारयति, श्रोता च व्यासङ्गादिना निमित्तेन 'अयमेति पुत्रः' इत्यश्रुत्वैव राज्ञः पुरुषोऽपसार्यतामिति शृणोति तदाऽस्याकाङ्क्षादिमत्त्वे सति पदकदम्बत्वं, न च स्मारितार्थसंसर्गज्ञानपूर्वकत्वमिति, स्यादेतत्, यावत्समभिव्याहृतत्वेन विशेषिते हेतौ नायं दोषः, तथाविधस्य व्यभिचारोदाहरणासंस्पर्शात्, कुतस्तर्हि कतिपयपदश्राविणः संसर्गप्रत्ययः? अलिङ्ग एव लिङ्गत्वाध्यारोपात्, एतावानेवायं समभिव्याहार इति श्रोतुरभिमानः, न–तत्संदेहेऽपि श्रुतानुरूपसंसर्गावगमात्, भवति हि तत्र प्रत्ययो न जाने किमपरमनेनोक्तम्, एतावदेव श्रुतं–यद्राज्ञः पुरुषोऽपसार्यतामिति, भ्रान्तिरसाविति चेत्? न तावदसौ दुष्टेन्द्रियजा, परोक्षाकारत्वात्, न लिङ्गाभासजा, लिङ्गाभिमानाभावेऽपि जायमानत्वात्, एतादृक्पदकदम्बप्रतिसन्धानमेव तां जनयतीति चेत्? यद्येतदेवादुष्टं सद्भ्रान्तिं जनयत् केन वारणीयम्, व्याप्तिप्रतिसन्धानं विनाऽपि तस्य संसर्गप्रत्यये सामर्थ्यावधारणात्, चक्षुरादिप्रत्ययवत्; नास्त्येव तत्र संसर्गप्रत्ययोऽसंसर्गाग्रहमात्रेण तु तथा व्यवहार इति चेत्? तर्हि यावत्समभिव्याहारेणापि विशेषणेनाप्रतीकारः, तथाभूतस्यानाप्तवाक्यस्य संसर्गज्ञानपूर्वकत्वाभावात्; असंसर्गाग्रहपूर्वकत्वमात्रे साध्ये न व्यभिचार इति चेत्? एवं तर्हि संसर्गो न सिध्येत्; आप्तवाक्येषु सेत्स्यतीति चेत्? न–सर्वविषयाप्तत्वस्यासिद्धेः, यत्र क्वचिदाप्तत्वस्यानैकान्तिकत्वात्। प्रकृतविषये चाप्तत्वसिद्धौ संसर्गविशेषस्य प्रागेव सिद्ध्यभ्युपगमादित्युक्तम्, न च सर्वत्र जिज्ञासा निबन्धनम्, अजिज्ञासोरपि वाक्यार्थप्रत्ययात्, आकाङ्क्षापदार्थस्तर्हि कः? जिज्ञासां प्रति योग्यता, सा च स्मारिततदाक्षिप्तयोरविनाभावे सति श्रोतरि तदुत्पाद्यसंसर्गावगमप्रागभावः, न चैषोऽपि

ज्ञानमपेक्षते, प्रतियोगिनिरूपणाधीननिरूपणत्वात्, तदभावनिरूपणस्य च विषयनिरूप्यत्वात्" इति प्राहुः ॥ ७ ॥ ११९ ॥

निगमयति—

**तस्माद् यथोदितात् सम्यगागमाख्यात् प्रमाणतः ।**
**हिंसादिभ्योऽशुभादीनि, नियमोऽयं व्यवस्थितः ॥८॥१२०॥**

**तस्मादिति**-उक्तयुक्तेरित्यर्थः, **यथोदितात्** प्रमाणान्तरतया समर्थितात्, **सम्यगागमाख्यात्** आप्तोक्तशब्दसंज्ञकात्, **प्रमाणतः**, **हिंसादिभ्यः** हिंसाऽनृत-स्तेया-ऽब्रह्म-परिग्रहेभ्यः, अहिंसा-सत्या-ऽस्तेय-ब्रह्मा-ऽपरिग्रहेभ्यश्च, **अशुभादीनि** आदिपदाच्छुभादीनि, बहुवचनसामर्थ्याद् दुःखसुखादयो गृह्यन्ते, **अयं नियमः** अनन्तरमुपदर्शितो नियतहेतु-हेतुमद्भावः, **व्यवस्थितः** प्रतिष्ठितः ॥ ८ ॥ १२० ॥

एतदेव विशिष्योपदर्शयति—

**क्लिष्टाद्धिंसाद्यनुष्ठानात्, प्राप्तिः क्लिष्टस्य कर्मणः ।**
**यथाऽपथ्यभुजो व्याधेरक्लिष्टस्य विपर्ययात् ॥ ९ ॥ १२१ ॥**

**क्लिष्टादिति**-संक्लेशबहुलादित्यर्थः, **हिंसाद्यनुष्ठानात्** हिंसाद्याचरणात्, **क्लिष्टस्य कर्मणः** ज्ञानावरणीयादिप्रकृतिकस्य कर्मणः, **प्राप्तिः** आत्मना सह सम्बन्धः, भवतीति क्रियासम्बन्धः । उक्तमर्थं दृष्टान्तावष्टम्भेन समर्थयति—**यथेति**, **अपथ्यभुजः** तत्तद्व्याधिविवृद्धिनिमित्ताहारग्रहणलम्पटस्य रोगिणः, **व्याधेः** रोगस्य, प्राप्तिरित्यनुषज्यते, तथा, **विपर्ययात्** अक्लिष्टादहिंसाद्यनुष्ठानात्, **अक्लिष्टस्य कर्मणः** सातवेदनीयादिशुभप्रकृतिकस्य कर्मणः, प्राप्तिर्भवतीति सम्बन्धनीयम्, अत्र निदर्शनं व्याधिविवृद्ध्यनिमित्तपथ्यभोजिनो व्याध्यपगमात् सुखाप्तिर्यथेति ॥ ९ ॥ १२१ ॥

आगमप्रमाणतो नियमं व्यवस्थाप्य स्वभावतस्तं व्यवस्थापयति—

**स्वभाव एष जीवस्य, यत् तथापरिणामभाक् ।**
**बध्यते पुण्य-पापाभ्यां, माध्यस्थ्यात् तु विमुच्यते ॥ १० ॥ १२२ ॥**

**स्वभाव इति । जीवस्य** चेतनस्य, **एषः** अनन्तरमेवाभिधीयमानः **स्वभावः**, **यत्** यस्मात् स्वभावात्, **तथापरिणामभाक्**, हिंसादिपरिणामभाक्, बध्यते

**पुण्य-पापाभ्यां** हिंसास्तेयादिपरिणतः पापकर्मणा बध्यते, अहिंसाऽस्तेयादिपरिणतः पुण्यकर्मणा बध्यते, **माध्यस्थ्यात् तु** सामायिकपरिणामाद् वैराग्यादिति यावत्, पुनः **विमुच्यते** कर्मणा विमुक्तो भवति, स्वभावान्नियमश्च परेणाप्यभ्युपगन्तव्यः, कथमन्यथा दण्डादेरेव घटजनकत्वं न वेमादेः, यथा च पर्वते वह्निः कुत इति प्रश्नो ज्ञापकहेतुजिज्ञासया समुपजायते, तत्र धूमादित्युत्तरमुपतिष्ठते, तथा दण्डादेरेव घटादिजनकत्वं न वेमादेरिति कुत इति प्रश्नो ज्ञापकहेतुजिज्ञासया समुपजायते, स्वभावादिति तत्रोत्तरम्, तेन चोक्तजिज्ञासानिवृत्त्या न पुनरुक्तप्रश्नावतारः । व्याघातेन च शङ्काया अनुदयादेव कुतोऽयमस्यैव स्वभाव इति प्रश्नो न स्वभावे भवतीति ॥ १० ॥ १२२ ॥

सर्वेऽपि वादिनः स्वपक्षसाधनार्थं सर्वतः प्रबलत्वेन स्वभावाऽऽगमावन्तेऽङ्गीकुर्वन्त्येवेत्युपदर्शयति—

**सुदूरमपि गत्वेह, विहितासूपपत्तिषु ।**
**कः स्वभावा-ऽऽगमावन्ते, शरणं न प्रपद्यते ? ॥ ११ ॥ १२३ ॥**

**सुदूरमपी**ति । **इह** शास्त्रे, **सुदूरमपि गत्वा** वह्न्यनुमानादीनि प्रमाणान्याश्रित्यापि, **उपपत्तिषु** युक्तिषु सूक्ष्मबुद्ध्युपनीतेषु, **विहितासु** स्पष्टं परबुद्धिगम्यासु कृतासु, **कः** वादी, **अन्ते** परेण बाधकतर्कोपन्यासतः सूक्ष्मयुक्तीनां श्लथीकरणे, **स्वभावा-ऽऽगमौ** स्वभावपक्षमागमप्रमाणं च, **शरणं न प्रपद्यते ?** नेति काक्वा सर्व एव वादी स्वपक्षसाधनार्थं बलवत्त्वेन शरणं प्रपद्यते, गत्यन्तराभावादित्यर्थः । यथा बौद्धः-तत्तत्प्रतिनियतकार्ये तत्तत्कारणस्य तत्तत्कार्योत्पत्तिक्षणेऽसतोऽपि तथाभूतादकारणक्षणाद् वैलक्षण्यान्तराभावेऽपि स्वहेतोरेव क्षणस्थितिधर्मोजातः स एव तत्कुर्वद्रूपस्वभावोऽतस्तत्कारणं नान्ये इति तत्कार्यस्याप्यन्यानन्तरक्षणभावित्वाविशेषेऽपि तत्कार्यत्वमेव नान्यकार्यत्वमित्येवं स्वभावमेव स्वपक्षसाधनायाऽऽश्रयति । बौद्धविशेषोऽपि कश्चिदहेतुकस्य कार्यस्य स्वाभ्युपगतस्य स्वभावेनैव कादाचित्कत्वं समर्थयति, यदुक्तं—

"नित्यसत्त्वा भवन्त्येके, नित्यासत्त्वाश्च केचन ।
विचित्राः केचिदित्यत्र, तत्स्वभावो नियामकः ॥ १ ॥
वह्निरुष्णो जलं शीतं, समस्पर्शस्तथाऽनिलः ।
केनेदं रचितं तस्मात् स्वभावात् तद्व्यवस्थितिः ॥ २ ॥" [ ] इति ।

मीमांसकोऽपि "मा हिंस्यात् सर्वा भूतानि" इति जीवमात्रहिंसानिषेधकश्रुतेः सामान्यशास्त्रत्वमुररीकृत्य सामान्य शास्त्राद् विशेषशास्त्रं बलवत्, "सामान्यशास्त्रतो नूनं विशेषो बलवान् भवेद्" इति वचनात् "अग्नीषोमीयं पशुमालभेत" [ ] "वायव्यं श्वेतं छागमालभेत" [ ] इति श्रुतिबलाद् यागीयहिंसाऽधर्मजनकहिंसा न भवतीति यागीयहिंसाया अधर्मजनकत्वाभावे दर्शितवेदवाक्यमेव प्रमाणत्वेनाभ्युपगच्छतीति ॥ ११ ॥ १२३ ॥

परः पृच्छति—

**प्रतिपक्षस्वभावेन, प्रतिपक्षागमेन च ।**
**बाधितत्वात् कथं ह्येतौ, शरणं युक्तिवादिनाम्? ॥१२॥१२४॥**

**प्रतिपक्षस्वभावेने**ति-पूर्वोक्तस्वभावविपरीतस्वभावेनेत्यर्थः, अस्य **बाधितत्वादि**त्यनेनान्वयः, **प्रतिपक्षागमेन च** उक्तागमविपरीतागमेन च, **बाधितत्वात्** पूर्वोपदर्शितस्वभावस्य पूर्वोपदर्शितागमस्य च बाधितत्वात्, **हि** निश्चितम्, **एतौ** अनन्तरोपदर्शितस्वभावागमौ, **युक्तिवादिनां** वस्तुसाधनाय प्रधानतया युक्तिमेव पुरस्कुर्वताम्, न तु श्रद्धामात्रेण स्वभावागमौ शरणीकुर्वताम्, **कथं शरणं** कथमर्थसाधनप्रगल्भौ, न कथमपीत्याशयः ॥१२॥१२४॥

उत्तरयति—

**प्रतीत्या बाध्यते यो यत्, स्वभावो न स युज्यते ।**
**वस्तुनः कल्प्यमानोऽपि, वह्न्यादेः शीततादिवत् ॥१३॥१२५॥**

**प्रतीत्ये**ति-अनुभवेन प्रमाणेन चेत्यर्थः, **यः** स्वभावः, **यत्** यस्मात् कारणात्, **बाध्यते**, **स** बाधितः स्वभावः, **कल्प्यमानोऽपि** तत्स्वभावत्वेन कल्प्यमानोऽपि, असदुत्तरलक्षणजात्याऽऽपाद्यमानोऽपीति यावत्, **वह्न्यादेः शीततादिवत्** यथा वह्न्यादेर्जात्याऽऽपाद्यमानोऽपि शीततादिस्तत्स्वभावत्वेन, वह्न्यादिस्वभावो न युज्यते तथेत्यर्थः, जात्युत्तरं च प्रतिबन्द्येत्थमत्र प्रवर्तते—वह्न्यादेर्यद्युष्णतादिस्वभावः स्यात्, शीतत्वाद्यपि वह्न्यादेः स्वभावः स्यात्, वह्न्यादावुष्णत्वादिकमेवानुभूयते न शीतत्वादिकम्, वह्न्यादेरुष्णत्वादिकमेव प्रत्यक्षप्रमाणेन विषयीक्रियते न शीतत्वादिकमित्यनुभवबाधितत्वात् प्रत्यक्षप्रमाणबाधितत्वाच्च शीतत्वादिकं न वह्न्यादेः स्वभावो घटते, तथा हिंसादिर्यद्य-

धर्मजनकत्वादिस्वभावः स्याद्धर्मजनकत्वादिस्वभावोऽपि स्यादित्येवं जात्याऽऽपाद्यमानोऽपि हिंसादेर्धर्मजनकत्वस्वभावोऽनुभवेन प्रमाणेन च बाधितत्वान्न घटत इति न बाधकमित्याशयः॥ १३ ॥ १२५ ॥

अत्र पराभिप्रायं प्रतिक्षेप्तुं प्रश्नोत्तरभावेनोपदर्शयति—

**वह्नेः शीतत्वमस्त्येव, तत्कार्यं किं न दृश्यते? ।**
**दृश्यते हि हिमासन्ने, कथमित्थं स्वभावतः॥ १४ ॥ १२६ ॥**

**वह्नेः शीतत्वमस्त्येवेति**-मरुमरीचिकायां जलप्रतीतिलक्षणमृगतृष्णिकादिर्यथा स्वभावतः, यतो मरुमरीचिकायामिवान्यदेशस्थमरीचिकायां जलभ्रान्तिः कथं न भवतीति वक्तुं न शक्यते तथा वह्नेः शीतत्वं स्वाभाविकमेवास्तीत्यर्थः। इत्थं परेणाभिहिते तदभिप्रायावगमाय समाधाता पृच्छति-**तत्कार्यं किं न दृश्यते?** इति-स्वाभाविकशीतत्ववज्जलसङ्गेन रोमाञ्चाविर्भावादिकं यथा दृश्यते तथा स्वाभाविकशीतत्ववद्वह्निसम्बन्धेन शीतत्वकार्यं रोमाञ्चादिकं किं न दृश्यत इत्यर्थः। अत्र पर उत्तरयति-**दृश्यते हि हिमासन्न** इति-हि निश्चितम्, हिमसान्निध्यमुपगते वह्नौ शीतकार्यं रोमाञ्चादि दृश्यत इत्यर्थः। तत्राचार्यः पृच्छति-**कथमित्थमिति**-हिमसन्निधानकाल एव वह्निः शीतकार्यं करोति नान्यदेति कथमित्यर्थः। अत्र पर उत्तरयति-**स्वभावत** इति-यथा दण्डादेश्चक्रादिसहकारिकलापसमवहितस्यैव घटादिकार्यजनकत्वस्वभावस्तथा हिमसन्निधानप्राप्तस्यैव वह्नेः शीतकार्यरोमाञ्चादिजनकत्वस्वभाव इति नान्यदा रोमाञ्चादिकं करोतीत्यर्थः॥ १४ ॥ १२६ ॥

उक्तमेवार्थं दृष्टान्तावष्टम्भेन द्रढयति—

**हिमस्यापि स्वभावोऽयं, नियमाद् वह्निसंनिधौ ।**
**करोति दाहमित्येवं, वह्न्यादेः शीतता न किम्? ॥१५॥१२७॥**

**हिमस्यापि स्वभाव इति।** अयम् एवम्भूत एव, यत् **नियमात्** अवश्यम्भावतः, **वह्निसन्निधौ** वह्निसन्निधान एव, **दाहं करोति** यथाऽयस्कान्तमणिः सन्निधान एव लोहस्याकर्षणं करोति, नागदमन्यभिध औषधविशेषः सन्निधान एव नागदमनकार्यं करोति, **इति** एतस्मात् कारणात्, **एवं** यथा हिमस्य वह्निसन्निधौ दाहजनकत्वं स्वभावः, तथा, **वह्न्यादेः शीतता**

न किम्? किं न स्वभावः?, हिमसन्निधावेव शीतकार्यरोमाञ्चादिजनकत्वस्वभाव इत्यर्थः ॥ १५ ॥ १२७ ॥

उक्तपराभिप्रायमाचार्योऽपहस्तयति—

**व्यवस्थाभावतो ह्येवं, या त्वद्बुद्धिरिहेदृशी ।**
**सा लोष्टादस्य यत् कार्यं, तत्त्वतस्तत्स्वभावतः ॥ १६ ॥ १२८ ॥**

**व्यवस्थाभावतो** हीति । **एवं** उक्तप्रकारेण, **व्यवस्थाभावतः** सम्यग् नियामकाभावात् सर्वत्र अस्यैवायं स्वभाव इति नियमात्, **हि** निश्चितम्, एतदपि स्यात्, यदुत-**या इह** विचारे, **ईदृशी** स्वभावान्यथात्वप्रकल्पनात्मिका, **त्वद्बुद्धिः सा लोष्टात्** पाषाणादेव, समुत्पन्नेति दृश्यं, यतः, त्वत्समीपस्थे लोष्टे त्वत्स्वभावस्येदृशबुद्धिजनकत्वस्य संक्रमात्, एवमभ्युपगमे सति यदा त्वत्सामीप्यं लोष्टे नास्ति तदा ततो नेदृशबुद्धिसमुत्पत्तिः, त्वत्सामीप्ये सति ईदृशबुद्धिजनकत्वं स्वभावः पाषाणस्य किं न स्यात्, तथा **अस्य** लोष्टस्य, **यत् कार्यम्** अभिघातादिकम्, **तत्** अभिघातादि कार्यं, **त्वत्तः** तव सकाशात् स्यात्, **तत्स्वभावतः** लोष्टसमीपस्थस्य तव लोष्टस्वभावात्, तत एव लोष्टसामीप्याभावे त्वत्तस्तत्कार्यानुत्पत्तिसम्भवात् ॥ १६ ॥ १२८ ॥

यदि नामैवं ततः किमित्यत आह—

**एवं सुबुद्धिशून्यत्वं, भवतोऽपि प्रसज्यते ।**
**अस्तु चेत् को विवादो नो, बुद्धिशून्येन सर्वथा ॥१७॥१२९॥**

**एवमिति**-उक्तप्रकारेण भवतो लोष्टस्वभावप्रसक्तावित्यर्थः । **भवतोऽपि** तवापि, अपिना यथा लोष्टस्य सुबुद्धिशून्यत्वं तथेत्यर्थः परिगृहीतो भवति, **सुबुद्धिशून्यत्वं** सम्यग्बुद्धिरहितत्वम्, **प्रसज्यते** आपद्यते, तथा अपिना लोष्टस्यापि त्वत्सामीप्ये त्वत्स्वभावसङ्क्रमाद् बुद्धियुक्तत्वमापद्यत इत्यर्थः समुच्चीयते। परोऽत्रेष्टापत्तिं शङ्कते-**अस्तु चेदिति**-न्यायप्राप्तं तथास्वभावत्वमस्तु का नो हानिरिति चेदित्यर्थः, तदा **नः** अस्माकम्, **बुद्धिशून्येन सर्वथा**लोष्टस्वभावसंक्रान्त्या बुद्धिरहितेन भवता समं **को विवादः** न कश्चिद् विवादः, चेतनस्याचेतनेन समं विवदासम्भवात्।

अत्र व्यवस्था श्रीमद्भिर्यशोविजयोपाध्यायैरित्थं भाविता—

एवं चावश्यक्लृप्तनियतपूर्ववर्तिनो हिमादेरेव रोमाञ्चादिकार्यसम्भवे तत्सह-

भूतस्य वह्नेरन्यथासिद्धत्वान्न तज्जनकत्वम्, नवा तदनुरोधेन शीतस्वभावत्वम्, प्रकृतेऽप्येवं व्यवस्था भावनीया, अथैवं कारणत्वस्य स्वाभाविकत्वे नीलादिवत् साधारण्यं स्यादिति चेत्? स्यादेव, सर्वैस्तत्त्वेन प्रतीयमानत्वरूपम्, अन्य-ग्रहानधीनग्रहविषयत्वरूपमपि तद्धेतुशक्तावस्त्येव, व्यञ्जकस्वभावे त्वन्यघटित-त्वादेव नास्ति; न च परापेक्षत्वादलीकत्वापत्तिः, तथानियमाभावात्, अभ्य-धिष्महि च भाषारहस्ये—

"ते होंति परावेक्खा, वंजयमुहदंसिणो त्ति ण य तुच्छा।
दिट्ठमिणं वेचित्तं, सराव-कप्पूरगंधाणं ॥ ३० ॥" इति,
"ते भवन्ति परापेक्षा व्यञ्जकमुखदर्शिन इति न च तुच्छाः।
दृष्टमिदं वैचित्र्यं शरावकर्पूरगन्धयोः ॥ १ ॥" इति संस्कृतम् ॥

संवादयन्ति चामुमर्थं प्रश्न-प्रतिविधानाभ्यामुदयनाचार्याः, तथाहि—"नन्वेतत् कारणत्वं यदि स्वभावो भावस्य नीलादिवत् तदा सर्वसाधारणं स्यात्, नहि नीलं किञ्चित् प्रत्यनीलम्, अथौपाधिकं, तदा उपाधेरपि स्वाभाविकत्वे तथात्वप्रसङ्गः, औपाधिकत्वे त्वनवस्था, असाधारणत्वमप्यस्य स्वभाव एव, तत उत्पत्तेरारभ्य कुर्यात्, स्थिरस्यैकस्वभावत्वादिति चेत्? उच्यते—

"हेतुशक्तिमनादृत्य, नीलाद्यपि न वस्तु सत्।
तद्युक्तं तत्र तच्छक्तमिति साधारणं न किम्? ॥ १ ॥"

सर्वसाधारणनीलादिवैधर्म्येण कार्यकारणभावस्य काल्पनिकत्वं व्यवस्थापयता नीलादि पारमार्थिकमेवाभ्युपगन्तव्यम्, अन्यथा तद्वैधर्म्येण हेतुफलभावस्या-पारमार्थिकत्वानुपपत्तेः, न च कार्यकारणभावस्यापारमार्थिकत्वे नीलादि पार-मार्थिकं भवितुमर्हति, नित्यत्वप्रसङ्गात्, तस्मादस्य पारमार्थिकत्वेऽपरमपि तथा, नवोभयमपीति, कथमेकमनेकं परस्परविरुद्धं कार्यं कुर्यात्; तत्स्वभावत्वादिति यदि, तदोत्पत्तेरारभ्य कुर्यादविशेषादित्यपि न युक्तं, तत्तत्सहकारिसान्निध्ये तत्तत्कार्यं करोतीति स्वभावव्यवस्थापनात्, इदं च साधारणमेव, सर्वैरेव तथोपलम्भात, न नीलादेरप्यन्यत् साधारण्यमिति ॥ १७ ॥ १२९ ॥

स्वभावस्य प्रतिपक्षस्वभावबाधितत्वम्, आगमस्य च प्रतिपक्षागमबाधितत्वं यत् पराभिप्रेतं तत्र प्रतिपक्षस्वभावनिराकरणेन स्वभावस्य प्रतिपक्षस्वभाव-बाधितत्वमपहस्तितम्, तदनन्तरमवसरप्राप्तमागमस्य प्रतिपक्षागमबाधितत्वा-

पाकरणाय प्रतिपक्षागमनिराकरणं, किन्तु मध्य एवागमशरणार्थं प्रसङ्गाद् वार्तान्तरमुत्थापयति—

**अन्यस्त्वाहेह सिद्धेऽपि, हिंसादिभ्योऽशुभादिके ।**
**शुभादेरेव सौख्यादि, केन मानेन गम्यते? ॥ १८ ॥ १३० ॥**

अन्यस्त्विति-अन्यो वादी पुनरित्यर्थः, **आह** कथयति, **इह** विचारकलोके, अथवा न्याये लोके च, **सिद्धेऽपि** प्रसिद्धेऽपि, **हिंसादिभ्यः** हिंसादिनिषिद्ध-कर्मभ्य एव, **अशुभादिके** नरकादिगतिपीडादिके, **शुभादेरेव** पुण्यकर्मादेरेव सकाशात्, **सौख्यादि** स्वर्गादि, दिव्यगन्धवस्त्रदिव्याङ्गनाद्युपभोगप्रभवसुखादि वा, भवतीति शेषः, एवकारेण न पापकर्मादेः सौख्यादिरिति गम्यते, **इति** एतत्, **केन मानेन** केन प्रमाणेन, **गम्यते** ज्ञायते, नात्र किञ्चिन्मानमित्यभि-सन्धिः ॥ १८ ॥ १३० ॥

उक्तवार्ताप्रतिविधानवार्तामुपदर्शयति—

**अत्रापि ब्रुवते केचित्, सर्वथा युक्तिवादिनः ।**
**प्रतीतिगर्भया युक्त्या, किलैतदवसीयते ॥ १९ ॥ १३१ ॥**

अत्रापीति-एवंविधपूर्वपक्षात्मकवार्तायामपीत्यर्थः, **केचित्** सूक्ष्मबुद्धि-शालिनः, **सर्वथा युक्तिवादिनः** आगमनिरपेक्षयुक्तिमात्रकृतादराः, **ब्रुवते** कथयन्ति, किं कथयन्तीत्यपेक्षायामाह-**प्रतीतिगर्भयेति**-अनुभवसङ्गतया अनु-भवसहकृतयेति यावत्, **युक्त्या** तर्केण, **किल** इति सत्ये, न त्वैतिह्ये, सत्यमेवे-त्यर्थः, **एतत्** शुभादेरेव सौख्यादीति, **अवसीयते** निश्चीयते ॥ १९ ॥ १३१ ॥

तन्मतमेवोपदर्शयति—

**तयाहुर्नाशुभात् सौख्यं, तद्बाहुल्यप्रसङ्गतः ।**
**बहवः पापकर्माणो, विरलाः शुभकारिणः ॥ २० ॥ १३२ ॥**

**तयाहुरिति**-ते आहुरित्यस्य सन्धिबलात् तयाहुरिति स्वरूपम्, **ते** आगमनिर-पेक्षयुक्तिवादिनो वादिनः, **आहुः** ब्रुवते, यस्मात् **अशुभात्** पापकर्मणः सकाशात्, **न सौख्यं** दिव्याङ्गनाऽऽलिङ्गनादिप्रभवं सौख्यं न भवति, काऽत्र युक्तिरित्यपेक्षायामाह-**तद्बाहुल्यप्रसङ्गत**-इति सौख्यबाहुल्यप्रसङ्गादित्यर्थः, कस्मादेवमित्यपेक्षायामाह-**बहव** इति, **पापकर्माणः** हिंसादिपापकर्मनिरता

व्याधादयः, बहवः पुण्यकारिपुरुषापेक्षया बहुसंख्याकाः, शुभकारिणः हिंसादिपापकर्मनिवृत्ताः साधुप्रभृतयः, विरलाः अशुभकार्यपेक्षयाऽल्पसंख्यकाः।

अत्र तर्कस्वरूपमेवमुद्भावितमुपाध्यायैः–"एवं च सुखं यदि पापजन्यं स्यात् यावत्पापकर्तृवृत्ति स्यात्, दुःखं च यदि पुण्यजन्यं स्यात् पुण्यासमानाधिकरणं न स्यात्, इति तर्कशरीरं बोध्यम्" इति ॥ २० ॥ १३२ ॥

आपाद्यमानं सुखबाहुल्यं यदि स्यादेव जगति तदा तदापादनमिष्टापादनमेवेति तर्काशुद्धिः स्यादतस्तद्विपर्ययोपदर्शनेन निरुक्ततर्कस्य शुद्धत्वमावेदयति—

**न चैतद् दृश्यते लोके, दुःखबाहुल्यदर्शनात् ।**
**शुभात् सौख्यं ततः सिद्धमतोऽन्यच्चाप्यतोऽन्यतः ॥२१॥१३३॥**

**न चैतदिति ।** एतत् आपाद्यमानं सुखबाहुल्यं, **लोके** जगति, **न च** नैव, **दृश्यते** अनुभूयते, सुखविरोधिनो दुःखस्य बाहुल्यदर्शने सिद्धे एव सुखस्य तदपेक्षया बाहुल्योपलम्भाभावोऽनुभवकोटिमारोहेदित्यत आह–**दुःखबाहुल्यदर्शनादिति**–दुःखस्य पुण्यासमानाधिकरणत्वदर्शनात्, यत्र यत्र पुण्यं नास्ति तत्र तत्र पुण्यानधिकरणे सर्वत्रैव पुंसि दुःखस्य दर्शनादित्यर्थः, इदमुपलक्षणं सुखे यावत्पापकर्तृवृत्तित्वाभावस्य, यत एवं **ततः** तस्मात् कारणात्, **शुभात्** पुण्यकर्मणः सकाशात्, **सौख्यं** सुखं भवति, सुखरूपकार्याल्पत्वेन तत्कारणस्य पुण्यकर्मणोऽल्पत्वस्य न्याय्यत्वात्, **अतः** सौख्यात्, **अन्यद्** भिन्नं, दुःखमिति यावत्, **चापि** अपीत्यनेन सुखं यथा शुभात् तथेत्यर्थोऽवबोध्यते, चकारः पुनरर्थकः, **अतः** पुण्यात्, **अन्यतः** पापात्, पुण्यभिन्नात् पापाद् दुःखं भवतीति, तथा च सुखकारणपुण्यमल्पसङ्ख्याकमिति सुखमल्पं, दुःखकारणं पापकर्म बहुसङ्ख्याकमिति तत्कार्यं दुःखं बहुसङ्ख्याकमिति सिद्धमिति भावः ॥ २१ ॥ १३३ ॥

दर्शितस्यास्य स्वतन्त्रसाधनत्वाभावाद् विपर्ययपर्यवसानतयैवापादनस्य साधनाङ्गत्वेन साक्षात्साधनत्वं नास्तीत्यन्येषां वार्तान्तरमाह—

**अन्ये पुनरिदं श्राद्धा, ब्रुवत आगमेन वै ।**
**शुभादेरेव सौख्यादि, गम्यते नान्यतः क्वचित् ॥२२॥१३४॥**

**अन्ये पुनरिति ।** **श्राद्धाः** श्रद्धावन्तः, यस्य यत्र प्रमाणे श्रद्धा स तदेव

प्रमाणं स्वाभीष्टप्रमेयसाधनायाऽऽश्रयतीति आगमेन वस्तु साधयत आगम एव श्रद्धा सिद्धा भवतीत्यागमे श्रद्धावन्त इति यावत्, **इदं** वक्ष्यमाणस्वरूपम्, **ब्रुवते** कथयन्ति, किमित्यपेक्षायामाह–**आगमेनेति**। **वै** निश्चितम्, **शुभादेरेव** पुण्यकर्मादेरेव, **सौख्यादि** सौख्यादिफलं भवतीति आगमेनैव, **गम्यते** ज्ञायते, **क्वचित्** कुत्रापि, **नान्यतः** आगमभिन्नेन प्रमाणेन न गम्यते ॥ २२ ॥ १३४ ॥

आगमेनैव गम्यत इत्यत्र युक्तिमुपदर्शयति—

**अतीन्द्रियेषु भावेषु, प्राय एवंविधेषु यत् ।**
**छद्मस्थस्याविसंवादि, मानमन्यन्न विद्यते ॥ २३ ॥ १३५ ॥**

**अतीन्द्रियेष्विति**–ऐन्द्रियकक्षयोपशमाग्राह्येष्वित्यर्थः, **भावेषु** पदार्थेषु, **प्रायः** बाहुल्येन, **एवंविधेषु** शुभादेः सौख्यादीत्येवंप्रकारेषु, **यत्** यस्मात् कारणात्, **छद्मस्थस्य** अक्षीणघातिकर्मणोऽस्मदादेः, **अविसंवादि** इदमित्थमेवेति नियमवत्, अप्रामाण्यादिशङ्काविरहितमिति यावत्, **अन्यत्** आगमातिरिक्तम्, **मानं** प्रमाणम्, **न विद्यते** नास्त्येव, प्रातिभादिप्रमाणेनागमातिरिक्तेनापि योगिभिरतीन्द्रियजातीयाः पदार्था गृह्यन्त इति प्रायः पदम् ।

अत्रोपाध्यायाः शिष्यबुद्धिवैशद्यायेत्थं मननं कृतवन्तः, तथाहि–"अत्र च यद्यप्यतीन्द्रियार्थे पूर्वमागमस्य प्रमाणान्तरानवगतवस्तुप्रतिपादकत्वेनाहेतुवादत्वम्, तथाऽप्यग्रे तदुपजीव्य प्रमाणप्रवृत्तौ हेतुवादत्वेऽपि न व्यवस्थाऽनुपपत्तिः, आद्यदशापेक्षयैव व्यवस्थाऽभिधानात्, अतो यदन्यत्रोक्तम्–"आगमश्चोपपत्तिश्च" इत्यादि तत् नानेन सह विरुध्यते, अपूर्वत्वं चादृष्टस्योपपद्यत इति ध्येयम्" इति ॥ २३ ॥ १३५ ॥

आगमनिरपेक्षयुक्तिमात्रेण शुभात् पुण्यमित्यादिव्यवस्थां कुर्वतां युक्तिं दूषयति—

**यच्चोक्तं दुःखबाहुल्यदर्शनं तन्न साधकम् ।**
**क्वचित् तथोपलम्भेऽपि, सर्वत्रादर्शनादिति ॥ २४ ॥ १३६ ॥**

**यच्चोक्तमिति**–परैः शुभात् सौख्यसिद्धौ तर्कघटकत्वेनोक्तं यदपीत्यर्थः, किमुक्तमित्यपेक्षायामाह–**दुःखबाहुल्यदर्शनमिति**, **तत्** दुःखबाहुल्यदर्शनम्, **साधकम्** आपादकमपि, स्वतन्त्रसाधकत्वस्याभावात्, **न** नैव, कुतः?

इत्याह-क्वचिदिति-भरतादावित्यर्थः, **तथोपलम्भेऽपि** दुःखबाहुल्यदर्शनेऽपि, **सर्वत्र** महाविदेहादौ, **अदर्शनात्** दुःखबाहुल्यानुपलम्भात्, इतिशब्दो हेतुसमाहर्यर्थः ॥ २४ ॥ १३६ ॥

पराभिप्रायमाशङ्क्य परिहरति —

**सर्वत्र दर्शनं यस्य, तद्वाक्यात् किं न साधनम्? ।**
**साधनं तद्भवत्येवमागमात् तु न भिद्यते ॥ २५ ॥ १३७ ॥**

**सर्वत्रेति**-सर्वक्षेत्रेष्वित्यर्थः, **दर्शनं** दुःखबाहुल्यज्ञानं, **यस्य** सर्वज्ञादेः, **तद्वाक्यात्** सर्वज्ञादिवाक्याद् दुःखबाहुल्यप्रतिपादकाद्, दुःखबाहुल्यं ज्ञात्वा, **साधनम्** उक्तप्रसङ्गसाधनम्, **किं न भवेत्?** किं न स्यात्?, अपि तु तत आपाद्यव्यतिरेकनिश्चयादुक्तप्रसङ्गसाधनं स्यादेवेति चेत्? अत्रोत्तरं-**तत् साधनम्** उक्तप्रसङ्गसाधनं, **भवत्येव** अवश्यं भवति, एवकारपाठो हरिभद्रसूरिसम्मतः, एवमिति पाठ उपाध्यायसम्मतः, एवमित्यस्य उक्तप्रकारेणेति व्याख्यानात्, **आगमात्** आगमप्रमाणात्, दुःखबाहुल्यादिप्रतिपादकसर्वज्ञादिवचनस्याऽऽगमत्वात् ततो ज्ञात्वा जायमानस्य प्रसङ्गसाधनस्य श्रुतानुसारिमत्यात्मकस्य श्रुतान्तर्भूतत्वात्, **न भिद्यते** न भिन्नं भवति ।

उक्तार्थसंवादायोपाध्यायैरित्थमत्राभिहितम्-"अत एव भव्याभव्यादिभावानां पूर्वं "तत्थ य अहेउवाओ भवियाऽभवियादओ भावा" [तत्र चाहेतुवादो भव्याभव्यादयो भावाः] इति गाथाप्रतीकेनाहेतुवादविषयत्वमुक्त्वाऽपि "भविओ सम्मद्दंसण-नाण-चरित्त-पडिवत्तिसंपण्णो । णियमा दुक्खंतकडो त्ति लक्खणं हेउवावस्स ॥ १ ॥ सम्मति गा० १४० ॥ [भव्यः सम्यग्दर्शन-ज्ञान-चारित्र प्रतिपत्तिसम्पन्नः । नियमात् कृतदुःखान्त इति लक्षणं हेतुवादस्य ॥ इति संस्कृतम् ।] इति गाथयाऽनन्तरमागमोपगृहीतप्रवृत्त्या हेतुवादविषयत्वमुक्तं भगवता सम्मतिकृता, इत्यवधेयम्" इति ॥ २५ ॥ १३७ ॥

ननु शुभादेरेव कर्मणः सौख्यादीति नियमः कथमागमादपि प्रत्येयः?, लोके केषाञ्चिदशुभानुष्ठायिनामशुभादपि पापकर्मणः सकाशात् सुखोत्पाददर्शनेन व्यभिचारनिश्चयादित्यत आह—

**अशुभादप्यनुष्ठानात्, सौख्यप्राप्तिश्च या क्वचित् ।**
**फलं विपाकविरसा, सा तथाविधकर्मणः ॥ २६ ॥ १३८ ॥**

**अशुभादप्यनुष्ठानादिति**–चौर्यादितः क्षुद्रदेवताविशेषमुद्दिश्यानुष्ठीयमानाद् भूतवधादितश्चेत्यर्थः, **या क्वचित् सौख्यप्राप्तिश्च** धनावाप्ति-पुत्राद्यवाप्तिजन्यसुखावाप्तिश्च लोकसिद्धा, **सा विपाकविरसा** निरुक्तसुखाप्तिरुत्तरकालेऽहितानुबन्धिनी, **तथाविधकर्मणः** अशुभानुबन्धिशुभकर्मणः प्राचीनपापानुबन्धिपुण्यकर्मण इति यावत्, फलं, न तु तदशुभस्यैव फलम्। ननु यदि प्राक्कृतस्यैव पापानुबन्धिपुण्यस्य फलं, तदेदानीं चौर्यादेः क्षुद्रदेवतोद्देश्यकभूतवधादेरनाचरणेऽपि तत् स्यादेवेति तदाचरणमनर्थकमापन्नमिति चेत्? न–तथाभूतपापजनकव्यापारमपेक्ष्यैव प्राचीनपापानुबन्धिपुण्यस्योद्देश्यफलजनकत्वात् प्राचीनपापानुबन्धिपुण्यविपाकजनकतयेदानीन्तनचौर्यादिक्षुद्रदेवतोद्देश्यकभूतवधादिकर्मानुष्ठानस्यापेक्षणात्, यत एव प्रागनुष्ठितपापानुबन्धिपुण्यफलमेवैतत् तत एव चौर्याद्यनुष्ठायिनः क्षुद्रदेवतोद्देश्यकभूतवधाद्यनुष्ठायिनोऽपीदानीं क्वचिन्न भवत्यपि सौख्यदीति व्यभिचारेण तत्कर्मणस्तत्फलजनकत्वं नेत्येतदवगतये क्वचिदित्युक्तम्; न च साङ्गे विहितकर्मणि सत्यवश्यं फलमिति नियमेनैहिकतत्तत्फलोद्देशेन विहितस्य तत्तत्कर्मणोऽङ्गादिलक्षणसहकारिविरहप्रयुक्तो व्यभिचारो न दोष इति वाच्यम्, साङ्गादपि पुत्रेष्ट्यादेः क्वचित् पुत्राद्यनुत्पाददर्शनात्, एतेन 'पुत्रोत्पत्तिप्रतिबन्धकादृष्टध्वंस एव पुत्रेष्ट्यादिफलं, न तु पुत्राद्युत्पत्तिः, सा तु प्रतिबन्धकाभावसहकृतदृष्टकारणसमाजादेवेति न दोषः' इति निरस्तम्, पुत्राद्युत्पत्तिप्रतिबन्धकादृष्टाभावस्य यथा पुत्राद्युत्पत्तौ कारणत्वं तथा कार्यमात्रे क्लृप्तकारणभावस्यादृष्टस्यापि तत्तत्कार्ये तत्तदनुकूलादृष्टत्वेन कारणत्वमिति प्रतिकूलकर्माभाववदनुकूलकर्मणोऽप्यवश्यमपेक्षणात् तद्विपाकार्थमेव तत्कर्मान्यथासिद्धेरित्याहुरुपाध्यायाः ॥ २६ ॥ १३८ ॥

अनन्तरोक्तार्थदार्ढ्याय निदर्शनमाह—

**ब्रह्महत्यानिदेशानुष्ठानाद् ग्रामादिलाभवत् ।**
**न पुनस्तत एवैतदागमादेव गम्यते ॥ २७ ॥ १३९ ॥**

**ब्रह्महत्येति**–ब्रह्महत्यायाः–ब्राह्मणहननस्य, **निदेशः**–आज्ञा, सा च त्वं ब्राह्मणं व्यापादय ततस्तुभ्यमहं ग्रामं दास्यामीत्येवंस्वरूपा, तदनुष्ठानं–तद्विषयसम्पादनं, ब्रह्महत्याकरणमिति यावत्, तस्मादित्यर्थः; **ग्रामादिलाभवत्** ग्रामादिप्राप्तिवत्, स ग्रामादिलाभो यथा प्रागाचीर्णपापानुबन्धिपुण्यकर्मण एव

भवति, **न पुनस्तत एव** ब्रह्महत्याया एव न पुनर्ग्रामादिलाभो भवति, तथा प्रकृतमपि सौख्यफलं पुत्रप्राप्त्यादिजन्यं क्षुद्रदेवताविशेषोद्देश्यकभूतवधाद्यनुष्ठानान्न भवति, किन्तु प्राचीनपापानुबन्धिपुण्यादेव भवतीति भावः; ननु ग्रामादिलाभाय ब्राह्मणं हन्यादित्येवं विध्यभावान्माऽस्तुग्रामादिलाभो ब्रह्महत्याफलं, क्षुद्रदेवताविशेषोद्देशेन क्रियमाणभूतवधादिकर्मणस्तु पुत्रप्राप्त्यादिफलं विधिबोधितमिति दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यमित्यत आह–**एतदिति**–एवंविधं वस्तु, यदनन्तरमेवोपपादितमित्यर्थः; **आगमादेव गम्यते** आगमप्रमाणादेवावबुध्यते, नान्यस्मात् प्रमाणात्, "मा हिंस्यात् सर्वा भूतानि" [ ] इत्यागम एव प्राणिमात्रहिंसाप्रतिषेधबोधको निषिद्धस्य हिंसासामान्यस्य दुःखजनकत्वं बोधयति, तत् कथमागम एव हिंसाविशेषस्य सुखजनकत्वं बोधयेदिति हृदयम्; यद्येवंविधार्थे आगमः प्रमाणतया नाऽऽश्रीयेत तदा श्रोत्रियेणापि म्लेच्छादिकृतगोवधादिकर्मविशेषात् फलविशेषदर्शनाद् गोवधादिकं किमिति नानुष्ठेयमित्येवं प्रश्ने किं समाधानं विधेयमिति सूक्ष्ममवलोकितमुपाध्यायैः ॥ २७ ॥ १३९ ॥

यच्च परेणोक्तं प्राक् 'आगमोऽपि प्रतिपक्षागमबाधितः' इति तन्न समीचीनम्, प्रतिपक्षतयाऽभिमतानामागमानां दुर्बलत्वेनाप्रतिपक्षत्वादित्याह—

**प्रतिपक्षागमानां च, दृष्टेष्टाभ्यां विरोधतः ।**
**तथाऽनाप्तप्रणीतत्वादागमत्वं न युज्यते ॥ २८ ॥ १४० ॥**

**प्रतिपक्षागमानां चेति**–अधिकृतार्थबाधकानां जैनातिरिक्तदर्शनानां पुनरित्यर्थः। **दृष्टेष्टाभ्यां विरोधत** इति 'आगमत्वं न युज्यते' इत्यनेनान्वितम्, दृष्टविरोधः–अबाधितप्रत्यक्षादिविषयीभूतार्थविरुद्धार्थाभिधायकत्वम्, इष्टविरोधः–स्वाभ्युपगतार्थविरुद्धार्थाभिधायकत्वमिति, तथा च तदन्यतरवत्त्वादित्यर्थः; **तथेति** हेत्वन्तरसमुच्चये, समुच्चितमेव हेत्वन्तरमुल्लिखति–**अनाप्तप्रणीतत्वादिति**–यथार्थवाक्यार्थज्ञानवान् आप्तः, तद्भिन्नोऽनाप्तः, यथार्थवाक्यार्थज्ञानविकल इति यावत्, तथाभूतपुरुषनिर्मितत्वादित्यर्थः; **आगमत्वं** प्रमाणशब्दत्वं, **न युज्यते** न संभवति, यथार्थवाक्यार्थज्ञानवत्पुरुषप्रवक्तृकशब्दत्वरूपस्य तल्लक्षणस्याभावात्, एवं चागमत्वस्यैवाभावे प्रतिपक्षागमत्वं सुतरां न तत्रेति न प्रतिपक्षागमबाधितत्वं जैनागमस्येत्याशयः ॥ २८ ॥ १४० ॥

यद्यपि परदर्शनानामागमत्वाभावेऽनाप्तप्रणीतत्वमपि हेतुरुपन्यस्तोऽस्ति तथापि

तद्ग्रहोऽबाधितप्रत्यक्षादिस्वाभ्युपगमविरुद्धार्थाभिधायकत्वलक्षणदृष्टेष्टविरोधरूप-प्रथमहेतुग्रहत एव सम्भवति नान्यथेत्युपजीव्यत्वात् प्रथमहेतोराश्रयणमेव युक्त-मित्युपदर्शयन् तदुपदर्शनमेव प्रतिजानीते—

**दृष्टेष्टाभ्यां विरोधाच्च, तेषां नाप्तप्रणीतता ।**
**नियमाद् गम्यते यस्मात्, तदसावेव दृश्यते ॥ २९ ॥ १४१ ॥**

**दृष्टेष्टाभ्यामिति** । **तेषां** विप्रतिपन्नानां जैनातिरिक्तदर्शनानामधिकृतार्थ-बाधकानां; **दृष्टेष्टाभ्यां विरोधाच्च नाप्तप्रणीततेति**–स्पष्टम्, किन्तु नाप्त-प्रणीततेत्यस्यानाप्तप्रणीतत्वमाप्तप्रणीतत्वाभावो वाऽर्थः, कथमित्याकाङ्क्षानिवृत्तये उपाध्यायैरिदमभिहितम्–"नाप्तपदस्य नाकादिमध्यनिवेशाश्रयणादनाप्तप्रणीत-तेत्यर्थः, "आप्तप्रणीतता" इत्युत्तरं नञो योजनात्, तत्र क्रियान्वये तात्पर्या-दाप्तप्रणीतत्वाभाव इति वाऽर्थः" इति, **नियमात्** यत्र यत्र दृष्टेष्टाभ्यां विरुद्धत्वं तत्रानाप्तप्रणीतत्वम्, आप्तप्रणीतत्वाभावो वेति व्याप्तेः; तादृशसामान्यव्याप्ति-ग्रहणादित्यर्थः, **गम्यते** अनुमीयते, जैनागमातिरिक्तागमा अनाप्तप्रणीता आप्त-प्रणीतत्वाभाववन्तो वा दृष्टेष्टाभ्यां विरोधादिति प्रयोगोऽत्र द्रष्टव्यः; **यस्मात्** दृष्टेष्टविरोधहेतुकानुमितिविषयत्वात्, **तत्** तस्मात् कारणात्, दृष्टेष्टाभ्यां विरोधस्य प्रथमहेतुस्वरूपस्य सिद्धौ ततोऽनाप्तप्रतीतत्वमाप्तप्रणीतत्वाभावो वाऽनायासेनैव सिध्यति द्वितीयो हेतुरित्यत इति यावत्, **असावेव** दृष्टेष्टाभ्यां विरोध एव, **दृश्यते** शब्देन बोध्यते ॥ २९ ॥ १४१ ॥

जैनातिरिक्तदर्शनेषु मध्ये प्रथमं मण्डलतन्त्रादिवादिमते दृष्टेष्टविरोधयोरुप-दर्शयितव्ययोरादौ दृष्टविरोधमुपदर्शयति—

**अगम्यागमनादीनां, धर्मसाधनता क्वचित् ।**
**उक्ता लोकप्रसिद्धेन, प्रत्यक्षेण विरुध्यते ॥ ३० ॥ १४२ ॥**

**अगम्यागमनादीनामिति**-लोकशास्त्रनिषिद्धभगिन्यादिगमन-मांसभक्षण-प्रभृतीनाम्, **क्वचित्** मण्डलतन्त्रादौ, **धर्मसाधनता** धर्मं प्रति कारणता, **उक्ता** प्रतिपादिता, सा **लोकप्रसिद्धेन** आविद्वदङ्गनादिजनसिद्धेन, **प्रत्यक्षेण** भगिन्यादिगमन-मांसभक्षणादिकं न धर्मजनकमित्याकारेण श्रुतनिश्रितादिमति-ज्ञानरूपेण प्रत्यक्षेण, **विरुध्यते** बाध्यते; अगम्यागमनादिप्रतिपादकवचनानां

च नोक्तप्रत्यक्षबाधकत्वं लोकसिद्धोक्तप्रत्यक्षस्य बहुसिद्धत्वेनागम्यागमनादिप्रतिपादकवचनापेक्षया बलवत्त्वात्, यद्यपि शतमप्यन्धानां न पश्यतीति न्यायात् केवलं बहुसिद्धत्वमप्रयोजकं बलवत्त्वस्य, तथापि अनुमानस्य व्याप्तिग्राहकतयाऽऽगमस्य च शक्तियोग्यतादिग्राहकतयोपमानस्य च सादृश्यग्राहकतया प्रत्यक्षमुपजीव्यमिति दर्शितप्रत्यक्षस्योपजीव्यजातीयत्वमप्यस्ति, यदि भगिन्यादिगमनादिकं धर्मजनकं स्यात् तदाऽविगानेन धर्मजनकत्वाभाववत्तया सकलजनसिद्धप्रत्यक्षविषयो न भवेदित्यनुकूलतर्कसहकृतत्वं च प्राबल्यप्रयोजकं समस्तीति ॥ ३० ॥ १४२ ॥

दृष्टविरोधमुपदर्श्येष्टविरोधं मण्डलतन्त्रादिवादिमते उपदर्शयति—

**स्वधर्मोत्कर्षा(र्षणा)देव, तथा मुक्तिरपीष्यते ।**
**हेत्वभावेन तद्भावो, नित्य इष्टेन बाध्यते ॥ ३१ ॥ १४३ ॥**

**स्वधर्मोत्कर्षादेवेति**–स्वाभिमतागम्यागमनादिधर्मप्रकर्षादेवेत्यर्थः, **तथा** तद्वत्, **मुक्तिरपीष्यते** अधिकृतागम्यागमनादिवादिभिर्मोक्षोऽपि स्वीक्रियते; भवतु मोक्षाभ्युपगमस्तेषां ततः किमित्यत आह–**हेत्वभावेनेति**–सर्वागम्यागमनादीनां कर्तुमशक्यतया सर्वागम्यागमनादिलक्षणतदुत्कर्षात्मकचरमहेत्वसम्भवेनेत्यर्थः, **तद्भावः** मुक्त्युत्पादः, **नित्यः** हेतुनिरपेक्षः स्यात्, आकाशादिवत् सर्वदा भावः स्यात्, अहेतोर्नित्यं सत्त्वमसत्त्वं वा, यदुक्तं–"नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणाद्" [ ] इति; अथवा अकारप्रश्लेषेण अनित्यः-अभवनशीलः स्यात्, शशशृङ्गादिवत्, उक्तवचनमेतस्मिन्नर्थेऽपि संवादकम्, स च **इष्टेन** स्वाभ्युपगतेन अगम्यागमनादिधर्मप्रकर्षहेतुकत्वेन, **बाध्यते** विरुद्धयते ।

अत्र मूलकर्तुर्हरिभद्रसूरेर्व्याख्यानं–"तद्भावः–मुक्तिभावः, नित्यः-शाश्वतः, इष्टेन बाध्यते, हेत्वभावेन तत्प्रकर्षाभावे परममाध्यस्थ्याभाववत्तदभावादिति" एवंस्वरूपं वचनान्तरेणोल्लिख्य तद्धृदयमित्थमुपवर्ण्योपपादितवन्त उपाध्यायाः–"तद्भावः–मुक्तिसद्भावः, नित्यः स्यात्, हेत्वभावेन मुक्तानां मुक्तताऽक्षतेः, तथा चेष्टबाधः" इति ग्रन्थकृदाशयस्तु हिंसाध्यवसायविशेषरूपहिंसोत्कर्षेण प्राक्कर्मक्षयसंभवेऽप्यग्रे तदभावेन क्षणिकत्वद्वाराऽसंभवादुपपाद्यः" इति, अत्र प्रथमचरणं

"स्वधर्मोत्कर्षादेवेति सप्ताक्षरकं न सङ्गतं, यद्युत्कर्षसमानार्थकमुत्कर्षणमिति तदा स्वधर्मोत्कर्षणादेव" इति तत्स्थाने भवितुमर्हति, तथा च व्याख्यायां तथैव तत्प्रतीकमुपादाय व्याख्यानं सुसङ्गतम् ॥ ३१ ॥ १४३ ॥

उक्तदोषापनोदाय पराभिप्रायमुपदर्शयति—

**माध्यस्थ्यमेव तद्धेतुरगम्यागमनादिना ।**
**साध्यते तत् परं येन, तेन दोषो न कश्चन ॥ ३२ ॥ १४४ ॥**

**माध्यस्थ्यमेवेति**–अरक्तद्विष्टत्वमेवेत्यर्थः, **तद्धेतुः** मुक्तिहेतुः, **तत् परं** क्लेशवासनयाऽक्षोभ्यत्वादरक्तद्विष्टत्वरूपं माध्यस्थ्यं प्रकृष्टम्, **येन** कारणेनागम्यागमनादिना, **साध्यते** निष्पाद्यते, गम्यामप्युपगच्छति अगम्यामप्युपगच्छतीत्येवमविशेषेण प्रवृत्ते रक्तद्विष्टत्वलक्षणमाध्यस्थ्यमेव निष्पादितं सन्मुक्तिहेतुः, **तेन** कारणेन, **न कश्चन दोषः** पूर्वोक्तदोषो न भवति, माध्यस्थलक्षणकारणोत्कर्षेण मुक्तिलक्षणकार्यस्य सम्भवात्, माध्यस्थ्योत्कर्षसम्पादकतयाऽगम्यागमनाद्युपयोगस्यापि युक्तत्वादित्याशयः ॥ ३२ ॥ १४४ ॥

निरुक्तपराभिप्रायं प्रतिक्षिपति—

**एतदप्युक्तिमात्रं यदगम्यागमनादिषु ।**
**तथा प्रवृत्तितो युक्त्या, माध्यस्थ्यं नोपपद्यते ॥ ३३ ॥ १४५ ॥**

**एतदपीति**–अनन्तरोक्तमपीत्यर्थः, **उक्तिमात्रं** युक्तिविकलं वाङ्मात्रम्, **यत्** यस्माद्धेतोः, **अगम्यागमनादिषु** अनन्तरोदितेषु अगम्यागमनादिषु, **तथा प्रवृत्तितः** तुल्यतया प्रवृत्तेः, **युक्त्या** युक्त्या विचार्यमाणं सत्, **माध्यस्थ्यम्** अरक्तद्विष्टत्वम्, **नोपपद्यते** नोपपन्नं भवति ॥ ३३ ॥ १४५ ॥

परममाध्यस्थ्यं यथोपपद्यते तथोपदर्शयति—

**अप्रवृत्त्यैव सर्वत्र, यथासामर्थ्यभावतः ।**
**विशुद्धभावनाभ्यासात्, तन्माध्यस्थ्यं परं यतः ॥३४॥१४६॥**

**अप्रवृत्त्यैवेति** । **सर्वत्र** गम्यागमनागम्यागमनादौ सर्वत्र, **यथासामर्थ्यभावतः** यावत् परिहर्तुं स्वस्य सामर्थ्यं तावत् स्वपरिहारसामर्थ्यमनुलङ्घ्य, **अप्रवृत्त्यैव** प्रवृत्त्यभावेनैव निवृत्त्यैव वा, इदं ममेष्टसाधनमितीष्टसाधनताज्ञानादिदं कुर्यामितीच्छया प्रवृत्तिर्भवति, इदं मम द्विष्टसाधनमिति द्विष्टसाधनताज्ञाना-

दुपाये द्वेषा भवति, द्वेषाच्च तद्विषयिणीच्छा नोपजायते, ततश्चेच्छाऽभावान्न प्रवर्तते, द्वेषासहकृतस्यैवेष्टसाधनताज्ञानस्योपायेच्छां प्रति कारणत्वादित्याशयवद्भिरुपाध्यायैः, अप्रवृत्त्यैवेत्यस्य तन्निबन्धनविषयद्वेषात् तदनिच्छयेत्यर्थः कृतः, तैरेव चोत्कृष्टमाध्यस्थ्यं निरुक्ताप्रवृत्त्या विशुद्धभावनाभ्यासाद् यथा भवति तथा वशिष्ठवचनसंवादपुरस्सरमुपदर्शितमुल्लिख्यते—

"तन्निबन्धनविषयद्वेषात् तदनिच्छया निर्ममत्वमासाद्य विशुद्धानां मैत्र्याद्युपबृंहितानां भावनानामनित्यत्वाद्यनुप्रेक्षाणामभ्यासाद् दृढमानसोत्साहात् परमनिर्ममत्वप्राप्तेः, विषयद्वेषस्यापि वह्नेर्दाह्यं विनाश्यानु विनाशवद् विषयेच्छां विनाश्य तत्कालं विनाशात्; तत्-प्रागुक्तम्, परम्-उत्कृष्टम्, माध्यस्थ्यं भवति यतः, अतोऽन्यथा नोपपद्यत इति भावः; तदिदमुक्तं वशिष्ठेनापि—

"मानसीर्वासनाः पूर्वं, त्यक्त्वा विषयवासनाः ।
मैत्र्यादिवासना राम!, गृहाणाऽमलवासनाः ॥ १ ॥"

तत्र वासनालक्षणमिदम्—

"दृढभावनया त्यक्तपूर्वापरविचारणम् ।
यदादानं पदार्थस्य, वासना सा प्रकीर्तिता ॥ २ ॥"

सा च द्विविधा—मलिना शुद्धा च, तत्र शुद्धा योगशास्त्रसंस्कारप्राबल्यात् तत्त्वज्ञानसाधनत्वेनैकरूपाऽपि मैत्र्यादिशब्दैर्विभक्ता, मलिना तु त्रिविधा—लोकवासना शास्त्रवासना देहवासना चेति, सर्वे जना यथा न निन्दन्ति तथैवाऽऽचरिष्यामीत्यशक्यार्थाभिनिवेशो लोकवासना; अस्याश्चाशक्यार्थत्वपुमर्थानुपयोगित्वाभ्यां मलिनत्वम्; शास्त्रवासना त्रिविधा-पाठव्यसनं बहुशास्त्रव्यसनम्, अनुष्ठानव्यसनं चेति, मलिनत्वं चास्याः क्लेशावहत्व-पुमर्थानुपयोगित्व-दर्पहेतुत्वैः; देहवासना च त्रिविधा—आत्मत्वभ्रान्तिः, गुणाधानभ्रान्तिः; दोषापनयनभ्रान्तिश्च; गुणाधानं द्विविधं—लौकिकं शास्त्रीयं च, आद्यं सम्यक्शब्दादिविषयसंपादनम्, अन्त्यं गङ्गास्नानादिसंपादनम्, दोषापनयनमप्येवं द्विविधम्—आद्यमौषधेन व्याध्याद्यपनयनम्, अन्त्यं स्नानादिनाऽशौचाद्यपनयनम्, एतन्मालिन्यं चाऽप्रामाणिकत्वात्, अशक्यत्वात्, पुमर्थानुपयोगित्वात्, पुनर्जन्महेतुत्वाच्च, शुद्धवासनया चेयं मलिनवासना क्षीयते, तथाहि—सुखिषु मैत्रीं भावयतस्तदीयं

सुखं मदीयमेवेति कृत्वा सर्वं सुखजातीयं मे भूयादिति चिन्तात्मिका रागवासना निवर्तते, दुःखिषु करुणां भावयतश्च वैर्यादिनिवृत्त्या द्वेषवासना निवर्तते, तथा पुण्यवत्सु मुदिताभावनात् पुण्याऽकारणानुशयनिवृत्तेस्तद्वासना निवर्तते, तथा पापेषूपेक्षां भावयतस्तत्करणनिमित्तकानुशयनिवृत्तेस्तद्वासना निवर्तत इति, ततोऽशुक्लाऽकृष्णपुण्यप्रवृत्ति-च्चित्तप्रसादाभ्यां परं माध्यस्थ्यमिति पातञ्जलानां प्रक्रिया" इति ॥ ३४ ॥ १४६ ॥

परहृदयमुद्धाटयति—

**यावदेवंविधं नैतत्, प्रवृत्तिस्तावदेव या ।**
**साऽविशेषेण साध्वीति, तस्योत्कर्षप्रसाधनात् ॥ ३५ ॥ १४७ ॥**

**यावदिति**–यावत्कालमित्यर्थः, **एवंविधम्** परमं गम्यागमनादौ सर्वत्राप्रवृत्तिरूपमिति यावत्, **एतत्** माध्यस्थ्यम्, **न** न भवति, **तावदेव** तावत्कालमेव, या प्रवृत्तिः, **सा** प्रवृत्तिः, **अविशेषेण** गम्यागम्यादिषु सामान्येन, तुल्यतयैवेति यावत्, **साध्वी** समीचीना, कुत इत्याकाङ्क्षायामाह–**तस्येति**-तस्य-माध्यस्थ्यस्य, **उत्कर्षप्रसाधनात्** परमत्वलक्षणोत्कृष्टतासम्पादनात्, **इति** एतस्मात् कारणात्, गम्यागम्यादावविशेषेण प्रवृत्तिर्न्याय्येति पराभिसन्धिः ॥ ३५ ॥ १४७ ॥

अत्रोत्तरमुपदर्शयति—

**नाप्रवृत्तेरियं हेतुः, कुतश्चिदनिवर्तनात् ।**
**सर्वत्र भावाविच्छेदादन्यथाऽगम्यसंस्थितिः ॥ ३६ ॥ १४८ ॥**

**नाप्रवृत्तेरिति**। **इयं** गम्यागम्यादौ तुल्यतया प्रवृत्तिः, **अप्रवृत्तेः** सर्वत्र गम्याऽगम्यादावप्रवृत्तिलक्षणपरममाध्यस्थ्यस्य, हेतुः कारणं, **न** नैव भवति, कुतः? इत्याकाङ्क्षानिवृत्तये त्वाह–**कुतश्चिदनिवर्तनादिति** क्वापि विषये निवृत्त्याख्यप्रयत्नाभावात्, प्रत्युत यथालाभं सर्वत्र प्रवृत्तेरित्यर्थः, इदमपि कुतः? इत्यपेक्षायामाह-**सर्वत्रेति**-सर्वस्मिन्, भोग्यविषये इत्यर्थः, **भावाविच्छेदात्** कामनाविच्छेदाभावात्, इच्छानिवृत्त्यभावादिति यावत्, **अन्यथा** क्वचित् कामनानिवृत्त्यङ्गीकारे, **अगम्यसंस्थितिः** अगम्यव्यवस्था, यतो यद्भिन्ने प्रवृत्तिस्तदेवागम्यमिति ॥ ३६ ॥ १४८ ॥

अधिकृतस्यागम्यस्योपचयार्थमाह–

**तच्चास्तु लोक-शास्त्रोक्तं, तत्रौदासीन्ययोगतः ।**
**सम्भाव्यते परं ह्येतद्, भावशुद्धेर्महात्मनः ॥ ३७ ॥ १४९ ॥**

**तच्चेति**-अगम्यं चेत्यर्थः, **लोक-शास्त्रोक्तं** लोके शास्त्रे चागम्यतयाऽभिहितं भगिन्याद्येव, **अस्तु** भगिन्यादिवत् पाणिगृहीताऽप्यगम्या, पाणिगृहीतैवागम्या भगिन्यादिकं तु गम्यमेवेत्यादिका लोकशास्त्रविरुद्धा स्वेच्छामात्रपुरस्कृता कल्पना तु अप्रामाणिकत्वान्न लौकिकपरीक्षकैरादरणीया, **तत्र** अगम्ये भगिन्यादौ, **औदासीन्ययोगतः** अरक्ताद्विष्टतयाऽप्रवृत्तितः, **महात्मन** इति उपाध्याय-सम्मतः पाठः, दृढप्रतिज्ञस्येति तद्व्याख्यानात्, "महात्मनाम्" इति मूलकृत्सम्मतः पाठः, महासत्त्वानामित्येवं तद्व्याख्यानात्, **भावशुद्धेः** एकान्तविहितानुष्ठानसम्पत्तितः, **हि** निश्चितम्, **परं** सर्वत्र निस्पृहतयाऽप्रवृत्तिस्वरूपतालक्षणोत्कृष्टताशालि, **एतत्** माध्यस्थ्यम्, **संभाव्यते** संभावनाविषयो भवति, संभावनायां हेतुरुपदर्शित उपाध्यायैः–'देशविरतिपरिणामेनानिकाचितस्य चारित्रमोहनीयस्याचिरादेव क्षय-संभवात्' इति ।

अत्र शिष्यबुद्धिवैशद्यार्थं पराभिप्रायस्योपदर्शनपरं खण्डनमुपाध्यायकृतमुलिख्यते–"स्यादेतत्, इच्छानिरोधान्न तन्निवृत्तिः, किन्तु यथेच्छं प्रवृत्त्या सिद्धत्वज्ञानादेव, ततो योगार्थं यथेच्छं प्रवृत्तिरेवोचिता, का तत्र गम्यागम्यव्यवस्था ? मैवम्–यावत्सुखसिद्धत्वधियं विना विशेषदर्शिनः सामान्येच्छाया अविच्छेदात्; विशिष्य सिद्धत्वधियस्तु विशेषेच्छाया अनिवर्तकत्वात्, अन्यथा प्रोषितस्याज्ञातकान्तामरणस्य तत्कान्ताऽवलोकनेच्छाऽभावप्रसङ्गात्, असिद्धविषये इच्छाया अनिरोधाच्च; तस्मात् सामान्येच्छाविच्छेदः सिद्धत्वज्ञानकृतो नास्ति विरक्तानाम्, किन्तु शुभादृष्टकृत एव, तच्च शुभादृष्टं विषयाप्रवृत्त्यैव भवति, तत्प्रवृत्त्या तु तत्प्रतिकूलाऽदृष्टार्जनादुत्कटेच्छैव विषये जायते, तदुक्तं पतञ्जलिनाऽपि–"भोगाभ्यासमनुवर्धन्ते रोगाः, कौशलं चेन्द्रियाणाम्" [ ] इति; गीतास्वप्युक्तम्–

"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव, भूय एवोपवर्धते ॥ १ ॥" इति, [ मनु० द्वि० अ० ]

इदं पद्यं भगवद्गीतासु नास्ति, किन्तु श्रुति[ स्मृति ]पद्यमिदम्, पञ्चदश्यास्तृप्तिदीपप्रकरणे सप्तचत्वारिंशत्तमपद्यमिदम्, तट्टीकायामित्थमभिहितम्–विवेकिन इवाविवेकिनोऽपि भोगेनैव तृप्तिः स्यादतो विवेकोऽप्रयोजक इत्याशङ्क्य भोगस्य तृप्तित्वाभावप्रतिपादिकां श्रुतिं पठति-'न जातु काम' इति, तत्र 'भूय एवोपवर्धते' इत्यस्य स्थाने 'भूय एवाभिवर्धते' इति, इत्थं चैतदवश्यमङ्गीकर्तव्यम्–पिपासाया इव विषयेच्छायाः क्लिष्टकर्मोदयजनितत्वेन तदुपशमेनैव तदुपशमात्, तदुपशमार्थमेव च पिपासोपशमार्थं जलपानस्येव मौनीन्द्रवचनामृतपानस्य न्याय्यत्वादिति" इति ॥ ३७ ॥ १४९ ॥

इति मण्डलतन्त्रवादिमतखण्डनम् ॥

---

## अथ संसारमोचकमतखण्डनम्—

अथ संसारमोचकागमेऽप्युक्तदोषमतिदिशति–

**संसारमोचकस्यापि, हिंसा यद् धर्मसाधनम् ।**
**मुक्तिश्चास्ति ततस्तस्याप्येष दोषोऽनिवारितः ॥ ३८ ॥ १५० ॥**

**संसारेति** । **संसारमोचकस्यापी**त्यपिना यथा मण्डलतन्त्रवादिमते दोषस्तथेत्यर्थः, परिगृह्यते, **यत्** यस्मात् कारणात्, **हिंसा** प्राणव्यपरोपणं, **धर्मसाधनं** धर्मनिमित्तम्, दुःखितः प्राणी हिंसया मृतः सन् दुःखविमुक्तो भवतीति दुःखविमोक्षणेन, **मुक्तिश्चास्ति** अभ्युपगतेति शेषः भवतु नामैवं ततः किमित्याकाङ्क्षायामाह–**तत** इति–तस्मात् कारणादित्यर्थः, **तस्यापि** संसारमोचकस्यापि, मते इति शेषः, **एष दोषः** लोकदृष्टविरुद्धत्वात् तदुत्कर्षलक्षणकारणस्यासंभवेन मुक्तिरूपकार्यस्याभावप्रसङ्गाच्च हिंसाया धर्मसाधनत्वं न संभवतीत्येवंलक्षणो दोषः, **अनिवारितः** पूर्वमत इवैतन्मतेऽपि वारयितुमशक्यः । ननु एतन्मरणान्ममैतद्धनाद्यवाप्तिर्भविष्यतीत्येवंविधधनलाभादितृष्णानिमित्तैव हिंसा न धर्मकारणं, या तु दुःखपरिभूतोऽयं न किञ्चित् सुखमनुभवति हिंसया मृतः सन् दुःखविमुक्तो भविष्यतीत्येनं मारयामीत्युपकारबुद्धितो योपकारनिमित्ता हिंसा सा धर्मसाधनमेव, यथा व्याधितस्याप्तवैद्येन दाहादिकरणं धर्मनिमित्तम्, तथा च दुःखितानां दुःखविमुक्तये हिंसाऽभ्युपगमो न विरोधाघ्रात इति चेत्? न–विरतिमप्रतिपद्यैव

शस्त्रघातादिना मृतानां प्राणिनां प्रेत्यानन्तदुःखेष्वेव नियोजनात्, एतज्जन्मनि यादृशी वेदना ततोऽसंख्यातादिगुणिता वेदना तथामृतानां नरकादिगतिगतानां स्यादित्युपकाराभावात्; किञ्च सुखिनोऽपि प्राणिनोऽधिककालं जीवन्तो विहाराऽन्नभक्षणादिक्रियया यथासंभवं जीवहिंसामगम्यागमनादिकं च कुर्वन्तः पापान्यनेकविधान्युपार्जयिष्यन्ति, ततः प्रेत्यानेकदुःखभाजो भविष्यन्तीत एवम्भूता मा भूवन्निमे इति मारयाम्यमून्नित्युपकारबुद्ध्या सुखिनामपि पापवारणार्थं घातः स्यात्, तथा चापूर्वकारुणिकस्य तव कुटुम्बघातोऽपि न्याय्यः, तस्माद् दुष्टोऽयं संसारमोचकाभिनिवेशः, दुःखकारणाधर्मविनाशो यथा भवति तथैव प्राणिनः प्रवर्तनं न्याय्यं, तच्च धर्मोपदेशतो विहितकर्मणि प्रवर्तनादेवेति धर्मे नियोजनादेव कारुणिकत्वमुपपद्यते इत्यार्हतमतमेव समीचीनम् ॥ ३८ ॥ १५० ॥

एतदेव भावयति–

**मुक्तिः कर्मक्षयादेव, जायते नान्यतः क्वचित्।**
**जन्मादिरहिता यत् तत्, स एवात्र निरूप्यते ॥३९॥१५१॥**

**मुक्तिरिति**–परमनिवृत्तिरित्यर्थः, **कर्मक्षयादेव** जन्मकारणपुण्यापुण्यलक्षणकर्मविगमलक्षणासाधारणकारणादेव, एवकारार्थव्यवच्छेदमुपदर्शयति–**नान्यतः क्वचिदिति**–कुत्रापि कस्यापि कदापि कर्मक्षयभिन्नदानादिलक्षणकारणान्मुक्तिर्न भवतीत्यर्थः; अभय-सुपात्रदानादितोऽपि कर्मक्षये सति तदनन्तरं मुक्तिर्न तु साक्षादित्याशयः, कथं कर्मक्षयादेवेत्यपेक्षायामाह–**जन्मादिरहितेति**, **यत्** यस्मात् कारणात्, **जन्मादिरहिता** जन्म-जरा-मरणादिरहिता मुक्तिः, दानादितस्तु पुण्यलोकाद्यवाप्ति-सद्गुरूपदेशादिर्भवति, न त्वीदृशी मुक्तिरिति, **तत्** तस्मात् कारणात्, **स एव** मुक्त्यसाधारणकारणं कर्मक्षय एव, **अत्र** एतत्प्रक्रमे, **निरूप्यते** प्रतिपाद्यते ॥ ३९ ॥ १५१ ॥

तत्रान्याभिमतहेतूनामपाकरणार्थं विकल्पमुखेन किंहेतुकोऽयमिति पर्यनुयुज्यते–

**हिंसाद्युत्कर्षसाध्यो वा, तद्विपर्ययजोऽपि वा।**
**अन्यहेतुरहेतुर्वा, स वै कर्मक्षयो ननु ? ॥ ४० ॥ १५२ ॥**

**हिंसाद्युत्कर्षसाध्यो वेति।** ननु इति आक्षेपे, वैपदं निश्चयार्थकम्, **स** कर्मक्षयः, **हिंसाद्युत्कर्षसाध्यो वा** कर्मण उपभोगादेव क्षय इति साक्षाद्धिंसाद्यु-

त्कर्षसाध्यत्वासम्भवाद्धिंसाद्युत्तरदुःखापनयनोत्कर्षसाध्यो वेति तदर्थः, **तद्विपर्ययजोऽपि वा** अहिंसाद्युत्कर्षसाध्यो वा, **अन्यहेतुः** वेत्यत्राप्यन्वेति, एतदुभयातिरिक्तकारणसाध्यो वा, **अहेतुर्वा** निर्हेतुक एव वा कर्मक्षयो भवेदिति चत्वारो विकल्पा अत्रोपतिष्ठन्ते ॥ ४० ॥ १५२ ॥

तत्र प्रथमविकल्पिते कर्मक्षयस्य हिंसाद्युत्कर्षसाध्यत्वे दोषमुपदर्शयति–

**हिंसाद्युत्कर्षसाध्यत्वे, तदभावे न तत्स्थितिः ।**
**कर्मक्षयास्थितौ च स्यान्मुक्तानां मुक्तताक्षतिः ॥ ४१ ॥ १५३ ॥**

**हिंसाद्युत्कर्षसाध्यत्व** इति–हिंसाद्युत्तरदुःखापनयनोत्कर्षसाध्यत्वे इत्यर्थः, **तदभावे** हिंसाद्युत्कर्षाभावे, **न** नैव, **तत्स्थितिः** कर्मक्षयस्थितिः, कारणाभावे कार्यस्यासंभवात्, **कर्मक्षयास्थितौ च** कर्मक्षयाभावे च, जन्मादिकारणकर्मसद्भावात्, **मुक्तानां** मुक्तत्वेनाभिमतानां, **मुक्तताक्षतिः** जन्मादिरहितावस्थाविशेषस्वरूपमुक्तताऽभावः स्यात् ॥ ४१ ॥ १५३ ॥

द्वितीयविकल्पगोचरीकृते कर्मक्षयस्याहिंसाद्युत्कर्षसाध्यत्वे तथाऽभ्युपगन्तुः परस्य परसिद्धान्ताश्रयणलक्षणं दोषमुपदर्शयति–

**तद्विपर्ययसाध्यत्वे, परसिद्धान्तसंस्थितिः ।**
**कर्मक्षयः सतां यस्मादहिंसादिप्रसाधनः ॥ ४२ ॥ १५४ ॥**

**तद्विपर्ययसाध्यत्व** इति–कर्मक्षयस्याहिंसाद्युत्कर्षसाध्यत्वेऽभ्युपगम्यमाने इत्यर्थः, **परसिद्धान्तसंस्थितिः** अन्यराद्धान्ताभ्युपगमप्रसङ्गः, **यस्मात्** कारणात्, **सतां** साधूनां, **अहिंसादिप्रसाधनः** अहिंसादिकारणकः, **कर्मक्षयः** प्राणिनां कर्मविनाशोऽभिमतः ॥ ४२ ॥ १५४ ॥

हिंसाद्युत्कर्षा-ऽहिंसाद्युत्कर्षान्यतरभिन्नकारणसाध्यत्वे तृतीयविकल्पविषयीकृते दोषमुपदर्शयति–

**तदन्यहेतुसाध्यत्वे, तत्स्वरूपमसंस्थितम् ।**
**अहेतुत्वे सदा भावोऽभावो स्यात् सदैव हि ॥ ४३ ॥ १५५ ॥**

**तदन्यहेतुसाध्यत्वे** इति-कर्मक्षयस्य हिंसाद्युत्कर्षाहिंसाद्युत्कर्षान्यतरभिन्नसाध्यत्व इत्यर्थः, एकैकस्योभयभिन्नत्वादुभयस्यान्यतरत्वेन भेदप्रतियोगितयोपादानम्, **तत्स्वरूपं** निरुक्तान्यतरभिन्नहेतुस्वरूपम्, **असंस्थितम्** सम्यग् न सिद्धम्,

इदं तदित्येवं विशिष्य प्रमाणेनोपदर्शयितुमशक्यम्, तथा चानिर्वचनीयत्वाद् बाधितमित्यर्थः, चतुर्थविकल्पविषयीकृते कर्मक्षयस्याहेतुकत्वे दोषमाह-**अहेतुत्वे** इति-बहुव्रीह्याश्रयणात् कर्मक्षयस्याहेतुकत्वे इत्यर्थः, **सदा भावः** सर्वदा भवनं स्यात्, अहेतुकस्योत्पत्तिकारणमन्तरेणैवोत्पत्तिशीलत्वस्वभावादेव भवनमिति तादृश-स्वभावस्य सर्वदाऽविशेषात् सर्वदा भवनं प्रसज्यत इत्यर्थः, यदि च नोत्पत्तिशील-त्वमस्य किन्त्वनुत्पत्तिशीलत्वमेव तदा कदापि भवनं न भवेदित्याह-**अभावो** **वेति**-अभवनं वेत्यर्थः, **स्यात्** भवेत्, हि निश्चितम्, **सदैव** सर्वदैव अनुत्पत्ति-शीलत्वस्वभावस्य सर्वदा व्यवस्थितेः ॥ ४३ ॥ १५५ ॥

तस्मात् कर्मक्षयस्याहिंसाद्युत्कर्षसाध्यत्वं विकल्पविषयीकृतमेव न्याय्यमित्याह—

**मुक्तिः कर्मक्षयादिष्टा, ज्ञानयोगफलं स च ।**
**अहिंसादि च तद्धेतुरिति न्यायः सतां मतः ॥ ४४ ॥ १५६ ॥**

**मुक्तिरिति**—परमानन्दप्राप्तिस्वरूपा मुक्तिरित्यर्थः, तेन कर्मसम्बन्धस्य बन्धत्वे कर्मसम्बन्धविगमो मुक्तिः, तस्याश्च कर्मक्षयस्वरूपाया न कर्मक्षयजन्यत्वमित्युक्ते-र्नावकाशः, **कर्मक्षयादिष्टा** कर्मक्षयजन्याऽभिमता, **स च** कर्मक्षयश्च, **ज्ञान-योगफलं** ज्ञानपदेन सम्यग्ज्ञान-सम्यग्दर्शनयोर्ग्रहणं, योगश्च शुक्लध्यानादिलक्षणः सम्यक् चारित्रमेव, तथा च सम्यग्ज्ञान-सम्यग्दर्शन-सम्यक्चारित्रमित्येतद्रत्न-त्रयफलम्, **अहिंसादि** आदिपदादस्तेयादिपरिग्रहः, हिंसाविरमणपरिमाणादि **तद्धेतुः** सम्यग्ज्ञानादिरत्नत्रयस्वरूपज्ञानयोगकारणम्, **इति** एवंस्वरूपः, **न्यायः** सन्मार्गः, **सतां** जैनागमरहस्यज्ञानां, **मतः** सम्मतः, अत्र न कश्चन विशेषोऽपि ॥ ४४ ॥ १५६ ॥

**॥ इति संसारमोचकमतखण्डनम् ॥**

---

## अथ याज्ञिकमतखण्डनम्—

यथा संसारमोचकागमो युक्त्यपेतस्तथा याज्ञिकागमोऽपीति दर्शयति—

**एवं वेदविहितापि, हिंसाऽपायाय तत्त्वतः ।**
**शास्त्रचोदितभावेऽपि, वचनान्तरबाधनात् ॥ ४५ ॥ १५७ ॥**

**एवमिति**—संसारमोचकाभिमतहिंसावदित्यर्थः, **वेदविहिताऽपि हिंसा** "श्वेतं वायव्यमजमालभेत भूतिकामः" [ ] इत्यादिविधिवाक्येन भूतिकामस्येष्ट-

साधनत्वेन बोधिताऽपि, श्वेतवर्णच्छागाऽऽलम्भनं वायुदेवतोद्देश्यकं भूतिकामकर्तृकं भूत्यात्मकतदिष्टसाधनमित्येवं बोधजनकनिरुक्तश्रुतिप्रतिपादिताऽपि हिंसेति यावत्, "**हिंसाऽपायाय**" इति श्रीहरिभद्रसूरिसम्मतः पाठः, **अपाया**येति प्रतीकमुपादाय प्रत्यपायार्थमेवेत्येवं व्याख्यानात्, **पापा**येति उपाध्यायसम्मतः पाठः, स्पष्टार्थत्वमालोच्य तावन्मात्रस्यैव तद्व्याख्याने उल्लिखितत्वात्, **तत्त्वतः** परमार्थतः, एतत् अपायायेत्यनेनान्वेति, 'तत्त्वतः' इत्यस्य युक्त्या विचार्यमाणेत्यर्थस्तु हिंसेत्यनेनान्वेति, विधिबोधितत्वान्नेयं पापजनिकेत्याशङ्काशङ्कूद्धरणायाह-**शास्त्रचोदितभावेऽपी**ति-प्रकृतविधिबोधितेष्टसाधनताकत्वेऽपीत्यर्थः, **वचनान्तरबाधनात्** सामान्यतः प्रवृत्तेन स्वशास्त्रप्रसिद्धेनैव वचनान्तरेण "मा हिंस्यात् सर्वा भूतानि" [　　] इति निषेधविधिना विरोधात्, वचनान्तरबाधनादिति हरिभद्रसूरिसम्मतः पाठः, उपाध्यायसम्मतस्तु 'बाधनात्' इत्यस्य स्थाने बोधनादिति पाठः, अनिष्टसाधनत्वेन बोधनादित्येवं तैर्व्याख्यानात् ॥ ४५ ॥ १५७ ॥

एतदेव भावयति—

**न हिंस्यादिह भूतानि, हिंसनं दोषकृन्मतम् ।**
**दाहवद् वैद्यके स्पष्टमुत्सर्गप्रतिषेधतः ॥ ४६ ॥ १५८ ॥**

**न हिंस्यादिहे**ति-इहेति भूतानीत्यनन्तरं योज्यं, न हिंस्याद् भूतानीति वचनं "मा हिंस्यात् सर्वा भूतानि" [　　] इति वेदवाक्यस्य स्मारकम्, तथा च इह "मा हिंस्यात् सर्वा भूतानि" इति वाक्ये, इदं वाक्यं साक्षादेव किमिति नोपन्यस्तमित्याशङ्कानिवृत्तये श्रीहरिभद्रसूरिभिरुक्तम्-"इहशब्दोऽन्यस्थाने प्रयुक्तश्छन्दोभङ्गभयात्" एवं तु द्रष्टव्यः-"न हिंस्याद् भूतानि" इति, एतावतेहशब्दमात्रस्यान्यस्थानप्रयुक्तत्वमुपपादितम्, ततश्चेदमप्यायात्येव-छन्दोभङ्गभयादेव साक्षाद्वेदवचनं न गुम्फितम्, अनुष्टुप्छन्दसि पञ्चमाक्षरस्य लघ्वक्षरत्वनियमादिति, **हिंसनं** राग-द्वेष-मोह-तृष्णादिनिबन्धनहिंसासामान्यम्, न तु यत्किञ्चिद्धिंसनं, येन यागीयहिंसनमनिषिद्धत्वादनिष्टजनकं न भवेदपि, **दोषकृत्** पापकृत्, पापमपि साक्षादनिष्टदुःखजनकत्वादनिष्टमित्यनिष्टजनकमिति यावत्, **स्पष्टम्** असंदिग्धतया स्पष्टं, नात्र कस्यापि परीक्षकस्य संदेहो हिंसनमनिष्टजनकं नवेति, **मतम्** अभ्युपगतम्, अत्र निदर्शनमाह-**दाहवद् वैद्यके** इति-यथा वैद्यके दाहो न

कार्य इति निषेधवाक्येन दाहसामान्यं दुःखादिकरत्वेनानिष्टजनकं मतं तथेत्यर्थः, उभयत्र युक्तिं दर्शयति–**उत्सर्गप्रतिषेधत** इति–न दाहः कार्य इति प्रतिषेधविधिर्यथा दाहत्वावच्छेदेनैव कार्यत्वं प्रतिषेधयन्ननिष्टसाधनत्वं बोधयति, तथा "मा हिंस्यात् सर्वा भूतानि" [ ] इति निषेधविधिरपि "अमानोनाः प्रतिषेधवचनाः" इति वचनात् मेति निषेधबोधकसमभिव्याहारादनिष्टसाधनत्वे निरूढलाक्षणिकप्रकृतविध्यर्थस्यानिष्टसाधनत्वस्य 'असति बाधके उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयः' इति व्युत्पत्तिबलतो निषेध्यतावच्छेदकहिंसात्वरूपोद्देश्यतावच्छेदकावच्छेदेनान्वयतो हिंसामात्र एवानिष्टसाधनत्वं बोधयतीत्यतो याज्ञिकहिंसनमपि दोषकृदित्यर्थः, एतेन–'इष्टसाधनत्वरूपविध्यर्थस्य नञर्थेऽभावेऽन्वये हिंसने इष्टसाधनत्वाभाव एव बोधितः स्यादिति ततः कथं हिंसने दोषकृत्त्वबोधः ?, नहि यदिष्टसाधनं न भवति तदनिष्टसाधनं भवत्येवेति नियमो येनेष्टसाधनत्वाभावतोऽनिष्टसाधनत्वमर्थादागच्छेत्, इष्टसाधनानिष्टसाधनभिन्नोपेक्षणीयार्थस्यापि सद्भावात्, प्रकृतनिषेधविधेः पापजनकत्वे निरूढलक्षणायां 'दाहवद् वैद्यके' इति दृष्टान्तानुपपत्तिः, व्याधिनिवृत्त्यर्थं कृतस्य दाहस्य तापात्मकानिष्टजनकत्वेऽपि पापजनकत्वाभावात्, इति प्रकृतविध्यर्थनिषेधस्येष्टसाधनत्वाभावरूपस्य हिंसात्वसामानाधिकरण्येनान्वयाद् यज्ञीयहिंसातिरिक्तहिंसाया इष्टसाधनत्वाभाववत्त्वेऽपि यज्ञीयहिंसाया इष्टसाधनत्वं विधिबोधितं नानुपपन्नं, तद्धर्मसामानाधिकरण्येन तदभाववत्ताज्ञानस्य तद्धर्मसामानाधिकरण्येन तद्वत्ताज्ञानाविरोधित्वात्' इति निरस्तम्, सामानाधिकरण्येन विधिशङ्काविरहेण सामान्यत एव निषेधान्वयस्वीकारादिति ॥ ४६ ॥ १५८ ॥

ततः किमित्याकाङ्क्षायामाह—

**ततो व्याधिनिवृत्त्यर्थं, दाहः कार्यस्तु चोदिते ।**
**न ततोऽपि न दोषः स्यात्, फलोद्देशेन चोदनात् ॥४७॥१५९॥**

**तत** इति–दाहकर्तव्यत्वनिषेधविधिना दाहत्वावच्छेदेनैव दाहेऽनिष्टसाधनत्वनिर्णयत इत्यर्थः, **व्याधिनिवृत्त्यर्थं दाहः कार्यस्तु चोदिते** अत्र तुरप्यर्थकः, स 'चोदिते' इत्यनन्तरं योज्यः, 'चोदिते' इत्यस्य विहिते इत्यर्थः, तथा च 'व्याधिनिवृत्त्यर्थं दाहः कार्यः' इत्येवं विहितेऽपि दाहे, **न ततोऽपि** न विहितादपि दाहकरणात्, **न दोषः** न तापादिदुःखकरत्वलक्षणो दोषः, किन्तु स्यादेव दोषः, यतः **फलोद्देशेन** व्याधिनिवृत्तिलक्षणफलार्थं, **चोदनात्** विधानात्, एवं च

व्याधिनिवृत्त्यर्थं विहिताद् दाहाद् व्याधिनिवृत्तिरपि भवतु, तेन 'विधिना दुःखकरत्वप्रतिषेधाकरणादबाधितेन 'दाहो न कार्यः' इत्यनेन निषेधविधिना दाहस्यानिष्टसाधनत्वमपि प्रतीयतां न कश्चिद् विरोध इति भावः ॥ ४७ ॥ १५९ ॥

दृष्टान्त-दार्ष्टान्तिकयोः साम्यव्यवस्थापनाय दृष्टान्ते योजितं दोषकरत्वं दार्ष्टान्तिकेऽपि योजयति–

**एवं तत्फलभावेऽपि, चोदनातोऽपि सर्वथा ।**
**ध्रुवमौत्सर्गिको दोषो, जायते फलचोदनात् ॥ ४८ ॥ १६० ॥**

**एवमिति**–यथा विहिते दाहे तथेत्यर्थः, **चोदनातोऽपि** क्रत्वङ्गहिंसाविधेरपि, **तत्फलभावेऽपि** भूत्यादिलक्षणविधिबोधितफलसम्भवेऽपि, **सर्वथा** अन्यहिंसातुल्यतया, **ध्रुवम्** अवश्यम्, **औत्सर्गिकः** सामान्यनिषेधविधिबोधितः, **दोषः** प्रकृते पापलक्षणः, **जायते** भवति, कुत इत्यपेक्षायामाह–**फलचोदनादिति**–भूत्यादिलक्षणफलोद्देशेन विधानात्, तथा च या या तृष्णानिमित्तिका हिंसा साऽधर्मजनिकेति अधर्मजनकतावच्छेदकतृष्णामूलकहिंसात्वलक्षणधर्माक्रान्तत्वात् क्रत्वर्थाऽपि हिंसाऽधर्मजनिकेति ।

अत्र प्रश्नोत्तराभ्यां मीमांसकाभिमतयागाङ्गहिंसाऽदोषव्यपोहनमुपाध्यायैर्यथोपदर्शितं तथा सोपस्कारतदुक्तिभिरुपदर्श्यते—"ननु निषेधविधिनाऽनिष्टसाधनत्वमात्रं बोध्यते ? बलवदनिष्टसाधनत्वं वा ? आद्ये–हिंसाविषयिणी निवृत्तिर्निषेधविधिना न भवेत्, यतो यत्रापि पाकादौ प्रवर्तते पुरुषस्तदपि पाकादिकमग्निप्रज्वालनादिव्यापारतो यत्किञ्चित्कष्टेनैव निष्पद्यत इति यत्किञ्चिद्दुःखात्मकानिष्टजनकं भवत्येव, तथा च प्रवृत्तिविषयेऽप्यनिष्टजनकत्वं समस्त्येवेति नानिष्टसाधनत्वज्ञानं निवृत्तिजनकमिति; द्वितीये–दाहमन्तरेणापि प्रकारान्तरेण व्याधिनिवृत्तिरूपेष्टोत्पत्तेः सम्भवेनेष्टोत्पत्तिनान्तरीयकदुःखाधिकतापादिदुःखजनकत्वेन बलवदनिष्टसाधनत्वस्य दाहो न कार्य इति निषेधविधिनाऽवबोधनाद् दाहविषयिणी निवृत्तिरेव स्यात्, न तु व्याधिनिवृत्त्यर्थं दाहः कार्य इति विधिना दाहविषयिणी प्रवृत्तिः, तस्माद् विशेषनिषेधे सति यथा सामान्यविधेर्निषिद्धविशेषेतरसामान्यपरत्वं, तथा विशेषविधौ सति सामान्यनिषेधस्यापि विहितविशेषेतरसामान्यनिषेधपरत्वमेव न्याय्यम्, तथा च यथा व्याधिनिवृत्त्यर्थं दाहः कार्य इत्यनेन विशेषविधिना व्याधिनिवृत्तिफलकदाहलक्षणदाहविशेषे विहिते दाहो न कार्य इति

दाहसामान्यनिषेधस्य व्याधिनिवृत्तिफलकदाहातिरिक्तदाहसामान्यनिषेधपरत्वं, तथा "श्वेतं वायव्यमजमालभेत भूतिकामः" [ ] इति हिंसाविशेषविधायकविधौ सति "मा हिंस्यात् सर्वा भूतानि" इति हिंसासामान्यनिषेधकनिषेधविधेरपि यागीयहिंसाव्यतिरिक्तहिंसासामान्यनिषेधपरत्वमेव न्याय्यम्, एतच्च जैनैरप्यवश्यमभ्युपगन्तव्यं, तथानुपगमे जैनस्यापि सामान्यत आधाकर्मिकादिग्रहणनिषेधे सत्यप्यसंस्तरणादिदशायामाधाकर्मिकादिग्रहणविधानं कथमुपपद्यत इति चेत्? न-आधाकर्मिकग्रहणाग्रहणयोः संयमपालनार्थमेकोद्देशेनैव विधानादुत्सर्गापवादभावव्यवस्थितावपि प्रकृतेऽहिंसायागयोरेकार्थत्वाभावेनोत्सर्गापवादव्यवस्थाया एवायोगात्, एवं च यागीया हिंसा भूत्यादिफलविशेषोद्देशेन क्रियमाणा भूत्यादिफलविशेषजनन्यपि "मा हिंस्यात् सर्वा भूतानि" इत्येवं निषिध्यमाना पापजनिकाऽपीत्येवं विभिन्नोद्देश्यकत्वे विरोधाभावाद्धिंसासामान्यनिषेधस्य यागीयहिंसातिरिक्तहिंसानिषेधरूपतया संकोचस्यान्याय्यत्वात्, तदुक्तं स्तुतिकृता हेमचन्द्रसूरिणाऽन्ययोगव्यवच्छेदद्वात्रिंशिकायाम्-"नोत्सृष्टमन्यार्थमपोद्यते च" इति। ननु यागीयहिंसाऽपि निषिद्धत्वादनिष्टजननी यदि तदा प्रवृत्तिस्तत्र दुर्घटेति चेत्? विज्ञास्तत्र न प्रवर्तन्त एव, मूढानां तु श्येनादाविव तत्रापि दोषादेव प्रवृत्तिः, अत एव साङ्ख्या अपि-

"दृष्टवदानुश्रविकः, स ह्यविशुद्धिक्षयातिशययुक्तः,
तद्विपरीतः श्रेयान्, व्यक्ताव्यक्तज्ञविज्ञानात् ॥ १ ॥"

इत्यत्राविशुद्धिविचारणायां स्वल्पः संकरः सप्रत्यवमर्श इत्यादि वाचस्पतिमिश्रव्याख्यापर्यालोचनतः सामान्यनिषेध-विशेषविधिबोधितानर्थहेतुकत्व-क्रत्वङ्गत्वयोरेकत्र समावेशसंभवात्, निषिद्धस्यापि विहितत्वस्य विहितस्यापि निषिद्धत्वस्य च श्येनादिवदुपपत्तेः; श्येनादाविव ज्योतिष्टोमादौ रागद्वेषादिवशीकृतस्यैवाधिकाराज्ज्योतिष्टोमादीनां दुष्टत्वमेव प्रतिपन्नवन्तः, तथा महाभारते-

"जपस्तु सर्वधर्मेभ्यः, परमो धर्म उच्यते।
अहिंसया हि भूतानां, जपयज्ञः प्रवर्तते॥ १ ॥" इति,

मनुस्मृतावपि—

"जप्येनैव तु संसिद्ध्येद्, ब्राह्मणो नात्र संशयः।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ १ ॥"

इत्यहिंसायाः प्रशंसया हिंसाया दुष्टत्वमेवोक्तम्, तथा उत्तरमीमांसायामप्युक्तम्-

"अन्धे तमसि मज्जामः, पशुभिर्ये यजामहे ।
हिंसा नाम भवेद्धर्मो, न भूतो न भविष्यति ॥ १ ॥" इति,

तथा व्यासेनाप्युक्तम्-

"ज्ञानपालीपरिक्षिप्ते, ब्रह्मचर्यदयाम्भसि ।
स्नात्वा तु विमले तीर्थे, पापपङ्कापहारिणि ।
ध्यानाग्नौ जीवकुण्डस्थे, दममारुतदीपिते ।
असत्कर्मसमित्क्षेपैरग्निहोत्रं कुरूत्तमम् ॥ २ ॥
कषायपशुभिर्दुष्टैर्धर्मकामार्थनाशकैः ।
शममन्त्रहुतैर्यज्ञं, विधेहि विहितं बुधैः ॥ ३ ॥
प्राणिघातात् तु यो धर्ममीहते मूढमानसः ।
स वाञ्छति सुधावृष्टिं, कृष्णाहिमुखकोटरात् ॥ ४ ॥" इत्यादि,

ततो दुष्टमग्निष्टोमादि कर्माधिकारिणाऽपि दोषासहिष्णुना त्याज्यम्, अन्तःकरणशुद्धेरीदृशेन गायत्रीजपादिनैव बाढमुपपत्तेः' इत्याहुः ।

अत्र भाट्टाः-"न क्रत्वर्था हिंसाऽनर्थहेतुः, विधिस्पृष्टे निषेधानवकाशात्, तथाहि-विधिना बलवदिच्छाविषयसाधनतारूपां प्रवर्तनां कुर्वताऽनर्थसाधने तदनुपपत्तेः स्वविषयस्य प्रवर्तनागोचरस्यानर्थसाधनत्वाभावोऽप्यर्थादाक्षिप्यते, तेन विधिविषयस्य नानर्थहेतुत्वं युज्यते, नहि क्रत्वर्थत्वं साक्षाद्विध्यर्थः, येन विरोधो न स्यात्, किन्तु प्रवर्तनयैव, प्रवर्तना तु पुरुषार्थमेव विषयीकुर्वती क्वचित् क्रतुमपि तथाभावमापन्नं विषयीकरोति, इत्यन्यदेतत्, पुरुषप्रवृत्तिश्च बलवदिच्छोपधानदशायां जायमाना न भाव्यस्यार्थहेतुतामाक्षिपति, किन्तु यथा प्राप्तमेवावलम्बते, बलवदिच्छाविषये स्वत एव प्रवृत्तेः स्वर्गादौ विध्यनपेक्षणात्, अत एव विहितश्येनफलस्यापि शत्रुवधरूपाभिचारस्यानर्थहेतुत्वमुपपद्यत एव, फलस्य विधिजन्यप्रवृत्तिविषयत्वाभावात्, विधिजन्यप्रवृत्तिविषयं तु धात्वर्थं करणं प्रवर्तनाऽवगाहते, सा च नानर्थहेतुं विषयीकरोति, इति विशेषविधिबाधितं सामान्यनिषेधवाक्यं रागद्वेषादिमूलाऽक्रत्वर्थहिंसाविषयम्, तेन श्येनाग्निष्टोमयोर्वैषम्यादुपपन्नमदुष्टत्वम्, ज्योतिष्टोमादेर्विधिस्पृष्टस्यापि निषेधविषयत्वे षोडशिग्रहणस्याप्यनर्थहेतुत्वापत्तिः,

"नातिरात्रे षोडशिनं गृह्णाति" [ ] इति निषेधात्, तस्मान्न किञ्चिदेतद् इत्याहुः" ।

प्राभाकरास्तु–"फलसाधने रागत एव प्रवृत्तिसिद्धेर्न नियोगस्य प्रवर्तकत्वम्, तेन श्येनस्य रागजन्यप्रवृत्तिविषयत्वेन विधेरौदासीन्यान्न तस्यानर्थहेतुत्वं विधिना प्रतिक्षिप्यते, अग्नीषोमीयहिंसायां तु क्रत्वङ्गभूतायां फलसाधनत्वाभावेन रागाभावाद् विधिरेव प्रवर्तकः, स च स्वविषयस्यानर्थहेतुतां प्रतिक्षिपति, इति प्रधानभूता हिंसाऽनर्थं जनयति न क्रत्वर्था, इति न हिंसामिश्रितत्वेन दुष्टत्वमग्नीषोमीयादेः" इत्याहुः ।

इदं च मतद्वयं फलतस्तुल्यमेव, इयांस्तु विशेषो यत्–प्राभाकरमते "चोदनालक्षणोऽर्थो धर्मः" [ ] इत्यत्रार्थपदव्यावर्त्यत्वेनाधर्मत्वं श्येनादेः, भाट्टमते तु श्येनफलस्यैवाभिचारस्यानर्थहेतुत्वेनाधर्मत्वम्, श्येनस्य तु विहितस्य समीहितसाधनस्य धर्मत्वमेव, अर्थपदव्यावर्त्यं तु कलञ्जभक्षणादेर्निषिद्धस्यैव, इति फलतोऽनर्थहेतुत्वेन तु शिष्टानां श्येनादौ न धर्मत्वेन व्यवहार इति, तत्र भाट्टमतेऽभिचारः शत्रुवधानुकूलव्यापारः पापरूप एव, इति कथं श्येनस्य नानर्थहेतुत्वम्, इति विधिविषयेऽपि निषेधावकाश एवाऽऽयातः, अनर्थप्रयोजकत्वस्यैव लाघवेन शिष्टप्रयोगानुरोधेन च निषेधविध्यर्थत्वे तु सुतराम्, तस्मादिष्टसाधनत्वमात्रमेव विध्यर्थः, फले उत्कटेच्छाविरहविशिष्टदुःखजनकत्वज्ञानमेव च प्रवृत्तिप्रतिबन्धकम्, इति श्येन इव क्रत्वङ्गहिंसायामपि सामान्यनिषेधवाक्यात् प्रत्यवायजनकत्वबोधेऽपि प्रबलदोषमहिम्ना फले उत्कटेच्छाया अविघातात् प्रवृत्तिरिति न तत्र क्रत्वङ्गत्वानर्थहेतुत्वयोर्विरोधः, इति प्रत्यवायजनकेऽपि प्रवर्तकस्यैतादृशवाक्यस्यार्थशास्त्रत्वमेव न धर्मशास्त्रत्वमिति प्रतिपत्तव्यम् ।

प्राभाकरमतेऽपि श्येनस्य विधिना फलसाधनत्वज्ञापनं विना प्रवृत्त्यविषयत्वात् कथं रागजन्यप्रवृत्तिविषयत्वम्, प्रधानहिंसात्वेनाधर्मजनकत्वेऽन्यहिंसाया अधर्मजनकत्वं न स्यात्, रागप्राप्तहिंसात्वेन तथात्वेऽपि रागप्राप्तत्वं यदि विध्यजन्येच्छाविषयत्वम्, तदा श्येनासङ्ग्रहः, यदि चाङ्गविध्यजन्येच्छाविषयत्वम्, तदा श्येनाङ्गासङ्ग्रहः, गौरवं चेति न किञ्चिदेतत् । एतेन "भाट्टदर्शनमवलम्ब्याभिहितम्–अशुद्धम्" इति चेत् "न शब्दात्" इति बादरायणसूत्रमप्यपास्तम् ॥

नैयायिकास्तु–"इष्टसाधनत्वं कृतिसाध्यत्वं बलवदनिष्टाननुबन्धित्वं च इति त्रयमेव विध्यर्थः, तत्र क्रत्वर्थहिंसायां साक्षान्निषेधाभावात् प्रायश्चित्तानुपदेशाच्चेष्टसाधनत्वकृतिसाध्यत्ववद्बलवदनिष्टाननुबन्धित्वमपि विधिना बोध्यते, इति न तस्या अनर्थहेतुत्वम्, श्येनादेश्चाभिचारस्य साक्षादेव निषेधात् प्रायश्चित्तोपदेशाच्चानर्थहेतुत्वावगमात् तावन्मात्रं तत्र विधिना न बोध्यते, इति सङ्गतं श्येनाग्नीषोमीययोर्वैलक्षण्यम्" इत्याहुः, तदप्यसत्–'क्रत्वङ्गहिंसायामपि सामान्यनिषेधानुरोधेनानर्थहेतुत्वावश्यकत्वात्, तत्प्रायश्चित्तबोधकवेदस्यापि कल्पनात्, सामान्यनिषेधविधिसंकोचे शक्यार्थत्यागेन वेदे लक्षणाश्रयणस्यातिजघन्यत्वात्, अन्यथा "रात्रौ श्राद्धं न कुर्वीत" [ ] इत्यत्रापि नञो भेदवत्परत्वेन गुणविधेः, अधिकारविधेर्वा प्रसङ्गात्, "अमावास्यायां पितृभ्यो दद्यात्" [ ] इत्यादिविधिबोधितश्राद्धजन्यतावच्छेदकपुण्यत्वावान्तरजातिव्यापकजात्यवच्छिन्नं प्रति रात्रीतरश्राद्धकरणस्य कारणत्वेन रात्रिकृतश्राद्धात् फलानुत्पादसंभवात्, अथ तत्रापि विशेषनिषेधे सामान्यविधेस्तदितरपरत्वव्युत्पत्त्या प्रसज्यनञैवोपपत्तौ नञो भेदवत्परत्वं न स्वीक्रियत इति चेत्? तर्हि सामान्यविधेरसङ्कोचानुरोधेन निषेधविधौ विशेषणाभावमात्रविषयत्वं स्वीक्रियतां विकल्प एव वा, यैस्तु तत्र पर्युदासविषयप्राप्ते श्राद्धे रात्रिभिन्नत्वरूपगुणविधानमेव स्वीक्रियते, न तु रात्रिभिन्नामावास्यात्वेन निमित्तत्वम्, विशेषणविशेष्यभावविनिगमनाविरहेणातिगौरवात्, तैरत्रापि सामान्यनिषेधविधावक्रत्वङ्गहिंसात्वेन निमित्तत्वं परित्यज्य क्रत्वङ्गहिंसायां श्येन इव बलवदनिष्टाननुबन्धित्वान्वयपरित्यागमात्रे किं न मनो दीयते, प्रवृत्तेस्तद्वदेवोपपत्तेः, एतेन "तेन रूपेण निमित्तताऽऽर्थिकी, इति न शक्यार्थत्यागः" इत्यपास्तम्, अर्थतः क्रत्वङ्गहिंसायां बलवदनिष्टाननुबन्धित्वस्यैवासिद्धेः, श्येन इव तत्र सामान्यनिषेधबाधादेव तदन्वयात्, 'श्येने तदनन्वयप्रयोजकं तात्पर्यं, क्रत्वङ्गहिंसायां तु न तत्' इति कल्पनागौरवे हिंसारसिकत्वं विनाऽन्यस्य बीजस्याभावात्। अथाग्नीषोमादेः स्वर्गजनकत्वं श्रुतं, तदङ्गहिंसाया बलवदनिष्टानुबन्धित्वं विरुन्ध्यादिति चेत्? श्येनस्याभिचारजनकत्वमपि किं न तथा; श्येनजन्यादृष्टस्य शत्रुवधनरकोभयजनकत्वान्न विरोध इति चेत्? तर्हि क्रत्वङ्गहिंसाजन्यादृष्टस्यापीष्टानिष्टोभयजनकत्वमङ्गीक्रियताम्; एवं सति पुण्यत्व-पापत्वयोः साङ्कर्यमिति चेत्? तदिदं तवैव सङ्कटम्, अस्माकं तु पापानुबन्धिपुण्यविपाकनिमित्ततया श्येनाग्नीषोमादीनामिष्टप्रयोजकत्वमात्राभ्युपगमे न किञ्चिद् बाधकम्; 'यो यद्गतफलार्थितया क्रियते स

तद्गतकिञ्चिदतिशयजनकः' इति नियमात् शत्रुवधार्थितया क्रियमाणं श्येनजन्यादृष्टं पापरूपं शत्रावेव स्वीक्रियत इति चेत्? कथं तर्हि श्येनकर्तुर्नरकावाप्तिः, श्येनध्वंसस्य श्येनव्यापारतायामन्यत्राप्यदृष्टोच्छेदात्, शत्रुनिष्ठपापस्य च भोगेन नाशात्, न चायं नियमोऽपि, कर्मणः समानाधिकरणस्यैवादृष्टस्य जनकत्वात्, तत्तदृदृष्टान्यादृष्टत्वेन समानाधिकरणकर्मजन्यत्वे गौरवात्; एतेन श्येनात् पापद्वयाभ्युपगमोऽपि परास्त इति न किञ्चिदेतत्। ये तु "श्येनेऽपि बलवदनिष्टाननुबन्धित्वं न बाधितान्वयम्, नहि सा हिंसा, अदृष्टाद्वारकमरणोद्देश्यकमरणानुकूलव्यापारस्यैव हिंसात्वात्, गङ्गामरणार्थक्रियमाणत्रिसन्ध्यस्तवपाठवारणाय 'अदृष्टाद्वारक' इति विशेषणम्, कूपकर्तुर्दैवात् कूपपतितगवीहिंसावारणाय 'मरणोद्देश्यक' इति, तथा च श्येनस्यापि न निषिद्धत्वम्" इत्याहुः, तेषां हिंस्राणामपूर्वा हिंसारसिकता, यया श्येनकर्तुरपि वैरिमरणप्रयोजकवज्रपाताद्यकर्तृत्वेन शिष्टत्वमनुमोदितम्, अनर्थप्रयोजकेऽपि निषेधविधिप्रवृत्तौ च प्रतिज्ञाबाध इति; न च तैः पाप्मभिर्हिंसालक्षणं स्वमतेनापि सुष्ठु घुष्टम्, स्वजन्यादृष्टाजन्यत्वस्य मरणविशेषणत्वेऽसंभवात्, कार्यमात्रस्यादृष्टजन्यत्वात्, सामानाधिकरण्येनादृष्टजन्यत्वनिवेशे श्येनातिव्याप्तेः; एतेन "अदृष्टव्यापारसम्बन्धेन स्वाजन्यत्वं तत्" इत्यपि निरस्तम्, प्रतियागप्रतिबद्धश्येनातिव्याप्तेः; न च तत्र मरणोपधायकत्वलक्षणं मरणानुकूलत्वमेव नेति नातिव्याप्तिरिति वाच्यं, खड्गघातेनापि यत्र दैवान्न मरणं तत्राव्याप्त्यापत्तेः; न च तत्रापि पूर्णप्रायश्चित्ताभावान्न हिंसेति वाच्यम्, अर्धप्रायश्चित्तस्यापि हिंसानिमित्तत्वात्; एतेन मरणजनकादृष्टाजनकत्वलक्षणं तद्व्यापारविशेषणमित्यपि निरस्तम्, इतरहिंसाजनकतादृशादृष्टाप्रसिद्धेश्च, मरणोद्देश्यकत्वमपि न मरणत्वप्रकारकेच्छाऽजन्येच्छाविषयत्वम्, धनादिलिप्सया हिंसायामतिव्याप्तेः, किन्तु मरणजनकेच्छाऽविषयत्वम्, तथा च क्रत्वङ्गहिंसायामतिव्याप्तिः, अत एव मरणफलकत्वाबोधकविधिबोधितकर्तव्यताकान्यत्वरूपादृष्टाद्वारकत्वनिवेशेऽपि न निस्तारः; न चाविहितत्वमात्रनिवेशेऽपि निर्वाहः, प्रमादकृतहिंसायामव्याप्तेः, विहितेऽपि श्येनादौ त्वदीयानामपि हिंसाव्यवहारात्, अनेन रूपेण पापजनकत्वे गौरवाच्चेति दिक्। तस्मात् "प्रमादयोगेन प्राणव्यपरोपणं हिंसा" [ तत्त्वार्थसूत्रे ७.८ ] इति महर्षिप्रणीतमेव हिंसालक्षणं सम्यक्, अत्र च प्रमादयोगो यतनाभावः, यतना च जीवरक्षानुकूलो व्यापारः, तत्त्वं च जीवमरणव्यापारविघटकत्वम्, युगमात्रक्षेत्रे सम्यग्नेत्रव्यापाररूपेर्यासमित्यादिना जीवमरणजनकचरणव्यापारादेरनिष्टसाधनत्वेन

निवर्तनादिति बोध्यम्, न च 'मरणानुकूलव्यापारेण' इत्येवास्तु किमधिकेनेति वाच्यम्, अप्रमत्तहिंसायामतिव्याप्तेः; न चैवमप्यनाभोगाविघटनेनाप्रमत्तहिंसाया हिंसात्वापत्तिः, शक्यविघटनत्वस्य व्यापारविशेषणत्वात्; न चैवमप्यनशनादावतिव्याप्तिः, परजीवग्रहणे चात्महिंसायामव्याप्तिरिति वाच्यम्, शुभसङ्कल्पापूर्वकत्वस्य मरणव्यापारविशेषणत्वात्; न चैवं याज्ञिकानामपि क्रत्वङ्गहिंसायां शुभसङ्कल्पान्न दोष इति वाच्यम्, विधिजन्यमोक्षेच्छाया एव शुभसङ्कल्पपदेन ग्रहणात्, अत एव राज्यादिनिदानार्थमनशनमप्यात्महिंसां वदन्ति तान्त्रिकाः; द्रव्यभावोभयहिंसालक्षणं चैतत्, कर्मबन्धजनकता तु प्रकृतिप्रदेशावाश्रित्य प्रमत्तयोगत्वेन, स्थितिरसौ चाश्रित्य क्लिष्टाध्यवसायत्वेन, इत्यन्यत्र विस्तरः। तस्माद् हिंसायामहिंसात्वं समर्थयतां परेषां वेदावलम्बनमपि महतेऽनर्थाय, उक्तं च—

"ये चक्रुः क्रूरकर्माणः, शास्त्रं हिंसोपदेशकम्।
क्व ते यास्यन्ति नरके, नास्तिकेभ्योऽपि नास्तिकाः ॥ १ ॥
वरं वराकश्चार्वाको, योऽसौ प्रकटनास्तिकः।
वेदोक्तितापसच्छद्मच्छन्नं रक्षो न जैमिनिः ॥ २ ॥

[ योगशास्त्रे द्वितीयप्रकाशे श्लो० ३७-३८ ] इति,

वेदाप्रामाण्यं पापकर्मणि प्रवर्तकत्वात्, परपरिगृहीतत्वाच्च विभावनीयम्, इति किमपि हिंस्रेण सह बहुविचारणया। एतदत्र वितती क्रियमाणं ग्रन्थगौरवभयमादधातीत्यतो यथोल्लिखितमेवोपाध्यायसन्मतितरङ्गितमाकलयन्त्वहिंसाधर्मपरायणा विद्वांसः ॥ ४८ ॥ १६० ॥

यथा चोक्तदिशा याज्ञिक-मीमांसकाद्यागमे दृष्टेष्टाभ्यां विरुद्धता तथा आजीवकाद्यागमेऽपीत्याह—

**अन्येषामपि बुद्धयैवं, दृष्टेष्टाभ्यां विरुद्धता।**
**दर्शनीया कुशास्त्राणां, ततश्च स्थितमित्यदः ॥४९॥१६१॥**

**अन्येषामपीति**—एवंजातीयानां स्थूलमत्युल्लसितानां, **कुशास्त्राणाम्** आजीवकादिसम्बन्धिनां शास्त्राभासानाम्, **एवम्** उपदर्शितप्रकारेण, **बुद्धया** सम्यग् विचारणया, **दृष्टेष्टाभ्यां** प्रत्यक्षप्रमाणादि-स्वाभ्युपगमाभ्यां, **विरुद्धता** बाधितार्थता, **दर्शनीया** प्रतिपादनीया, उपदर्शितजातीयत्वस्य दुष्टत्वगमकस्य तेष्वपि भावात्, उक्तार्थसंवादि च कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिवचनमिदम्—

"हिंसादिसंसक्तपथोपदेशादसर्वविन्मूलतया प्रवृत्तेः ।
नृशंसदुर्बुद्धिपरिग्रहाच्च, ब्रूमस्तदन्यागममप्रमाणम् ॥ १ ॥" इति,

उपसंहरति—**ततश्चेति**–जैनागमस्य दृष्टेष्टाभ्यामविरुद्धार्थकत्वेन प्राबल्यादन्यागमानां दृष्टेष्टविरुद्धत्वेन दुर्बलतया तद्बाधितत्वतस्तद्बाधकत्वासम्भवाच्चेत्यर्थः, **इति** एवं पूर्वोक्तम्, **अदः** वक्तृप्रत्यक्षं "स्वभाव एष" इत्यादि, "हिंसादिभ्योऽशुभादि" इत्यादि च, **स्थितम्** अप्रामाण्यज्ञानानास्कन्दितागमप्रमाणसिद्धम् ॥ ४९ ॥ १६१ ॥

तथा चाऽहिंसादिकं सुखादिशुभस्य कारणं, हिंसादिकं च दुःखाद्यशुभस्य कारणमिति प्रतिनियतफलजनकं प्रतिनियतं कर्म सिद्धं सत् स्वकर्तारमनुमापयति, स च कर्ता स्वात्मैवेति निगमयति—

**क्लिष्टं हिंसाद्यनुष्ठानं, न यत् तस्यान्यतो मतम् ।**
**ततः कर्ता स एव स्यात्, सर्वस्यैव हि कर्मणः ॥५०॥१६२॥**

**क्लिष्टमिति**—रौद्राध्यवसायपूर्वकत्वाद् रौद्रमित्यर्थः, **हिंसाद्यनुष्ठानं** प्राणिघातादिकरणम्, इदमुपलक्षणमहिंसाद्यक्लिष्टाचरणस्यापि, **यत्** यस्मात् कारणात्, **तस्य** स्वात्मनः, **अन्यतः** अन्यस्मात्, स्वव्यतिरिक्तव्यापारवत इत्यर्थः, **न मतं** नाभ्युपगतम्, नह्यन्यात्मव्यापारतोऽन्यस्य पुण्यपापाद्यनुष्ठानं भवति देवदत्तगतकायिक-वाचनिक-मानसिकयोगेन यज्ञदत्तानुष्ठानाभावात्, किन्तु देवदत्तयोगतो देवदत्तस्यैव हिंसाऽहिंसाद्यनुष्ठानमित्यर्थः, **ततः** तस्मात् कारणात्, **स एव** अधिकृतात्मैव, **हि** निश्चितम्, **सर्वस्यैव कर्मणः** स्वीयहिताहितकर्ममात्रस्यैव, **कर्ता** स्वतन्त्रकारकः, कर्तृव्याप्यं कर्म भवति, तत् प्रति स्वातन्त्र्यं कारणान्तराप्रयोज्यत्वे सति कारणान्तरप्रयोजकत्वं, तथाविधेन स्वातन्त्र्येण स्वव्याप्यस्य कर्मणो हेतुत्वादात्मैव कर्तेत्यर्थः ।

अत्रेत्थं विवेकमामनन्ति श्रीमन्त उपाध्यायाः—"अत्र निश्चयतोऽपृथग्भावेन स्वव्याप्यस्य रागद्वेषाद्यध्यवसायलक्षणस्य भावकर्मणः परिणामित्वलक्षणस्वातन्त्र्येण कर्तृत्वम्, व्यवहारेण तु संयोगविशेषेण स्वव्याप्यद्रव्यकर्मणि योगव्यापारस्वातन्त्र्येण कर्तृत्वमिति विवेकः" इति ॥ ५० ॥ १६२ ॥

ननु प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते, यच्च यस्येष्टं तदेव तस्य प्रयोजनं, तथा च चेतन आत्मा कर्ता यदेव स्वहितं जानीयात् तत्रैव प्रवर्तेत, स्वतन्त्रस्यास्य न पराधीना प्रवृत्तिर्येन बलात् परेण प्रेरितोऽहितेऽपि प्रवर्तेतेत्यत आह—

**अनादिकर्मयुक्तत्वात्, तन्मोहात् संप्रवर्तते ।**
**अहितेऽप्यात्मनः प्रायो, व्याधिपीडितचित्तवत् ॥५१॥१६३॥**

**अनादी**ति । **से**त्यनुवर्तते, **स** आत्मा, **अनादिकर्मयुक्तत्वात्** व्यक्त्या कर्मणः सादित्वेऽपि प्रवाहतोऽनादित्वात्, कर्मणोऽनादित्वविशेषणेन हि 'अहितप्रवृत्तिः क्लिष्टकर्मणो भवति, तच्च क्लिष्टं कर्माहितप्रवृत्त्यन्तरात्' इत्येवमन्योऽन्याश्रयो न दोषायेति सूच्यते, यदि ययाऽहितप्रवृत्तिव्यक्त्या या क्लिष्टकर्मव्यक्तिरुपजायते तयैव क्लिष्टकर्मव्यक्त्या सैवाहितप्रवृत्तिरुपजायते इत्येवमभ्युपगम्येत तदा तयोरन्योऽन्याश्रय उत्पत्तिप्रतिबन्धकत्वाद् दोषः स्यात्, यतः कार्यकारणभावः कारणस्य पूर्वकालवर्तित्वे कार्यस्योत्तरकालवर्तित्वे च भवति, या चाहितप्रवृत्तिर्येन क्लिष्टकर्मणा जायते सा तत्क्लिष्टकर्मण उत्तरकालीनैव, न तत्पूर्वकालीनेति कथं सा तत्कर्मकारणं, तथा तत्कर्म तत्प्रवृत्तितो जनितं तदुत्तरकालीनमेव, न तत्पूर्वकालीनमिति कथं तत् तत्प्रवृत्तिकारणमिति व्यक्त्योरन्योऽन्यकार्यकारणभावासम्भवात् तथाऽन्योऽन्याश्रयो भवत्युत्पत्तिप्रतिबन्धकः, यदा तु यामहितप्रवृत्तिं प्रति यत् कर्म कारणं तत् कर्म तत्प्रवृत्तिजातीयप्रवृत्त्यन्तरत उपजायते, तत्प्रवृत्तिजातीयप्रवृत्त्यन्तरं च तत्कर्मजातीयकर्मान्तरतो भवति, तदा कार्यकारणभावनियामकपूर्वापरभावतः कार्यकारणभावस्य सम्भवेन नोत्पत्तिप्रतिबन्ध इत्यहितप्रवृत्तिजातीय-क्लिष्टकर्मजातीययोरन्योऽन्याश्रयो न दोषः, यथा बीजादङ्कुरं भवति, अङ्कुराच्च बीजमित्येवं बीजाङ्कुरयोरन्योऽन्याश्रयो न दोषः, तत्रापि बीजाङ्कुरप्रवाहस्यानादित्वान्न बीजाङ्कुरव्यक्त्योरन्योऽन्याश्रयः, किन्तु तज्जातीययोरेवेति नोत्पत्तिः, एवं तज्ज्ञानस्य तज्ज्ञानेन सहान्योऽन्यापेक्षायां व्यक्त्यपेक्षयाऽन्योऽन्याश्रयो ज्ञप्तिप्रतिबन्धकत्वाद् दोषो भवति, जात्यपेक्षयाऽन्योऽन्याश्रयस्तु ज्ञप्त्यप्रतिबन्धकत्वाद् दोषो न भवतीति, तथा च प्रवाहतोऽनादिकर्मयुक्तत्वाद्धेतोरित्यर्थः, **तन्मोहात्** कर्मजनितमौढ्यात्, **आत्मनः** स्वस्य, **अहितेऽपि** नारकादिदुःखजनकहिंसाद्यनुष्ठानेऽपि, **संप्रवर्तते** सम्यक् प्रवर्तते, **प्रायो** बाहुल्येन, कश्चिदेवात्मा न तत्रादरेण प्रवर्तते इति ज्ञापनाय प्रायःपदम्, अत्र निदर्शनमाह–**व्याधिपीडितचित्तव**दिति -रोगाकुलहृदयपुरुषवदित्यर्थः, यथा व्याधिग्रस्तः पुमान् इदमपथ्यमित्येवं जानन् अजानन् वा बहुकालस्थितिकव्याधिमहिम्नाऽपथ्यभक्षण एव प्रवर्तते, तथा संसार्यपि पुरुष इदमहितमित्येवं जानन् अजानन् वा प्रायोऽहित एव कर्मदोषात् प्रवर्तत इति ॥ ५१ ॥ १६३ ॥

प्रसङ्गाद् वार्तान्तरमुपदर्शयति—

**कालादीनां च कर्तृत्वं, मन्यन्तेऽन्ये प्रवादिनः ।**
**केवलानां तदन्ये तु, मिथः सामग्र्यपेक्षया ॥ ५२ ॥ १६४ ॥**

**कालादीनां** चेति—आदिपदात् स्वभाव-नियति-दैव-पुरुषकाराणामुपग्रहः, तथा च काल-स्वभाव-नियति-दैव-पुरुषकाराणामित्यर्थः, **अन्ये प्रवादिनः** स्याद्वाद-वादिभिन्नाः कालादिवादिनः, एकान्तकालादिकारणतावादिन इति यावत्, **केवला-नामि**ति कालादीनां विशेषणं, क्लृप्तस्वव्यतिरिक्तहेतुरहितानामिति तदर्थः, **कर्तृत्वं** असाधारणकारणत्वं, कृतिमत्त्वलक्षणकर्तृत्वस्य कालादिष्वभावात्, **मन्यन्ते** अभ्युप-गच्छन्ति, **तदन्ये तु** एकान्तकालादिकारणत्ववादिभिन्नाः पुनः, अनेकान्तवादिनः पुनरिति यावत्, **मिथः** परस्परं, **सामग्र्यपेक्षया** एकसामग्रीप्रविष्टत्वेन, कर्तृत्वं मन्यन्ते इत्यनुषज्यते, तथा च कालादीनामेकसामग्रीप्रविष्टत्वेन परस्परसहकारि-भावलक्षणं कर्तृत्वमनेकान्तवादिनो मन्यन्ते, तदुक्तं सम्मतिकृता—

"कालो सहाव-णियई पुव्वकयं पुरिसकारणेगंता ।
मिच्छत्तं ते चेव उ समासओ हुंति सम्मत्तं ॥ १५० ॥"

"कालः स्वभाव-नियती पूर्वकृतं पुरुषकारणमेकान्तात् । मिथ्यात्वं त एव तु समासतो भवन्ति सम्यक्त्वम्" इति संस्कृतम् ॥ ५२ ॥ १६४ ॥

तत्र पूर्वं सोपपत्तिकं कालैकान्तकारणतावादिमतमुपदर्शयति—

**न कालव्यतिरेकेण, गर्भबालशुभादिकम् ।**
**यत् किञ्चिज्जायते लोके, तदसौ कारणं किल ॥५३॥१६५॥**

**न कालव्यतिरेकेणे**ति । **गर्भकालशुभादिक**मित्यनन्तरं भवतीति क्रियापदं दृश्यम्, तत्र नञोऽन्वयः, **कालव्यतिरेकेण** कालरूपकारणं विना, **गर्भ-काल-शुभादिकं** स्त्रीपुंससंभोगप्रभवत्वेन पराभिप्रेतस्यापि गर्भस्य जन्मकाल-व्यतिरेकेण न भवति, ननु गर्भो दशममासि मनुष्यादीनामन्येषां च यदा परि-पूर्णतामेति तदा परिपूर्णतापरिणतिमितो गर्भो बहिर्निःसरतीति बालजन्मनि गर्भपरिणतिरेव हेतुरिति चेत् ? न—अपरिणतेऽपि गर्भे कदाचित् सप्तमे कदाचिद-ष्टमे कदाचिन्नवमे मासि कदाचिदन्यदाऽपि जन्मदर्शनेन व्यभिचारेण गर्भपरिणते-र्जन्मनि कारणत्वाभावात्, तथा कालोपाधित्वात् कालतया व्यवह्रियमाणो

जन्यकालोऽपि शीतोष्ण-वर्षादिलक्षणः कालव्यतिरेकेण न भवति, "न कालमन्तरेण गर्भबालशुभादिकम्" इति श्रीहरिभद्रसूरिव्याख्यानतो ज्ञायते–यदुत "गर्भकालशुभादिकम्" इत्यस्य स्थाने "गर्भबालशुभादिकम्" इति तत्सम्मतः पाठः, तत्र बालो नाम जन्मानन्तरं बालावस्थोनषोडशवर्षपरिमिता, साऽपि कालव्यतिरेकेण न भवति, बालावस्था च युवाद्यवस्थान्तराणामप्युपलक्षणम्, अवस्थामात्रस्यैव कालत एव भावात्, अन्यथाऽतिप्रसङ्गात्, तथा **शुभादिकमि**त्यत्रादिपदादशुभस्याप्युपग्रहात् स्वर्ग-नरकादिकमपि कालव्यतिरेकेण न भवति, किं बहूक्तेन। कार्यमात्रं स्वस्यासाधारणधर्मेण गृहीत्वा तत् प्रति कालस्य कारणत्वं न जन्मसहस्रेणापि वक्तुमशक्यमतो जन्यत्वेन सामान्यधर्मेण जन्यमात्रमुपादाय तत् प्रति कालस्य कारणत्वमवसेयमित्याशयेनाह– **यत् किञ्चिदि**ति–यत् किमपि घटादिकं **लोके जायते** लोके प्रादुर्भवति तत् सर्वं कालव्यतिरेकेण न भवति, कालस्य कारणत्वानभ्युपगमे यागादिकर्मानन्तरमेव स्वर्गादिकं भवेत्, दण्डाद्येकैककारणसमवधानानन्तरमेव घटादिकं स्यादिति, **तत्** तस्मात् कारणात्, **असौ** कालः, **किल** इति सत्ये, सत्यं **कारणं** कार्यमात्रं प्रति कारणम्, अन्यस्य त्वन्यथासिद्धत्वादुपचरितमेव कारणत्वं, तन्न सत्यमित्यर्थः ॥ ५३ ॥ १६५ ॥

एतत्समर्थनपरं कार्यमात्रोत्पत्ति-स्थिति-विनाशजनकत्वस्य कालगतस्य प्रतिपादनप्रवणप्राचीनपद्यसमानानुपूर्वीकपद्यमुल्लिखति–

**कालः पचति भूतानि, कालः संहरति प्रजाः ।**
**कालः सुप्तेषु जागर्ति, कालो हि दुरतिक्रमः ॥५४॥१६६॥**

**काल** इति। **भूतानि** उत्पत्तिमन्ति वस्तूनि, **पचति** परिणतिं नयति प्रकृतपर्यायोपचयं करोतीति, तथा कालः **प्रजाः संहरति** प्रजाः पर्यायान्तरेण स्थापयति, प्रकृतपर्यायान्तरपर्यायान्तरभाजः करोतीति यावत्, तथा कालः **सुप्तेषु जागर्ति** आपदमभिरक्षतीति हरिभद्रसूरिः, उपाध्यायस्तु **'सुप्तेषु'** इत्यस्य 'अजनितकार्येषु पराभिमतकारणेषु सत्सु' इति, **जागर्ति** इत्यस्य 'विवक्षितकार्यमुपदधाति' इत्यर्थमाविष्कृतवान्, तथा कालः **हि** निश्चितम्, **दुरतिक्रमः** नान्यथा कर्तुं शक्यः, अर्थात् स्वकार्येषूत्पत्ति-स्थिति-प्रलयेषु अनपलपनीयकारणताकः कालः, उत्पत्ति-स्थिति-प्रलयेषु न कारणमित्येवं न केनाप्यपलपनीयः कालो भवतीति ॥ ५४ ॥ १६६ ॥

उक्तार्थदार्ढ्यायान्यकारणेभ्यः पराभिमतेभ्यः कालस्य विशिष्टं सामर्थ्य-मा‍विष्करोति–

**किञ्च कालादृते नैव, मुद्गपक्तिरपीक्ष्यते ।**
**स्थाल्यादिसन्निधानेऽपि, ततः कालादसौ मता ॥५५॥१६७॥**

**किञ्चे**ति–युक्त्यन्तराभ्युच्चये, **कालादृते** कालमन्तरेण, **नैवे**त्यस्य 'ईक्ष्यते' इत्यनेन सम्बन्धः, **स्थाल्यादिसन्निधानेऽपि** पराभिमतपाकोपयुक्तपाकपात्रादि-रूपकारणसमवधानेऽपि, स्थाल्यादीत्यादिपदेन विलक्षणवह्निसंयोगादिपरिग्रहः, **मुद्गपक्तिरपि** आस्तामन्यत्, मुद्गानां–द्विदलविशेषाणां विलक्षणरूपरसादिलक्षण-विक्लृतिपरिणतिरपि, **नैवेक्ष्यते** नैव दृश्यते, 'इक्ष्यते' इत्यस्य स्थाने 'इष्यते' इति पाठस्तु नातीवोपयुक्तः, दर्शनाभावोपदर्शनेन प्रमाणाभावप्रतिपादनपरत्वेन 'ईक्ष्यते' इत्यस्यैवोपयुक्तत्वात्, **ततः** यत एवं तस्मात्, **असौ** मुद्गपक्तिः, **कालात्मना** कालमात्रजन्याऽभ्युपगता । न च स्थाल्यादिसन्निधानेऽपि मुद्गपक्तिर्यन्नेक्ष्यते तत्र मुद्गपक्तिजनकविलक्षणाग्निसंयोगाभावादेव मुद्गपक्त्यभाव इति वाच्यं, तर्हि मुद्ग-पक्तिजनकविलक्षणाग्निसंयोगः कस्मान्न भवतीत्यपेक्षायां तज्जनककारणान्तरस्यान्वेषणे व्यग्रतापत्तेः, तत्रापि तज्जननकालो नेदानीमतो न विलक्षणाग्निसंयोग इत्यस्यावश्य-वक्तव्यत्वेन तदर्थमावश्यकत्वेन कालस्यैव मुद्गपक्तिजनकत्वमुचितमिति ॥५५॥१६७॥

यदि कालो गर्भादौ कारणं न भवेत्, गर्भादिकं सर्वमव्यवस्थितं स्यादित्यस्या-पाद्यापादकयोर्वैयधिकरण्यादसंभवेऽपि यदि गर्भादिकं कालासाधारणकारणकं न स्यादव्यवस्थितं स्यादिति विपक्षे बाधकमुपदर्शयति–

**कालाभावे च गर्भादि, सर्वं स्यादव्यवस्थया ।**
**परेष्टहेतुसद्भावमात्रादेव तदुद्भवात् ॥ ५६ ॥ १६८ ॥**

**कालाभावे चे**ति–कालस्य कार्यमात्रं प्रत्यसाधारणत्वानङ्गीकारे चेत्यर्थः, ततः किमित्यपेक्षायामाह-**गर्भादि सर्वमि**ति, **अव्यवस्थया स्यात्** अनियमेन भवेत्, तत्र हेतुः-**परेष्टहेतुसद्भावमात्रादेव तदुद्भवादि**ति–पराभिमत-मातापित्रादिकारणसमवधानमात्रादेवाविलम्बेन गर्भाद्युत्पादापत्तेरित्यर्थः ।

ननु कालस्यैकस्यैव कार्यमात्रं प्रति कारणत्वे तस्य सर्वदा भावात् तन्मात्रकारण-कस्य कार्यमात्रस्यैव युगपदुत्पत्तिप्रसङ्गतोऽव्यवस्था दुरुद्धरा, यदि च तत्तत्कार्ये

तत्तदुपाधिविशिष्टस्य कालस्य हेतुत्वमिति तत्तदुपाधीनां युगपदसन्निधानान्न युगपत् सर्वकार्योत्पत्तिप्रसङ्गः, तदा कालवैचित्र्यनियामकतयोपाधिविशेषाणामवश्याभ्युपगन्तव्यत्वेन तेषां प्रतिनियतानां प्रतिनियततत्तत्कार्यकारणत्वमावश्यकमिति गतं कालमात्रकारणत्ववादेनेति चेत् ?, अत्र नव्याः—"क्षणात्मकः कालोऽतिरिक्त एवाभ्युपेयो न तु काले स्वजन्यविभागप्रागभावविशिष्टकर्मण उपाधित्वमुपगम्य तद्विशिष्टस्य कालस्य क्षणरूपत्वं, तथा सति विभागकाले स्वजन्यविभागप्रागभावाभावेन तद्विशिष्टकर्मलक्षणोपाध्यभावात् तद्विशिष्टकाललक्षणक्षणस्याप्यभावात् तदानीं तत्क्षणनिमित्तककार्याभावापत्तेः, तदानीं स्वजन्यपूर्वसंयोगनाशप्रागभावावच्छिन्नविभागविशिष्टकर्मण उपाधित्वमभ्युपगम्य तद्विशिष्टकालस्य क्षणरूपताश्रयणेऽननुगमप्रसङ्गात्, अतिरिक्तक्षणरूपाणां कालानामानन्त्येन प्रतिनियतस्य क्षणस्य तत्क्षणवृत्तिकार्ये तत्पूर्वक्षणत्वेन कारणत्वं, तत्क्षणवृत्तित्वं च यथा तत्क्षणभिन्ने कार्यान्तरे तथा स्वस्मिन्नपि, 'इदानीं घटः, इदानीं पटः' इत्यादिव्यवहारवत् 'इदानीं क्षणः' इत्यपि व्यवहारात् कालिकसम्बन्धेनाधाराधेयभावस्य स्वस्मिन्नपि सम्भवात्, तथा च तत्तत्क्षणानां तन्नाशानां च तत्तत्क्षणवृत्तित्वरूपकार्यतावच्छेदकधर्माक्रान्तत्वेन तत्तत्पूर्वक्षणजन्यत्वान्न क्षणिकत्वानुपपत्तिः, उक्तदिशा कार्यकारणभावव्यवस्थितौ च क्षणिकेनैवं क्षणेन कार्यविशेषस्योत्पत्तिसंभवान्नातिरिक्तहेतुसिद्धिः, न च तत्क्षण एव तन्तौ पट उत्पद्यते कपाले च घट उत्पद्यत इति देशनियमार्थं समवायेन पटादिकं प्रति तादात्म्येन तन्त्वादिकं कारणमिति क्षणव्यतिरिक्तकारणसिद्धिरिति वाच्यम्,

"नित्यसत्त्वा भवन्त्येके, नित्यासत्त्वाश्च केचन ।
विचित्राः केचिदित्यत्र, तत्स्वभावो नियामकः ॥ १ ॥"

इति स्वभाववादिना कादाचित्कत्वस्य स्वभावनियम्यत्वमुपेयते, तत्रैवम्—

"वह्निरुष्णो जलं शीतं, समस्पर्शस्तथाऽनिलः ।
केनेदं रचितं तस्मात्, स्वभावात् तद्व्यवस्थितिः ॥"

इति तदीयवचनमवलम्ब्य स्वभावादेव प्रतिनियतदेशवृत्तित्वलक्षणस्य क्वाचित्कत्वस्य नित्य इवानित्येऽपि स्वभावत एव संभवात्, हेतु-हेतुमतोः पूर्वापरीभावनिमित्तकस्य प्रतिनियततत्तत्क्षणवृत्तित्वरूपस्य कादाचित्कत्वस्यैव हेतुनियम्यत्वादन्यत्र देशेऽन्यापत्तेरभावात्, ननु यथा तत्क्षणवृत्तिकार्ये तत्पूर्वक्षणस्य नियतपूर्ववर्तित्वं तथा समवायादिकारणान्तराणामपीति कथं तेषां कारणत्वप्रतिक्षेप इति चेत् ?, नहि

नियतपूर्ववर्तित्वमात्रं कारणत्वं, किन्तु अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वं, तत्र अवश्यक्लृप्तनियतपूर्ववर्तिन एव कार्यत्वसंभवे तद्भिन्नत्वमन्यथासिद्धिरिति कार्यं प्रति अवश्यक्लृप्तनियतपूर्ववर्तिनः पूर्वक्षणादेव तदुत्तरक्षणवर्तिनः कार्यस्य सम्भवे सति तद्भिन्नत्वादन्येषामन्यथासिद्धत्वेन तच्छून्यत्वाभावात् कारणत्वासम्भवात्, तथा च पूर्वक्षणभिन्नानामन्येषामन्यथासिद्धत्वात् कारणत्वाभावेऽपि प्रयोजकत्वं भवत्येवेति ततो देशप्रतिनियम उपपद्यते, अत एव न पटत्वाद्यवच्छिन्नस्याकस्मिकत्वापत्त्या तदवच्छिन्नं प्रति हेतुतासिद्धिः, एतावत्सत्त्वेऽवश्यमेतद्धर्मावच्छिन्नस्योत्पत्तिरिति निश्चयाविषयत्वमेवाऽऽकस्मिकत्वं, तत एव च तद्धर्मावच्छिन्नं प्रतीष्टसाधनताज्ञानाभावात तत्कारणसङ्घटने प्रवृत्त्यनुपपत्तिः, तत्र च कृतिसाध्यताज्ञानाभावात् तदुत्पत्तये प्रवृत्त्यनुपपत्तिः, न चैवं प्रकृते, पूर्वक्षणेतरेषां कारणत्वाभावेऽपि प्रयोजकत्वस्य सद्भावेन तदवच्छिन्ननियतपूर्ववर्तित्वनिश्चयादेतावत्सत्त्वेऽवश्यं पटोत्पत्तिरिति निश्चयादेवाऽऽकस्मिकत्वपरिहारेणोक्तनिश्चयत एव कृतिसाध्यताज्ञानसम्भवेन तद्धर्मावच्छिन्ने प्रवृत्तिसम्भवात्, अनन्यथासिद्धत्वानिवेशप्रयुक्तलाघवेनेष्टप्रयोजकताज्ञानमेव कार्यार्थमुपादानादिसङ्घटनविषयकप्रवृत्तिहेतुरिति क्षणेतरेष्वपीष्टप्रयोजकताज्ञानसद्भावात् प्रवृत्त्युपपत्तेः, इदमेतावत्कारणजन्यमित्यप्रामाणिकव्यवहारानुपपत्तिलक्षणमाकस्मिकत्वं तु न बाधकम्, प्रयोजकेऽपि दोषात् कारणत्वभ्रमेणाप्रामाणिकव्यवहारस्य सम्भवेन तदनुपपत्तेरभावात्, पूर्वक्षणेतरेषां कारणत्वानभ्युपगमनमेव युक्तम्, अनन्तनियतपूर्ववर्तिष्वनन्यथासिद्धत्वाकल्पनेन लाघवाद्" इत्याहुः ॥ ५६ ॥ १६८ ॥

॥ इति कालवादः ॥

---

## अथ स्वभाववादः ॥

अथ स्वभावैकान्तकारणतावादिमतमुपदर्शयति-

**न स्वभावातिरेकेण, गर्भबालशुभादिकम् ।**
**यत् किञ्चिज्जायते लोके, तदसौ कारणं किल ॥ ५७ ॥ १६९ ॥**

**न स्वभावातिरेकेणेति**-नञो 'जायते' इत्यनेनान्वयः, स्वभावातिरेकेण-स्वभावमन्तरेण स्वभावमुल्लङ्घ्येति यावत्, **यत्** यस्मात् कारणात्, **गर्भ-बाल-शुभादिकमि**त्यत्रादिपदान्नारकाद्यशुभकार्यपरिग्रहः, **किञ्चित्** किमपि, कार्यं जन्यम्, **लोके** भुवनत्रयेऽपि, **न जायते** नैवोत्पद्यते, **तत्** तस्मात् कारणात्,

**किल** सत्यम्, **असौ** स्वभावः, **कारणं** सर्वकार्यगतकादाचित्कत्वनियामकः, यथा च नित्यानामाकाशत्वादीनां प्रतिनियताकाशादिदेशवृत्तित्वरूपं क्वाचित्कत्वं स्वभावनियम्यमेव, न तु स्वभावेतरनियम्यं, गगनादिभिन्ने आकाशत्वादेः सत्त्वे तस्य गगनादिस्वभावत्वमेव न स्यादित्याकाशत्वादेर्गगनादिभिन्नदेशवृत्तित्वे बाधकम्, तथा घटादीनां पूर्वापरकालावृत्तित्वे सति वर्तमानकालवृत्तित्वात्मकप्रतिनियत-कालवृत्तित्वरूपकादाचित्कत्वमपि स्वभावनियम्यमेव, न तु स्वभावेतरनियम्यम्, घटादिजन्यभिन्ने नित्ये गगनादौ कादाचित्कत्वस्य सत्त्वे तस्य घटादिस्वभावत्वमेव न स्यादिति कादाचित्कत्वस्य गगनादिवृत्तित्वेऽपि बाधकं समस्त्येव; ननु घटादीनां नियतपूर्वोत्तरावधिकत्वे सत्येव कादाचित्कत्वस्वभावो भवितुमर्हति नान्यथेति योऽसावस्य नियमेन पूर्वोऽवधिः स नियतपूर्ववर्तित्वात् कारणमेवेति चेत्? न–तद्गतोपकारजनकस्यैव तत्कारणत्वात्, अन्यथाऽतिप्रसङ्गादित्यवधेर्नियतपूर्ववर्तित्वेऽपि तद्गतोपकाराजनकत्वेन तदकारणत्वात्; ननु घटस्य भवनस्वभावत्वे तद्दिन इव तत्पूर्वदिनेऽपि भवनं स्यात्, एवं तत्पूर्वपूर्वदिनेऽपीत्यनादित्वं स्यात्, अनादेश्च भावस्य नाशासम्भवान्नित्यत्वं स्यात्, तत्पूर्वदिनेऽभवनस्वभावत्वे तद्दिनेऽप्यभवन-स्वभावसद्भावान्न जायेतेत्युभयथाऽपि कादाचित्कत्वस्वभावक्षतिरिति चेत्?, न–तदहरेवानेन घटेन भवितव्यमित्येवं तदहर्घटितभवनस्वभावस्यैव तस्याभ्युपगमात्, तदहश्च नान्यदा समस्तीति तद्घटितभवनस्वभावोऽपि नान्यदेत्यन्यस्मिन् दिने तद्भवनापत्त्यसम्भवात्। अथवा स्वभावः कार्यमात्रे कारणमिति कारणमित्यस्य मुख्य एवार्थः, उपादानात्मककारणस्वभावस्यैवोपादेयात्मककार्यगतस्वभावरूपोपकारजनक-स्योपादेयहेतुत्वात्; न चोपकारात्मकेऽपि कार्ये स्वभावस्य जनकत्वं तदा भवेद् यदि तद्गतोपकारजनकत्वं स्यादेवं तद्गतोपकारजनकत्वमपि तदा स्याद् यदि तद्गतोपकार-लक्षणकार्यगतोपकारजनकत्वं स्यादित्यनवस्था प्रसज्येतेति वाच्यं, तस्य स्वत एवोप-कृतत्वेन तद्गतोपकारजननमन्तरेणैव स्वभावस्य तज्जनकत्वसम्भवात्, तथा च दण्डरूपादीनां घटोत्पत्तेः पूर्वं नियमेन भावान्नियतपूर्वावधित्वेऽपि अन्यथासिद्धत्वा-देव न कारणत्वं, तथा दण्डादीनामपि नियतपूर्वावधित्वेऽप्यवश्यक्लृप्तनियतपूर्ववर्ति-स्वभावभिन्नत्वेनान्यथासिद्धत्वादेव न कारणत्वम्, यथा चेन्धनस्य पाकं प्रति कारणत्वाभावेऽपि प्रयोजकत्वमुपादाय "इन्धनात् पाकः" इति व्यवहारः, तथा दण्डस्य घटं प्रति कारणत्वाभावेऽपि घटं प्रति प्रयोजकत्वमवलम्ब्य दण्डाद् घट इति व्यवहार इति न व्यवहारबाधोऽपीति ॥ ५७ ॥ १६९ ॥

एतदेव भावयति–

**सर्वे भावाः स्वभावेन, स्वस्वभावे तथा तथा।**
**वर्तन्तेऽथ निवर्तन्ते, कामचारपराङ्मुखाः ॥ ५८ ॥ १७० ॥**

**सर्वे भावा** इति–अत्र 'सर्वभावाः' इति समस्तोऽपि पाठः, अर्थे तु न भेदः, सर्वे पदार्थाः सर्वपदार्था इत्यर्थयोर्वस्तुत ऐक्यात्, **स्वभावेन** आत्मीयया सत्तया, स्वगतेन हेतुगतेन वा निमित्तेनेत्युपाध्यायाः, यदा कारणमिति पूर्वपद्यगतस्य कादाचित्कत्वनियामक इत्यर्थस्तदा स्वगतेन निमित्तेनेत्यर्थः, यदा तु कारणमित्यस्य मुख्योऽर्थः परिगृह्यते तदा हेतुगतेन निमित्तेनेत्यर्थोऽवसेय इति तदभिप्रायः, **स्वस्वभावे** आत्मीयाऽऽत्मीयभावे, आत्मीयाऽऽत्मीयसत्तायामिति यावत्, **तथा तथा** तेन तेन प्रकारेण, विशिष्टप्रतिनियतसंस्थानादिरूपेणेति यावत्, **वर्तन्ते** भूत्वा तिष्ठन्ति, यथा स्वभावेनैव भूत्वा तिष्ठन्ति तथा स्वभावेनैव नाशकाले **निवर्तन्ते** नाशभाजो भवन्ति; किंभूतास्ते भावा इत्यपेक्षायामाह–**कामचारपराङ्मुखा** इति–अनियतभावनिरपेक्षा इत्यर्थः ॥ ५८ ॥ १७० ॥

हेत्वन्तरे कामचारं स्वभावस्य सामर्थ्यं च प्रकटयति–

**न विनेह स्वभावेन, मुद्गपक्तिरपीष्यते।**
**तथा कालादिभावेऽपि, नाश्वमाषस्य सा यतः ॥ ५९ ॥ १७१ ॥**

**न विनेहे**ति। इह जगति, **स्वभावेन विना** तथायोग्यतालक्षणस्वभावमन्तरेण, **तथा कालादिभावेऽपि** अभीष्टकालादिसन्निधानेऽपि प्रतिनियतकालव्यापारादिघटितसामग्रीसमवधानेऽपि, **मुद्गपक्तिरपि** मुद्गाख्यद्विदलविशेषपाकोऽपि, **नेष्यते** नेष्टः, प्रतिनियतकालव्यापारादिसामग्रीसमवधाने इष्टस्य मुद्गपाकस्य कुतो नेष्टत्वमित्यपेक्षायामाह–**नाश्वमाषस्य सा यत** इति–तथाकालादिभावेऽपीति घण्टालोलन्यायेनोभयत्रान्वेति, यतः–यस्मात् कारणात्, अश्वमाषस्य–कङ्कुटकस्य, सा–पक्तिः, प्रतिनियतकालव्यापारादिसामग्रीसमवधानेऽपि तथायोग्यतालक्षणस्वभावाभावान्न भवतीत्यर्थः, यावता कालेन मुद्गादिपाको जायते तावान् कालोऽपि तत्र वर्तते, यया क्रियया विलक्षणाग्निसंयोगोऽन्यत्र तया क्रियया विलक्षणाग्निसंयोगजननयोग्ययाऽश्वमाषे विलक्षणाग्निसंयोगो न भवतीत्यस्य वक्तुमशक्यत्वेन विलक्षणाग्निसंयोगादिकमपि तत्र वर्तत एव, एवमपि पाकाभावोऽश्व-

माषस्य तथायोग्यतालक्षणस्वभावाभावादेवेति; न च कार्यमात्रं प्रत्यदृष्टमपि कारणमिति तद्वैगुण्यादेव तत्र पाकाभाव इति वाच्यम्, दृष्टसाद्गुण्येऽदृष्टवैगुण्याभावात्, एवमप्यदृष्टवैगुण्याभ्युपगमे दृढदण्डनुन्नमपि चक्रमदृष्टवैगुण्यान्न भ्राम्येत्, तस्मात् स्वभाववैषम्यादेव कङ्कुटकपाकाभाव इत्यन्यत्र तत्समवधाने भवति न भवतीत्येवं कामचारात् स्वभाव एव कारणमिति ॥ ५९ ॥ १७१ ॥

स्वभावादेव कार्यभाव इत्यस्य दार्ढ्यायातत्स्वभावात् कार्याभ्युपगमे बाधकमुपदर्शयति–

**अतत्स्वभावात् तद्भावेऽतिप्रसङ्गोऽनिवारितः ।**
**तुल्ये तत्र मृदः कुम्भो, न पटादीत्ययुक्तिमत् ॥६०॥१७२॥**

**अतत्स्वभावादि**ति–तत्स्वभावभिन्नात् तत्स्वभावरहिताद् वा कारणादित्यर्थः, तद्भावे विवक्षितकार्योत्पादे, अङ्गीक्रियमाणे इति शेषः, **अतिप्रसङ्गः** अतिप्रसङ्गात्मकानिष्टप्रसङ्गदोषः, **अनिवारितः** निवारयितुमशक्यः, अर्थादबाधितः स्यात्, तत्र हेतुः–तुल्य इत्यादि । **तुल्ये** समाने, **तत्र** अतत्स्वभावत्वे, **मृदः कुम्भो न पटादि** मृदा घटो जायते, पटादि न जायते, **इति** एवम्, **अयुक्तिमत्** युक्तिरहितं नियामकरहितमिति यावत्, स्यादेतत्–'यद्यतत्स्वभावत्वं' तज्जननप्रयोजकमिष्येत तदा घटं प्रति यथाऽतत्स्वभावत्वं मृदस्तथा पटादिकं प्रत्यपीति मृदो घटोत्पत्तिवत् पटाद्युत्पत्तिरपि स्यात्, न चैवम्, किन्तु सामग्रीमेव कार्यजनिकामुररीकुर्मः, अश्वमाषस्य च पाकं प्रति स्वरूपयोग्यतैव नास्तीति न तस्य पाक इति चेत्?, अत्र वदन्ति स्वभाववादिनः—अन्तरङ्ग-बहिरङ्गयोर्मध्येऽन्तरङ्गस्यैव बलीयस्त्वात् कारणत्वमिति स्वभावस्यैवान्तरङ्गत्वात् कार्यहेतुत्वं, न तु स्वभावभिन्नानां बहिरङ्गत्वात्; न च मृत्स्वभावो यथा घटस्तथा शरावादिरपीति घट-शरावादीनां सर्वेषामपि मृत्स्वभावाविशेषादविशेषप्रसङ्ग इति वाच्यं, स्वस्य भावः कार्यजननपरिणतिः स्वभाव इति कथ्यते, कार्यजननपरिणतिश्च कार्यैकगम्या, तथा च यदा घटो जायते तदा घटजननपरिणतिर्मृत्स्वभावः, यदा शरावो जायते तदा शरावजननपरिणतिर्मृत्स्वभाव इत्येवं स्वभावभेदान्न घटादिकार्याविशेषप्रसङ्गः, न चेदेवम्, अङ्कुरजननस्वभावं बीजं सर्वदैवास्तीति सहकारिमध्यमध्यासीनं बीजं, यथाऽङ्कुरं जनयति तथा केवलमपि जनयेदिति सहकार्यसमवधानेऽपि अङ्कुरजननस्वभावाद् बीजादङ्कुरोत्पादप्रसङ्गः; अङ्कुरं प्रति बीजस्य बीजत्वेन कारणत्वेऽपि

सहकारिसमवधानासमवधानाभ्यां ततः कार्यजननाजनने उपपत्स्येते इति चेत् ? न–स्वभावस्य कार्यजननपरिणतिलक्षणस्य कार्यैकगम्यस्याङ्कुरोत्पादाव्यवहितपूर्वक्षण एव बीज एव भाव इति तादृशस्वभाववत्त्वाद् बीजान्तरतो विलक्षणं यद् बीजं तद्विलक्षणबीजत्वेनैवाङ्कुरहेतुत्वौचित्यात्, स्वभाववादे विलक्षणबीजसद्भावेऽङ्कुर-जननं, विलक्षणबीजासद्भावेऽङ्कुराजननमित्युपपत्तेस्तत्र सहकारिलाभालाभयोरनाश्र-यणात्; न चाङ्कुरजननपरिणतिलक्षणवैलक्षण्यं यद्बीजस्य बीजान्तरतोऽतिशय-स्तदाधायकत्वं सहकारिचक्रस्य स्वभाववादिनाऽपि कल्पनीयम्, ततो वरं सहकारि-चक्रस्य तत्कार्यजनकत्वमेवेति वाच्यम्, पूर्वपूर्वोपादानपरिणामानामेवोत्तरोत्तरो-पादेयपरिणामहेतुत्वात्, उत्तरोत्तरोपादेयपरिणामं प्रति पूर्वपूर्वोपादानपरिणाम-हेतुत्वादेव चोपपत्तौ कालस्यापि तत्र कारणत्वानभ्युपगमेन कालवादस्याप्रवेशात्; न च चरमक्षणपरिणामरूपबीजादाद्यक्षणपरिणामरूपाङ्कुरस्यैवोत्पत्तिर्न तु द्वितीया-दिक्षणपरिणामरूपाङ्कुराणां, तेषां पूर्वपूर्वाङ्कुरपरिणामत एवोत्पत्तेरिति चरमक्षणपरि-णामरूपबीजस्यापि द्वितीयादिक्षणपरिणामरूपाङ्कुराजनकत्वाद् व्यक्तिविशेषमवल-म्ब्यैव बीजाङ्कुरयोः कार्यकारणभावो वाच्यः, अन्यथा चरमक्षणपरिणामरूपबीज-स्यापि द्वितीयादिक्षणपरिणामरूपाङ्कुरादौ व्यतिरेकव्यभिचारेणाङ्कुरत्वावच्छिन्नं प्रति विलक्षणबीजत्वेन कारणत्वस्यासम्भवात्, प्रथमादिचरमपर्यन्ताङ्कुरक्षणे-ष्वतद्व्यावृत्तिलक्षणव्यावृत्तिविशेषमभ्युपगम्य तदवच्छिन्नं प्रति चरमबीजक्षणाद्यु-पान्त्याङ्कुरक्षणपर्यन्तेष्वतद्व्यावृत्तिलक्षणव्यावृत्तिविशेषमुररीकृत्य तदवच्छिन्नस्य हेतु-त्वेऽङ्गीक्रियमाणे कार्यकारणतावच्छेदककोटावेकैकक्षणप्रवेशाप्रवेशाभ्यां विनिगमना-विरहेणानन्तगुरुधर्मावच्छिन्नकार्यकारणभावप्रसङ्गात्, एवं च व्यक्तिविशेषमवलम्ब्य कार्यकारणभावे अङ्कुरजातीयात् कार्याद् बीजजातीयकारणानुमानभङ्गप्रसङ्ग इति वाच्यं, चरमक्षणपरिणामरूपबीजकार्याद्यङ्कुरसादृश्यतिरोहितवैसादृश्येनाङ्कुरादिना चरमक्षणपरिणामरूपबीजसादृश्यतिरोहितवैसादृश्यानां बीजादीनामनुमानसम्भ-वात्, यदि बीजं विनाऽप्यङ्कुरं स्याद् बीजप्रयोज्यं न स्यादित्येवं विपक्षबाधकतर्कस्य प्रयोज्यप्रयोजकभावमूलकस्य सद्भावात्। आद्याङ्कुरकारणीभूतचरमक्षणपरिणामरूप-बीजोपादानपूर्वपूर्वबीजक्षणानामपि परम्पराकारणत्वेन चरमक्षणपरिणामरूपबीज-कार्याद्याङ्कुरोपादेयोत्तरोत्तराङ्कुरप्रयोजकत्वात्, ततः स्वभावहेतुकमेव जगदिति सिद्धम्, तदुक्तम्—

"कः कण्टकानां प्रकरोति तैक्ष्ण्यं, विचित्रभावं मृग-पक्षिणां च ।
स्वभावतः सर्वमिदं प्रवृत्तं, न कामचारोऽस्ति कुतः प्रसङ्गः ? ॥ १ ॥"

इति ॥ ६० ॥ १७२ ॥

॥ इति स्वभावैकान्तकारणतावादः ॥

---

## अथ एकान्तनियतिरूपकारणतावादः ॥

अथ नियतिवादिमतमुपदर्शयितुमाह—

**नियतेनैव रूपेण, सर्वे भावा भवन्ति यत् ।**
**ततो नियतिजा ह्येते, तत्स्वरूपानुवेधतः ॥ ६१ ॥ १७३ ॥**

**नियतेनैव रूपेणेति**–अन्यूनानतिरिक्तेनैव रूपेण, सजातीयविजातीय-व्यावृत्तेन स्वभावानुगतेनैव रूपेणेति यावत्, **सर्वे भावाः** पदार्थाः, **भवन्ति** उत्पद्यन्ते, **यत्** यस्मात् कारणात्, **तत्** तस्मात्, **हि** निश्चितम्, **एते भावाः** सजातीय-विजातीयव्यावृत्तस्वभावानुगतरूपवन्तो भावाः, **नियतिजाः** नैयत्य-नियामकतत्त्वान्तरसमुद्भवाः, नियतिजत्वे हेत्वन्तरमाह–**तत्स्वरूपानुवेधत** इति–नियतिप्रयुक्तप्रतिनियतधर्मोपश्लेषात्, अत एव तीक्ष्णशस्त्राद्युपहतानामपि मरण नियतताया अभावे न मरणं, किन्तु जीवननियततया जीवनमेव दृश्यत इति ॥ ६१ ॥ १७३ ॥

इदमेव स्फुटीकरोति–

**यद् यदैव यतो यावत्, तत् तदैव ततस्तथा ।**
**नियतं जायते न्यायात्, क एतां बाधितुं क्षमः ॥ ६२ ॥ १७४ ॥**

**यदिति । यद्** घटादिकं वस्तु, **यदैव** यस्मिन्नेव काले, **यतः** यस्माद् **दण्डादिकारणात्, यावत्** यावत्परिमाणमल्पदेशव्यापि बहुदेशव्याप्युत्पद्य-मानमनुभूयते, **तत्** घटादिकं वस्तु, **तदैव** तस्मिन्नेव काले, **ततः** दण्डादि-कारणात्, **तथा** तावत्परिमाणमल्पदेशव्यापि बहुदेशव्यापि वा, **नियतं** नियति-कृतम्, **जायते** उत्पद्यते, **न्यायात्** तर्कात्, **कः** पुरुषः, ईश्वरोऽपि वा, **एतां** नियतिं, **बाधितुम्** अन्यथा कर्तुं, **क्षमः** समर्थः, प्रमाणसिद्धार्थस्यान्यथा-करणादिलक्षणबाधासम्भवात्, सजातीयविजातीयव्यावृत्तनियतरूपावच्छिन्नं प्रति

नियतेरेव कारणत्वात्, उपदर्शितनियतरूपस्य किञ्चिन्निष्ठकारणतानिरूपितकार्यतानवच्छेदकत्वे प्रतिनियतदेशकत्वाभावलक्षणमाकस्मिकत्वं स्यात्, घटाद्यसाधारणनिरुक्तधर्मस्य पटादावप्यापत्तेः; न च विभिन्नसामग्रीजन्यतावच्छेदकानेकधर्मसङ्घटितमूर्तिकत्वलक्षणार्थसमाजसिद्धत्वात् तावद्धर्मकत्वलक्षणप्रतिनियतरूपवत्त्वं न कस्यचिज्जन्यतावच्छेदकमिति वाच्यम्, नियतिरूपैककारणजन्यतयैव तावद्धर्मकत्वावच्छिन्नस्योपपत्तावर्थसमाजाकल्पनात्, भिन्नसामग्रीजन्यत्वे विभिन्नत्वमेव स्यादेकवस्तुत्वं व्याहन्येत, तदुक्तम्–

"प्राप्तव्यो नियतिबलाश्रयेण योऽर्थः, सोऽवश्यं भवति नृणां शुभोऽशुभो वा ॥
भूतानां महति कृतेऽपि हि प्रयत्ने, नाभाव्यं भवति न भाविनोऽस्ति नाशः ॥ १ ॥"

इति, ॥ ६२ ॥ १७४ ॥

नियतेरेव सामर्थ्यमुपदर्शयति–

**न चर्ते नियतिं लोके, मुद्गपक्तिरपीक्ष्यते ।**
**तत्स्वभावादिभावेऽपि, नासावनियता यतः ॥ ६३ ॥ १७५ ॥**

**न चर्ते** इति । **न च** इत्यस्य 'ईक्ष्यते' इत्यनेनान्वयः, **ऋते नियतिं** निरुक्तलक्षणां नियतिं विना, **मुद्गपक्तिरपि** मुद्गपाकोऽपि, **न चेक्ष्यते** न चानुभूयते, **तत्स्वभावादिभावेऽपि यतो** मुद्गपाकजनकस्वभावव्यापारादिसद्भावेऽपि, **न** नैव, **असौ** मुद्गपाकः, **अनियता** किन्तु स्वरूपनियतैव, स्वभावस्य कार्यैकजात्यप्रयोजकत्वेन तदप्रयोज्यस्य मुद्गपाकनैयत्यस्य नियतिप्रयोज्यतैव, अतिशयरूपस्यापि स्वभावस्य पाकविशेष एव प्रयोजकत्वं पाकान्तरसाजात्यवैजात्योभयानुवेधस्तु नियतिं विना न संभवतीति । हेतुर्व्यक्तिमेवोत्पादयति, तत्र साजात्यवैजात्योभयानुवेधस्तु समवायादिलक्षणतत्त्वान्तरसम्बन्धादिति चेत् ? न,–'समवायाद्यात्मकातिरिक्तसम्बन्धस्य प्रमाणाभावतोऽभावेन तेन सन्बन्धेन साजात्यवैजात्योभयानुवेधासंभवात्, समवायादेरभ्युपगमेऽपि वा तत्साजात्यवैजात्ययोस्तत्रैव समवायो नान्यत्रेत्यत्र नियामकस्य गवेषणीयत्वात्, तत्समवायादेरेव प्रतिनियतदेश एव कस्यचित् सम्बन्धस्य बलात् सत्त्वे तस्यापि सम्बन्धान्तरस्य प्रतिनियतदेश एव सत्त्वे नियामकसम्बन्धान्तरान्वेषणेऽनवस्थापातात्; किञ्च यत्सत्त्वेऽवश्यं यत्कार्यस्योत्पत्तेः सम्यग् निश्चयो भवति तत् तस्य कारणं युक्तं, दण्डादिसत्त्वेऽवश्यं घटोत्पत्तिरिति न सम्यग् निश्चयः, तत्सत्त्वेऽपि कदाचिद् घटानुत्पत्तेः, किन्तु दण्डादिसत्त्वे प्रायो भविष्यति घट इति संभावनैव, संभावना तूत्कटकोटिकसंशय-

रूपा न वस्तुसिद्धिसमर्थेति न ततो दृष्टहेतुसिद्धिः, यद् भाव्यं तद्भवत्येवेति तु सम्यग् निश्चयः, भाव्यता च नियतिरेवेत्युक्तनिश्चयान्नियतिः कारणं सिद्ध्यति; न च यत्कार्यं प्रति यत्कारणस्य पूर्वमिष्टसाधनत्वेन निश्चयस्तत्कार्यार्थं तत्कारणे प्रवृत्तिः, कार्योत्पत्तेः पूर्वं नियतेस्तु निश्चयो नास्तीति तत्र प्रवृत्तिर्दुर्घटेति वाच्यम्, अविद्ययैव प्रवृत्तेः, यदृच्छयैव फललाभतोऽविद्यामूलिकाऽपि प्रवृत्तिः संवादिनीति ॥ ६३ ॥ १७५ ॥

नियतिजन्यत्वाभावे दोषमुपदर्शयति–

**अन्यथाऽनियतत्वेन, सर्वाभावः प्रसज्यते ।**
**अन्योऽन्यात्मकतापत्तेः, क्रियावैफल्यमेव च ॥ ६४ ॥ १७६ ॥**

**अन्यथे**ति–यद्येवं नेष्यते, अर्थात् नियतिं विनैव भावानामुत्पत्तेरुपगमे इत्यर्थः, नियतिजन्यत्वाभावे च नियतत्वाभावात् **अनियतत्वेन** हेतुना "**सर्वाभावः प्रसज्यते**" इति हरिभद्रसूरिसम्मतः पाठः, तैः "सर्वाभावः प्रसज्यत" इत्यस्य "एते हि तत एव, तच्च तदन्यथा भवतीति प्राप्तं, न चैतदेवमिति तदन्यवद्भीष्टस्याप्यभाव इति सर्वाभावः" इत्येवं व्याख्यातम्, उपाध्यायसम्मतस्तु "सर्वभावः प्रसज्यते" इति पाठः, तेन तत्र "व्यक्त्यविशेषात्" इति हेतुरुपदर्शितः, तत्रोपाध्यायस्यायमभिप्रायः–यदि साजात्यवैजात्योभयानुवेधः कारणप्रयुक्तो नाश्रीयते तदा कार्यव्यक्तिं प्रति कारणव्यक्तिः कारणमित्येव प्राप्तं, तथा च व्यक्तिर्यथा घटव्यक्तिस्तथा पटव्यक्तिर्मठव्यक्तिरित्येवं सर्वेऽपि भावाः प्रत्येकं व्यक्तिरिति व्यक्त्यविशेषात् सर्वेषां दण्डव्यक्तिकार्यत्वमिति सर्वभावो दण्डव्यक्तितः स्यादिति, हरिभद्रसूरेः पुनरयमभिप्रायः–एते हि तत एवेति योऽयं नियमः सोऽपि सर्वभावानामनियतत्वे सर्वान्तर्गतत्वादनियत इति तत एव भवतीत्यपि तदन्यथा भवतीति प्राप्तं, तेन एतदेवं नेति ततो यथाऽन्यदेवं न, अर्थात् ततो न भवति तथा विवक्षितमपि कार्यं ततो न भवतीति सर्वाभावः प्रसज्यत इति । **च** पुनः, **अन्योऽन्यात्मकतापत्तेः** अनियतहेतुत्वेन घटस्य दण्डादिजन्यत्ववत् पटकारणतन्त्वादिजन्यत्वमपि भवेत्, एवं पटस्यापि तन्त्वादिजन्यत्वमपि भवेत्, एवं च पटस्य घटकारणजन्यत्वाद् घटात्मकत्वं, घटस्य पटकारणजन्यत्वात् पटात्मकत्वमित्येवं घट-पटादीनामन्योऽन्यस्वरूपत्वं स्यात्, एवं सर्वस्य सर्वकारणकत्वे घटपटाद्यविशेषापत्तेः, तथा च घटकार्यं पटोऽप्यविशिष्टत्वात् कुर्यादेवेति जलाद्यान-

यनाद्यर्थिनो घटानयनादिक्रियावैफल्यमेव, तामन्तरेणापि जलाद्यानयनादिसम्भवात्, पटस्य सिद्धत्वे तदात्मकघटव्यक्तेरपि सिद्धत्वेनासाध्यत्वात् तदुत्पत्तिप्रयासस्यापि वैफल्यम्; दण्डादिकारणसम्मेलनेन या घटव्यक्तिश्चिकीर्षिता सा व्यक्तिरसिद्धैवेति चेत्? सा व्यक्तिरित्यत्र व्यक्तिविशेषणतयोपादीयमानं तत्त्वं नान्यस्माद् भेदः, भेदस्य सप्रतियोगिकस्य प्रतियोगिग्रहमन्तरेण न ग्रह इत्यन्यभेदाग्रहेऽपि सोऽयमिति तत्ताग्रहात्, न च तद्व्यक्तिरेव तत्त्वम्, विशेषणविशेष्यभावस्य भेदनियतत्वेन तद्व्यक्तौ तद्व्यक्तिरूपतत्त्वस्य विशेषणत्वासम्भवात् किन्तु नियतिकृतधर्मविशेष एव तत्त्वमिति सिद्धा नियतिः, अथवाऽनियतहेतुत्वे घटार्थिनो मृद उपादानेऽपि ततो घटो न जायेत, किन्त्वन्यदेव भवेदिति विलक्षणसंस्थानादिमत्तया घटार्थिनोऽभिमतस्य घटस्यासिद्धिरित्येवं क्रियावैफल्यं प्रसज्यते, तथा नियतेन तत्त्वान्तरेण सर्वान्वयव्यतिरेकसिद्धेर्नियतिरेव कारणमिति ॥ ६४ ॥१७६॥

॥ इति एकान्तनियतिकारणतावादः ॥

---

## ॥ अथ कर्मवादः ॥

अथ कर्मैकान्तकारणतावादिमतमुपदर्शयति–

**न भोक्तृव्यतिरेकेण, भोग्यं जगति विद्यते।**
**न चाकृतस्य भोक्ता स्यान्मुक्तानां भोगभावतः ॥ ६५ ॥ १७७॥**

**न भोक्तृव्यतिरेकेणे**ति–नञो 'विद्यते' इत्यनेनान्वयः, भोक्तृव्यतिरेकेण–भोक्तारमन्तरेण, **जगति** चराचरे, **भोग्यं** भोक्तव्यं, **न** नैव, **विद्यते** समस्ति, भोग्यपदार्थस्य ससम्बन्धिकत्वेन सम्बन्धिभूतभोक्तारमन्तरेण भोग्यत्वानुपपत्तेः, **न चाकृतस्य** स्वयमनुपात्तस्य कर्मणः, **भोक्ता** फलोपभोक्ता, **स्यात्** भवेत्, स्वव्यापारजन्यस्यैव स्वभोग्यत्वदर्शनात्, एवमनभ्युपगमे दण्डमाह–**मुक्ताना**मिति–निष्ठितार्थानामित्यर्थः, **भोगभावतः** भोगप्रसङ्गात्, अन्यकृतकर्मफलोपभोगप्रसङ्गादिति यावत् ॥ ६५ ॥ १७७ ॥

यदि नामैवं ततः किमित्यपेक्षायामाह–

**भोग्यं च विश्वं सत्त्वानां, विधिना तेन तेन यत्।**
**दृश्यतेऽध्यक्षमेवेदं, तस्मात् तत्कर्मजं हि तत् ॥ ६६ ॥ १७८ ॥**

**भोग्यं चे**ति–भोगप्रयोजनं चेत्यर्थः, **सत्त्वानां** संसारिणाम्, **तेन तेन**

**विधिना** सुखदुःखप्रदानादिलक्षणेन प्रकारेण, **इदं** प्रत्यक्षविषयं, **विश्वं** जगत्, **अध्यक्षमेव दृश्यते** स्वसंवेदनप्रत्यक्षसाक्षिकमेवावलोक्यते, **यत्** यस्मात् कारणात्, **तस्मात्** कारणात्, **हि** निश्चितम्, **तत्** विश्वम्, **तत्कर्मजं** भोक्तृकर्मजमेव, तस्माज्जगद्धेतुत्वं कर्मण्येव, पराभिमतहेतूनां तद्भिन्नानां व्यभिचारित्वादिति हृदयम् ॥ ६६ ॥ १७८ ॥

उक्तमेवार्थं समर्थयन्नाह–

**न च तत्कर्मवैधुर्ये, मुद्गपक्तिरपीक्ष्यते ।**
**स्थाल्यादिभङ्गभावेन, यत् क्वचिन्नोपपद्यते ॥ ६७ ॥ १७९ ॥**

**न चेति**-अस्य 'ईक्ष्यते' इत्यनेनान्वयः, **तत्कर्मवैधुर्ये** भोक्तृकर्मवैगुण्ये भोक्तृगतानुकूलादृष्टाभावे इति यावत्, **मुद्गपक्तिरपि न चेक्ष्यते** नैव दृश्यते, कथमित्यपेक्षायामाह–**स्थाल्यादिभङ्गभावेनेति** । **यत्** यस्माद्धेतोः, **क्वचित्** विवक्षितस्थाने, **स्थाल्यादिभङ्गभावेन** पाकोपयोगिस्थाल्यादिगतच्छिद्राद्युपजननेन, **नोपपद्यते** न सिध्यति; ननु स्थाल्यादिकं यत्पाकस्य दृष्टं कारणं तद्वैगुण्यादेव तत्र पाकरूपकार्याभाव इति किमित्यदृष्टं कर्मजन्यं पाकजनकमभ्युपेयमिति चेत् ? तदेव दृष्टवैगुण्यं यन्निमित्तकं तदेव कार्यप्रतिबन्धकादृष्टं, तत एव कार्यानुत्पादो न्याय्यः, दृष्टवैगुण्यस्य कार्यवैगुण्यप्रयोजकत्वकल्पनापेक्षया तन्निमित्तस्यादृष्टस्यैव कार्यवैगुण्यप्रयोजकत्वकल्पने लाघवात्, तस्य कारणत्वकल्पनापेक्षया वरं तद्धेतोरेव कारणत्वमिति न्यायात्, नन्वेवमदृष्टमात्रस्यैव कारणत्वे कार्यमात्रे दृष्टकारणापेक्षा न स्यादिति चेत्, ? तथाविधप्रयत्नं विनाऽपि शुभादृष्टलक्षणभाग्यबलाद् धनप्राप्त्यादिलक्षणकार्यविशेषस्य दर्शनेन दृष्टकारणानपेक्षणमिष्टमेव, दृष्टकारणानां तन्निमित्तत्वव्यवहारस्तु कर्मविपाककालेऽवर्जनीयसन्निधिकत्वादेव, तत एव च "दृष्टकारणानामदृष्टव्यञ्जकत्वम्" इति सिद्धान्तः, तदुक्तम्–

"यथा यथा पूर्वकृतस्य कर्मणः, फलं विधानस्थमिवावतिष्ठते ।
तथा तथा तत्प्रतिपादनोद्यता, प्रदीपहस्तेव मतिः प्रवर्तते ॥ १ ॥" [ ] इति,

विपाककालश्च कर्मण एवावस्थाविशेष इति तदपेक्षणेऽपि न कालवादप्रवेशः, कर्मपरम्पराया अनादित्वेनोत्तरोत्तरकर्मसु पूर्वपूर्वकर्मणां कारणत्वेन कर्महेत्वपेक्षाव्यग्रताऽपि नास्तीति ॥ ६७ ॥ १७९ ॥

कर्मणो विचित्रस्य विचित्रकार्यकारणत्वाभावे नियत्यादेरवैचित्र्यात् कार्यवैचित्र्यं न स्यादिति विपक्षे बाधकमुपदर्शयति–

**चित्रं भोग्यं तथा चित्रात्, कर्मणोऽहेतुतान्यथा ।**
**तस्य यस्माद् विचित्रत्वं, नियत्यादेर्न युज्यते ॥ ६८ ॥ १८० ॥**

**चित्रं भोग्यमिति**–नानाप्रकारं भोग्यमित्यर्थः, भोग्यस्य नानाप्रकारत्वं प्रतिनियतरूपत्वादेव, यदेकस्य भोग्यस्य रूपं न तदन्यभोग्यस्येत्यावेदनाय **तथेति**–प्रतिनियतरूपेणेत्यर्थः, **चित्रात्** प्रतिनियतविभिन्नरूपात्, **कर्मणः** अदृष्टात्, उपपद्यत इति दृश्यम्, कर्मण एव तत्तत्कार्यजनकविचित्रशक्तियोगित्वेन चित्रत्वं, न तु नियत्यादेरिति हृदयम्, **अन्यथा** कार्यवैचित्र्यनिमित्तकर्मवैचित्र्यानभ्युपगमे, **तस्य** भोग्यस्य, **अहेतुता** अजन्यता, स्यादिति शेषः, क्वचिदुद्भूतरूपं, क्वचिदनुद्भूतरूपं, परमाणुसाद्भूतानां शाल्यादिबीजानां शाल्याद्यङ्कुरजनकत्वमेवेति नियमे नैयायिकेनाप्यदृष्टस्यैव हेतुताऽङ्गीकारात्, तथा च तस्यैव सर्वत्र हेतुत्वमुचितमित्याशयः, कर्मणो विचित्रत्वात् कार्यवैचित्र्यं सम्भवति, न नैयत्यादेस्तस्याविचित्रत्वादित्याह–**यस्माद्** एकरूपत्वात्, **नियत्यादेः** सकाशात्, **तस्य** भोग्यस्य, **विचित्रत्वं** प्रागुपदर्शितम्, **न युज्यते** नैव सङ्गच्छते ॥ ६८ ॥ १८० ॥

एतदेव भावयति–

**नियतेर्नियतात्मत्वान्नियतानां समानता ।**
**तथाऽनियतभावे च, बलात् स्यात् तद्विचित्रता ॥ ६९ ॥ १८१ ॥**

**नियतेरिति**–उक्तलक्षणाया नियतेरित्यर्थः, **नियतात्मत्वात्** एकस्वभावत्वात्, एकरूपत्वादिति यावत्, **नियतानां** नियतिजन्यत्वेनाभिमतानां, **समानता** तुल्यता भवेत्, एकरूपकारणजन्यानां कार्याणामेकरूपत्वस्यैव न्याय्यत्वात्, **तथा** तेन प्रकारेणासमानकार्यकारणरूपेण, यथाऽदृष्टस्यासमानकार्यकारणरूपेण विचित्रता तथा, **अनियतभावे च** नियतेरनवस्थितत्वे, असमानकार्यकारित्वे इति यावत्, अभ्युपगम्यमाने पुनः, **बलात्** सामर्थ्यात्, न ह्येकस्वभावस्यासमानकार्यकारित्वं किन्तु विचित्रस्वभावस्यैवेति न्यायात्, **तद्विचित्रता** नियतिविचित्रता, **स्यात्** भवेत्, 'अत्रोपाध्यायाः–"घटो यदि पटजनकान्यूनानतिरिक्तहेतुजन्यः स्यात् पटः स्यात्, घटजनकं यदि पटं न जनयेत् पटजनकाद् भिद्येत, इति तर्कद्वयम्" उल्लिखन्ति ॥ ६९ ॥ १८१ ॥

घटजनकनियतेः पटजनकत्वाभावेऽभ्युपगम्यमाने पटजनकनियतितो भेदापादनमिष्टापत्तिरूपत्वान्न दोषावहम्, इत्थं सत्येव कार्यवैचित्र्यनिर्वाहकतया नियत्यभ्युपगमस्य युक्तत्वादिति पराशङ्कां प्रतिक्षिपति–

**न च तन्मात्रभावादेर्युज्यतेऽस्या विचित्रता ।**
**तदन्यभेदकं मुक्त्वा, सम्यग्न्यायाविरोधतः ॥ ७० ॥ १८२ ॥**

**न चे**ति–नैवेत्यर्थः, **तन्मात्रभावादेः** आदिपदात् परिणामपरिग्रहः, तथा च नियतिमात्रत्व-परिणामाभ्यां सकाशादित्यर्थः, **युज्यते** घटते, **अस्याः** प्रतिनियतकार्यजनकनियतेः, **तदन्यभेदकं** नियत्यन्यभेदकं, "तदन्यत् नियतिभिन्नं भेदकं वस्तु" इति हरिभद्रसूरिव्याख्यानस्वारस्यात् तत्सम्मतः "तदन्यद् भेदकं" इति पाठः, **मुक्त्वा** विहाय, अनपगम्येति यावत्, **सम्यग्न्यायाविरोधतः** सत्तर्काप्रातिकूल्येन, **विचित्रता** वैचित्र्यम्, **स्यात्** भवेत्, तथा च नियतिवैचित्र्यं तदैव भवेद् यदि नियतिभिन्नं किञ्चिद् वस्तु नियतेरेकस्या अपरस्या नियतेर्भेदकमभ्युपगम्येत, तथाऽभ्युपगमे च विलीनं नियतिमात्रैकान्ताभ्युपगमवादेनेति भावः ॥ ७० ॥ १८२ ॥

समानजातीयस्यावान्तरवैचित्र्यं भिन्नकारणमन्तरेण न सम्भवतीत्येतदेव दृष्टान्तावष्टम्भेन प्रकटयति–

**न जलस्यैकरूपस्य, वियत्पाताद् विचित्रता ।**
**ऊषरादिधराभेदमन्तरेणोपजायते ॥ ७१ ॥ १८३ ॥**

**ने**ति–अस्य 'उपजायते' इत्यनेन सम्बन्धः, **जलस्यैकरूपस्य** जलत्वेन समानस्य जलस्य सतः, **वियत्पातात्** अभ्रतः पतनात्, **ऊषरादिधराभेदम्** ऊषरतदितरपृथिवीसम्पर्कजन्यवर्णगन्धरसस्पर्शादिवैलक्षण्यं, **मुक्त्वा** अन्तरेण, **विचित्रता** निरुक्तवैलक्षण्यप्रयुक्तवैलक्षण्यं, **नोपजायते** जायमानं न दृश्यते, सर्वलोकप्रसिद्धमेवैतत्, तथा नियतेरपि नियतित्वेन समानाया अवान्तरभेदो नान्यभेदकं विनेति ॥ ७१ ॥ १८३ ॥

नियतेरप्यवान्तरभेदनिबन्धनमन्यद् वस्तु नाम, ततः किमित्यत आह—

**तद्भिन्नभेदकत्वे च, तत्र तस्या न कर्तृता ।**
**तत्कर्तृत्वे च चित्रत्वं, तद्वत् तस्याप्यसङ्गतम् ॥ ७२ ॥ १८४ ॥**

**तद्भिन्नभेदकत्वे चे**ति–तद्भिन्नं नियतिभिन्नं भेदकं यस्याः सा तद्भिन्नभेदका, तस्या भावस्तद्भिन्नभेदकत्वं, तस्मिन्नित्येवं निरुक्त्याश्रयणान्नियतेर्नियतिभिन्नभेदकशालित्वे चेत्यर्थः, अङ्गीक्रियमाणे इति शेषः, **तत्र** भेदकत्वेनाभिमते, **तस्याः** नियतेः, **न कर्तृता** न हेतुता, भेदकत्वेनाभिमताद् वस्तुनो भिन्ना सती नियतिः समर्था भवेन्नान्यथा, असमर्था च सा न भेदकवस्तूत्पादनप्रत्यला, भेदकवस्तूत्पादमन्तरेण भेदकवस्त्वेव नास्तीति ततः कथं सा स्यादतो नियतिभिन्नमेव किञ्चिन्नियतिभेदकवस्तु कारणं, न नियतिरिति नियतेर्नियतिभेदकवस्त्वहेतुत्वे सर्वहेतुत्वसिद्धान्तव्याकोपः, नियतेः सर्वहेतुत्वमिति सिद्धान्तमनुरुध्य **तत्कर्तृत्वे च** नियतेर्नियतिभेदकत्वाभिमतवस्तुहेतुत्वे च तदपि वस्तु नियतमेव स्यात्, तथा च **तद्वत्** नियतिवत्, यथा नियतिर्नियता सती न नियतिभेदिका तथेति यावत्, **तस्यापि** नियतिभेदकत्वाभिमतवस्तुनोऽपि, **चित्रत्वं** भेदकत्वाविनाभूतचित्रत्वम्, **असंगतम्** असमञ्जसम्, कारणसरूपत्वात् कार्यस्य, कारणस्य चित्रत्वे सत्येव कार्यस्य चित्रत्वं, कारणं च नियतिर्न भेदकत्वाविनाभूतचित्रत्वशालिनीति तत्कार्यमपि भेदकं वस्तु तथा न स्यादिति भावः । एतेन "तद्व्यक्तिनिरूपितनियतित्वेन तद्व्यक्तिजनकत्वम्" इत्यप्यपास्तम्, तन्नियतिजन्यत्वेन तद्व्यक्तित्वासिद्धिः, तद्व्यक्तित्वसिद्धौ च तद्व्यक्तिनिरूपितनियतित्वेन नियतेर्जन्यत्वस्य तद्व्यक्तौ सिद्धिः, इत्यन्योऽन्याश्रयात्, तद्व्यक्तेर्नियतिकार्यस्य स्वनिरूपितनियतिनिष्ठकारणतायामनवच्छेदकत्वाच्च, तत्तत्कार्यस्य स्वनिरूपितकारणतायामवच्छेदकत्वाभ्युपगमे च तद्व्यक्तिं प्रति तद्व्यक्त्यव्यवहितपूर्ववर्ति कारणमित्यस्य सम्यक्त्वेन तत्र नियतित्वनिवेशवैयर्थ्यात्, तथा नियतिरखण्डस्वरूपा न किञ्चिन्निरूपिता किन्तु तद्गतकारणत्वादेः सनिरूपकत्वात् तत्र निरूपितत्वोपचारः, तथा च तद्व्यक्तिनिरूपितकारणताश्रयत्वमेव नियतेस्तद्व्यक्तिनिरूपितत्वमिति तद्व्यक्तिनिरूपितकारणत्वस्य तद्व्यक्तिनिरूपितकारणताया अवच्छेदककोटौ प्रवेशेनावच्छेदकत्वादात्माश्रयोऽपीति ॥७२॥ १८४ ॥

ननु नियतिस्वभावभेदादेव तत्कार्यभेद इति पराकूतमाशङ्क्य प्रतिक्षिपति–

**तस्या एव तथाभूतः, स्वभावो यदि चेष्यते ।**
**त्यक्तो नियतिवादः स्यात्, स्वभावाश्रयणान्ननु ॥ ७३ ॥ १८५॥**

**तस्या एवे**ति–नियतेरेवेत्यर्थः, **तथाभूतः** कार्यभेदप्रयोजको विचित्रभेदकजननरूपः, **स्वभावभेदः** स्वसत्तालक्षणो विभिन्नस्वभावः, **यदि चेष्यते** परेण यद्येवमभ्युपगम्यते, एवमभ्युपगमे परस्य को दोष इत्यपेक्षायामाह—**त्यक्त** इति ।

तदा **ननु** इत्याक्षेपे, **स्वभावाश्रयणात्** नियतेरपि स्वभाववैचित्र्यादेव कार्यवैचित्र्यस्याभ्युपगमाद्, **नियतिवादः** नियतिरेव विशेषणान्तरविनिर्मुक्ताऽन्यनिरपेक्षा कार्यमात्रकारणमित्यभ्युपगमः, **त्यक्तः स्यात्** परित्यक्तो भवेत्। ननु नियतिस्वभावो नियतेरेव कार्यभेदजननोन्मुखतालक्षणपरिपाकावस्था, अवस्था चावस्थातुरभिन्नेति न स्वभावाश्रयणेऽपि नियतिभिन्नकारणत्वाभ्युपगम इति चेत्?, न-परिपाकस्य कादाचित्कत्वेन सहेतुकतया तत्रान्यहेत्वाश्रयणस्यावश्यकत्वात्; अन्यत्र परिपाकः कश्चित् कारणान्तराद् भवति कश्चित् स्वभावाद् भवतीत्येवं परिपाकस्य द्वैविध्यदर्शनेऽपि नियतेः परिपाकः स्वभावादेवेति न तत्र कारणान्तरापेक्षेति चेत्? एवमपि नियतिव्यतिरिक्तस्य स्वभावस्य तत्र कारणत्वाभ्युपगमेन नियतिवादः परित्यक्त एव स्यात्; उत्तरोत्तरनियतिपरिपाके पूर्वपूर्वनियतिपरिपाक एव हेतुः, आद्यनियतिपरिपाके तु पूर्वपूर्वनियत्यपरिपाकत उत्तरोत्तरनियत्यपरिपाकपरम्परायामन्तिमनियत्यपरिपाको हेतुः, इत्येवं विशिष्य हेतुहेतुमद्भावान्न दोष इति चेत्? तर्ह्येकत्रैकदा घटनियतिपरिपाकेऽन्यत्रापि घटोत्पत्त्यापत्तिः, नियतिपरिपाकरूपघटोत्पत्तिकारणस्य सद्भावात्; तद्घटनियतिपरिपाकस्तद्घटे हेतुः, तदन्यघटव्यक्तिनियतिपरिपाकस्तदन्यघटव्यक्तौ हेतुरित्येवं प्रतिसन्तानं नियतिभेदाभ्युपगमे नियतिर्द्रव्यं सर्वानुगामित्वात् तत्परिपाकः प्रतिसन्तानविभिन्नत्वात् पर्याय इत्येवं नियति-परिपाकयोर्द्रव्यपर्यायनामान्तरत्व एव विवादः, यच्चास्माभिर्द्रव्यमिति कथ्यते तत् परेण नियतिरिति, यच्चास्माभिः पर्याय इत्युच्यते तत् परेण परिपाक इति; किञ्च शास्त्रोपदेशमन्तरेणाप्यर्थेषु नियतिकृतत्वबुद्धेर्नियत्यैव सम्भवेन विश्वं नियतिकृतमित्येवं शास्त्रोपदेशस्य वैयर्थ्यं स्यात्, दृष्टादृष्टफलशास्त्रप्रतिपादितशुभाशुभक्रियाफलनियमाभावश्च प्रसज्येत, यच्च शास्त्रप्रतिपादितशुभक्रियाफलं तत् प्रति शास्त्रप्रतिपादितशुभक्रिया न कारणं, यच्च शास्त्रप्रतिपादिताशुभक्रियाफलं तत् प्रति शास्त्रप्रतिपादिताशुभक्रिया न कारणं, किन्तु नियत्यैव तदुभयं जायत इति शास्त्रप्रतिपादितशुभक्रियायां सत्यामपि नियत्याऽशुभफलं स्यात्, शास्त्रप्रतिपादिताशुभक्रियायां सत्यामपि नियत्या शुभफलं जायेतेति; यदि च शास्त्रप्रतिपादितशुभक्रियाहेतुकमेव सुखादिशुभफलं नियतिप्रयोज्यं, शास्त्रप्रतिपादिताशुभक्रियाहेतुकमेव दुःखाद्यशुभफलं नियतिप्रयोज्यमित्युपेयते तदा नियतिभिन्नयोः शुभाशुभक्रिययोरपि शुभाशुभफलकारणत्वस्यागततया अन्यकारणत्वप्रतिक्षेपस्य नियत्यसहकृतान्यकारणत्वप्रतिक्षेपपरत्वेन पारिभाषिकस्यान्यकारणत्वाबाधकत्वात् ॥ ७३ ॥ १८५ ॥

केवलभेदकस्वभाववादस्यासाधुत्वमुपदर्शयति-

**स्वो भावश्च स्वभावोऽपि, स्वसत्तैव हि भावतः ।**
**तस्यापि भेदकाभावे, वैचित्र्यं नोपपद्यते ॥ ७४ ॥ १८६ ॥**

**स्वो भावश्चेति** । कृष्णकोकिलः शुक्लशङ्ख इत्यादावेकपदव्यभिचारेऽपि कर्मधारयस्य दर्शनेन स्वभाव इत्यादौ भावस्य स्वभिन्नस्य संभवेऽपि स्वस्य भावभिन्नस्याभावाद् भावपदमेव व्यभिचारि न तु स्वपदमित्येकपदव्यभिचारित्वेऽपि स्वश्चासौ भावश्च स्वभाव इति कर्मधारयसमास एवेत्याशयेनाह-**स्वो भावश्च स्वभावोऽपीति** । भावपदार्थः कश्चिदन्यो यः स्वस्मादभिन्नः सन् स्वभाव इत्यनेनोच्यते इति भ्रान्तिवारणाय तद्विवरणमाह-**स्वसत्तैव हि भावत** इति । सर्वस्य वस्तुनः स्वसत्तैव प्रत्यक्षविषयो भवति तस्मात् हि निश्चितं, **भावतः** परमार्थतः, **स्वसत्तैव** स्वभावः, नान्यः कश्चित् पदार्थः स्वभावो नाम, **तस्यापि** स्वसत्तारूपस्य स्वभावस्यापि, **भेदकाभावे** अवान्तरभेदनिबन्धनवस्त्वन्तराभावे, **वैचित्र्यं** कार्यवैचित्र्यप्रयोजकत्वं, **नोपपद्यते** न युज्यते, कार्यवैचित्र्यं हि कारणवैचित्र्याद् भवितुमर्हति नान्यथा, कारणं च स्वभावः स्वसत्तारूपोऽविशिष्ट इति कार्यमप्यविचित्रमेव स्यादित्यर्थः ॥ ७४ ॥ १८६ ॥

यदि स्वभावस्य वैचित्र्यं न स्यात् तदा किमनिष्टमापद्यत इत्यपेक्षायामाह-

**ततस्तस्याविशिष्टत्वाद्, युगपद्विश्वसम्भवः ।**
**न चासाविति सद्युक्त्या, तद्वादोऽपि न सङ्गतः ॥ ७५ ॥ १८७ ॥**

**तत** इति-वैचित्र्याभावादित्यर्थः, **तस्य** स्वभावस्य, **अविशिष्टत्वात्** एकरूपत्वात् कारणात् तस्यैकस्य स्वभावस्य विश्वजनकत्वेऽभ्युपगम्यमाने सति, **युगपत्** एकदैव, **विश्वसम्भवः** विश्वस्य जगत उत्पादप्रसङ्गः, यावद्धि भावेन भवितव्यं तत् सर्वं युगपत् प्रसज्येतेति यावत्, **न चासौ** युगपज्जगदुत्पादो न च भवति, **इति** एतस्मात् कारणात्, **सद्युक्त्या** अबाधिततर्केण, **तद्वादोऽपि** स्वभाववादोऽपि, **न सङ्गतः** न सङ्गतिमुपगच्छति । ननु स्वभावस्य क्रमवत्कार्यजनकत्वं स्वभावादेवेति स्वभावाद् भवदपि कार्यं क्रमेणैव स्यादिति न युगपत्कार्यप्रसङ्ग इति चेत् ? न,-तस्यैव स्वभावस्य पूर्वोत्तरकार्यजनकत्वे पूर्वकालभावि कार्यमुत्तरकाले उत्तरकालभावि कार्यं पूर्वकालेऽपि स्यात् स्वभाववादे कालस्याकारणत्वादिति पूर्वमिदं कार्यमिदं चोत्तरमेवमित्येवं नियतकार्यभवनलक्षणक्रमस्यैव व्याहतेः, एकस्यैव स्वभावस्य नानाजातिनियामकत्वे सर्वस्य सर्वजातीयत्वमेकजातीयत्वं वा स्यान्नियामकस्य स्वभावस्याविशेषात् ॥ ७५ ॥ १८७ ॥

पराभिप्रायमाशङ्क्य परिहरति–

**तत्तत्कालादिसापेक्षो, विश्वहेतुः स चेन्ननु ।**
**मुक्तः स्वभाववादः स्यात्, कालवादपरिग्रहात् ॥ ७६ ॥ १८८॥**

**तत्तत्कालादिसापेक्ष** इति–तत्तत्क्षणादिलक्षणकालसहकृतः सन्नित्यर्थः, **स** स्वभावः, **विश्वहेतुः** जगतः कारणम्, तथा च तत्तत्क्षणरूपसहकारिणः क्रमिकत्वेन कार्यक्रमिकत्वसंभवादिति **चेत्** यदि, **ननु** इति आक्षेपे, **मुक्तः स्वभाववादः** स्वभावमात्रकारणतैकान्तवादः परित्यक्तो भवेत्, **कालवादपरिग्रहात्** कालोऽपि कारणमित्येवं कालवादस्य स्वीकारात्; ननु स्वभावस्य क्षणिकत्वात् क्षणिकस्वभावाद् भवत् कार्यमपि क्षणिकमिति स्वभाव एव क्षणस्तदतिरिक्तः क्षणो नास्तीति क्षणिकस्वभावाभ्युपगमपक्षे नायं दोष इत्युक्तमेवेति चेत्? उक्तं, को नाम नोक्तमिति कथयति? किन्तु तन्न युक्तम्, यतः क्षणिकवादे तत्तत्क्षणं प्रति तत्तत्क्षणस्यैव कारणत्वेनैकजातीयहेतुं विना कार्यैकजात्यासम्भवात्, कुर्वद्रूपत्वस्य दण्डत्वादिना साङ्कर्येण जातित्वाभावेन घटं प्रति घटकुर्वद्रूपत्वेन हेतुत्वस्य वक्तुमशक्यत्वात्; न च कुर्वद्रूपत्वेन कारणत्वाभावे एकस्माद् दण्डादितः कार्यानुत्पादेन सहकारिचक्रसमवहितस्यैव कारणत्वं वाच्यमिति गौरवं स्यादिति वाच्यं, सामग्रीत्वेन कार्यव्याप्यत्वस्य वास्तविकत्वेन गौरवस्यादोषत्वात्, प्रत्यभिज्ञानादिबाधितत्वेन क्षणिकत्वस्य स्वीकर्तुमशक्यत्वाच्च; किञ्च घटकुर्वद्रूपाद् घट इत्यभ्युपगमे यत्र क्वचिद् घटकुर्वद्रूपसत्त्वे तद्देश इवान्यदेशेऽपि घटः स्यात् कारणस्य कुर्वद्रूपस्याविशेषात्, तद्व्यतिरिक्तस्य देशस्याकारणत्वात्, अस्मिन् देश एवास्य घटस्योत्पत्तिरित्येतन्नियामककारणान्तरस्याभ्युपगमे स्वभावैकान्तकारणतावादः परित्यक्तः स्यात्, दण्डादौ घटादिसाधनत्वं प्रमायैव घटाद्यर्थिनां प्रेक्षावतां दण्डादिकारणचक्रसम्मेलने प्रवृत्तिरुपलभ्यते, यदि च दण्डादिकं न घटादिकारणं तर्हि दण्डादिकं विनाऽपि घटादिसम्भावनया घटाद्यर्थिनो दण्डादिसङ्घटने निष्कम्पप्रवृत्तिर्न स्यात्; न च कार्यं स्वभावाद् भवतीति स्वभाववादस्य कार्यं निर्हेतुकमेवोपजायत इत्यत्रैव निर्भर इति वाच्यं, कार्यं निर्हेतुकमित्यत्र हेतोरनुपन्यासे उक्तप्रतिज्ञातार्थस्यैवासिद्धेः, हेतोरुपन्यासे च तथाहेतुमुपन्यस्यतो वादिनः कार्यं निर्हेतुकमिति वदतो व्याघातात्, तदुक्तम्–

"न हेतुरस्तीति वदन् सहेतुकं, ननु प्रतिज्ञां स्वयमेव बाधते ।
अथापि हेतुप्रलयादसौ भवेत्, प्रतिज्ञया केवलयाऽस्य किं भवेत्? ॥१॥" इति;

न च स्वभाववादिभिरस्माभिः कारकहेतुप्रतिक्षेप एव क्रियते, न किञ्चित् कारणं, कार्यं न सहेतुकमित्यादिप्रतिज्ञायां साध्यसाधनाय यः कश्चिद्धेतुरुपादीयते स ज्ञापक एक हेतुरिति तदुपन्यासेऽपि न स्वपक्षबाध इति वाच्यम्, ज्ञापकत्वस्य ज्ञानजनकत्वरूपतया तत्स्वीकारेऽपि कारणत्वस्वीकारस्याज्ञातत्वेन स्वपक्षहानेरनिवार्यत्वात्, अहेतुकतयाऽभ्युपगतस्य कार्यस्यानियतावधित्वे यद्दिने यस्योत्पादस्ततः पूर्वदिनेऽपि तदुत्पादः, एवं तत्पूर्वदिनेऽपि तदुत्पाद इत्येवमनादित्वे पूर्वकालासत्युत्तरकालसत्त्वलक्षणं कादाचित्कत्वं न स्यादिति कादाचित्कत्वान्यथानुपपत्त्या, नियतावधित्वे य एव नियतः पूर्वोऽवधिः स एव कार्यनियतपूर्ववर्तित्वात् कारणमिति कारणत्वस्वीकारस्याऽऽवश्यकत्वात्, अनियतस्यावधित्वप्रतीतौ वह्नेर्धूम इतिवद् गर्दभाद् धूम इत्यपि प्रतीयेतेति बोध्यम् ॥ ७६ ॥ १८८ ॥

स्वभावैकान्तवादवत् कालैकान्तवादोऽप्युक्तयुक्तित एवापास्त इत्याह—

**कालोऽपि समयादिर्यत्, केवलः सोऽपि कारणम् ।**
**तत एव ह्यसंभूतेः, कस्यचिन्नोपपद्यते ॥ ७७ ॥ १८९ ॥**

**कालोऽपीति** । **समयादिः** समयादिस्वरूपः **कालोऽपि** क्लृप्तद्रव्यस्य वर्तनादिलक्षणः पर्यायस्वरूपः, अतिरिक्तस्य कालद्रव्यस्य पर्यायो वा, **यत्** यस्मात् कारणात्, **केवलः** अन्यनिरपेक्षः सन्, **सोऽपि** कालोऽपि, स्वभाववत् **कारणं** कालवादिभिरिष्यते, किन्तु हि निश्चितं, **कस्यचित्** कस्यापि वस्तुनः, **तत एव** अन्यनिरपेक्षकालमात्रात्, **असम्भूतेः** अनुत्पत्तेः, **नोपपद्यते** कालः कारणमिति न युज्यते, 'कालोऽपि समयादिरूपो यस्मात् केवलस्तस्मान्निश्चितं तत एवान्यनिरपेक्षकालत एव कस्यचिद् वस्तुनोऽनुत्पत्तेः कालोऽपि कारणं न सङ्गच्छते' इत्येवमन्वयार्थोऽवसेयः, यस्मिन् समये एकं कार्यं केवलात् कालादप्युपजायते तस्मिन्नेव समये केवलकालरूपकारणबलात् कार्यान्तरमप्युपपद्यत इति युगपत् सर्वकार्योत्पत्तिप्रसङ्गः; न च तत्क्षणवृत्तिकार्ये तत्पूर्वक्षणस्य हेतुत्वान्न दोष इति वाच्यम्; अग्रेभाविनोऽपि तत्क्षण एव संभवेन तत्क्षणवृत्तिकार्यत्वरूपकार्यतावच्छेदकाक्रान्तत्वात्, तत्क्षणवृत्तिकार्ये तत्पूर्वक्षणत्वेन हेतुत्वं तदुत्तरक्षणविशिष्टकार्ये तत्क्षणत्वेन हेतुत्वमित्यत्र विनिगमनाविरहाच्च, कारणस्य कार्यतावच्छेदककोटौ निवेशस्यादुष्टत्वे तदव्यवहितोत्तरत्वावच्छिन्नं प्रति तत्त्वेन हेतुत्वमित्यस्यैव सम्यक्त्वे कारणतावच्छेदककोटौ क्षणत्वनिवेशस्यापि वैयर्थ्यापत्तेः ॥ ७७ ॥ १८९ ॥

दोषान्तरमप्युपदर्शयति–

**यतश्च काले तुल्येऽपि, सर्वत्रैव न तत्फलम् ।**
**अतो हेत्वन्तरापेक्षं, विज्ञेयं तद्विचक्षणैः ॥ ७८ ॥ १९० ॥**

**यतश्चेति**–यस्माच्चेत्यर्थः, **काले** समयादौ, **तुल्येऽपि** समानेऽपि सति, अविशिष्टेऽपि सतीति यावत्, **सर्वत्रैव** सर्वस्मिन्नपि कृषीवलादौ, **तत्फलं** कालजन्यफलं शस्यादिकं, **न** तुल्यं न भवति, अथवा सर्वस्मिन्नपि तन्त्वादिदेशे तत्कालजन्यं घटादि न भवति, **अतः** अस्मात् कारणात्, **तत्फलं** कालफलं, **विचक्षणैः** पण्डितैः, युक्तिमार्गाभिज्ञैः, **हेत्वन्तरापेक्षं** कालातिरिक्तादृष्टदेशविशेषादिरूपकारणापेक्षम्, **विज्ञेयं** ज्ञातव्यम्, न च कालस्य कारणत्वे काल एव कालजन्यं घटादि, मृद्भिन्ने तन्त्वादावापादकाभावादेव तदापादनं न सम्भवतीति वाच्यम्, घटादिकं मृदवृत्ति स्यान्मृदजन्यत्वादित्येवमेवापादनात्; न च कालवादे मृदः कार्यमात्रे कारणत्वाभावान्मृज्जन्यत्वाप्रसिद्धौ मृज्जन्यभिन्नत्वमप्यप्रसिद्धमिति न तस्यापाद्येन मृदवृत्तित्वलक्षणापाद्येन व्याप्तिरिति तर्कमूलापाद्यापादकव्याप्त्यसिद्धिरिति वाच्यं, जन्यतासम्बन्धेन मृद्वद्भिन्नत्वरूपस्य मृदजन्यत्वस्यापादकत्वात्, व्यधिकरणसम्बन्धस्य भेदप्रतियोगितावच्छेदकत्वाभावे तु जन्यतासम्बन्धावच्छिन्नमृन्निष्ठप्रतियोगिताकाभाववत्त्वमेव मृदजन्यत्वम्, व्यधिकरणसम्बन्धस्यात्यन्ताभावप्रतियोगितावच्छेदकत्वस्य सर्वानुमतत्वात्; न च घटस्य मृज्जन्यत्वाभावेऽपि मृद्वृत्तित्वस्वभावत्वादेव मृद्वृत्तित्वमिति क्वाचित्कत्वमिति वाच्यम्, घटो यदि मृज्जन्यो न स्यान्मृद्वृत्तित्वस्वभावो न स्यादित्येवं मृद्वृत्तित्वस्वभावाभावस्यैवापाद्यत्वादिति ॥ ७८ ॥ १९० ॥

उपसंहरति—

**अतः कालादयः सर्वे, समुदायेन कारणम् ।**
**गर्भादेः कार्यजातस्य, विज्ञेया न्यायवादिभिः ॥ ७९ ॥ १९१ ॥**

**अत** इति–उक्तकारणादित्यर्थः, **कालादयः सर्वे** काल-स्वभाव-नियति-कर्मस्वरूपा यावन्तोऽनन्तरोक्ताः, **समुदायेन** स्वस्वसमवधानेन, **गर्भादेः कार्यजातस्य** गर्भादिसकलकार्यस्य, **न्यायवादिभिः** युक्तिमार्गविचक्षणैः, **कारणं** जनकं, **विज्ञेयाः** ज्ञातव्याः ॥ ७९ ॥ १९१ ॥

इदमेव स्पष्टयति—

**न चैकैकत एवेह, क्वचित् किञ्चिदपीक्ष्यते ।**
**तस्मात् सर्वस्य कार्यस्य, सामग्री जनिका मता ॥८०॥१९२॥**

**न चेति**—नैवेत्यर्थः, अस्य 'ईक्ष्यते' इत्यनेनान्वयः, इह जगति, **एकैकत एव** कालादीनां मध्यादेकैकस्मादेव, **क्वचित्** कुत्रापि देशे, **किञ्चिदपि** घटादिकं किमपि कार्यम्, **ईक्ष्यते** न चेत्यस्य सम्बन्धान्नैव जायमानमवलोक्यते, **तस्मात्** यस्मादेवं तस्मात् कारणात्, **सर्वस्य कार्यस्य** निखिलस्य घटादिकार्यस्य, **सामग्री** कथञ्चित् तद्भिन्नकारणसंहतिः, **जनिका** नियमतः स्वानन्तरक्षणवृत्तिकार्योत्पादकत्वेन कार्योपायिका, **मता** इष्टा । "अतः कालादयः सर्वे" इति पूर्वपद्येन कारणसमुदाये कार्योपधायकत्वनियमो व्यवस्थापितः, "न चैकैकत एवेह" इति द्वितीयपद्येन कार्ये कारणसमुदायलक्षणसामग्र्युपाधेयत्वनियमो व्यवस्थापित इत्युक्तिवैचित्र्येण पूर्वोक्तस्य दृढीकरणमुत्तरेणेति बोध्यम् । नन्वनन्तरोपदर्शितयुक्तिनिकरे कालाद्येकान्तवादप्रतिक्षेपयुक्त्युपदर्शनात् कालाद्येकान्तवादप्रतिक्षेपेऽपि तत्रादृष्टैकान्तवादप्रतिक्षेपकयुक्त्यनभिधानान्नैकान्तादृष्टवादप्रतिक्षेप इति ततोऽदृष्टैकान्तवादे जागर्ति सति कालादयः समुदिताः कारणं न त्वेकं किञ्चिदेव कारणमिति स्वाभिमतस्य साध्यस्य न सिद्धिरिति चेत् ? न—निखिलकर्मक्षयप्रभवस्य मोक्षस्य कार्यस्यापि कर्माजन्यत्वेन कार्यजातं कर्मजन्यमेवेत्येकान्तवादेऽनिर्मोक्षापत्तेः; न चात्मस्वरूपावस्थानरूप एव मोक्षः, स च नित्यत्वान्न केनचिज्जन्यः, किन्तु कर्मक्षयेणाभिव्यज्यत एवेति नानिर्मोक्षापत्तिरिति वाच्यम्, मोक्षस्याजन्यत्वेऽपि तदभिव्यञ्जकस्य कर्मक्षयस्यैव कर्म विनाऽनुत्पत्त्याऽभिव्यज्यमानात्मस्वरूपावस्थानलक्षणमोक्षानुपपत्तेः, यद्यपि प्रतियोगितासम्बन्धेन ध्वंसं प्रति तादात्म्यसम्बन्धेन प्रतियोगिनः कारणत्वमिति सामान्यकार्यकारणभावबलात् कर्मक्षयं प्रत्यपि कर्मणः कारणत्वमस्त्येव, तथापि स्वजन्यकार्यत एव कर्मक्षय इति स्वजन्यकार्योत्पत्तिकाले कर्मसत्त्वमावश्यकं, प्रतियोगी च स्वध्वंसकाले न समस्तीति प्रतियोगिविधया कारणत्वातिरिक्तकारणत्वमेव कर्मणः कार्यमात्रं प्रति कारणत्वं कर्मवादिनोऽभिमतं तच्च कर्मक्षयं प्रति कर्मणो नास्त्येवेति; स्वप्रयोज्यज्ञानयोगसम्बन्धेन पूर्वकर्मैव कर्मक्षये हेतुरिति न कर्मवादे तदनुपपत्तिरिति चेत् ?, न—कर्मवादे कार्यमात्रं प्रति साक्षात्सम्बन्धेनैव कर्मणो हेतुत्वस्यौचित्यात्, परम्परया कारणत्वस्येष्टत्वे तु स्वाश्रयप्रयोज्यज्ञानयोगसम्बन्धेन कर्मत्वस्यैव जातिस्वरूपस्य कर्मापेक्षया लघुशरीरस्य हेतुत्वापत्तेः; किञ्च

दृष्टकारणान्यनुलङ्घ्यैवादृष्टस्य कार्यजनकत्वाद् दृष्टकारणानामपि कारणत्वमावश्यकं बाधकाभावात्, दृष्टकारणानि कर्मविपाकसम्पादनादेव चरितार्थानि; दृष्टकारणैर्विपक्वतामानीतं कर्मैव कारणमिति चेत् ? कर्मविपाको दृष्टकारणसम्पादन एव चरितार्थः, कर्मविपाकेन सुसम्पादितानि दृष्टकारणान्येव कारणमित्यस्यापि वक्तुं शक्यत्वात्; अभ्यन्तरत्वात् कर्मणो बलवत्त्वं बाह्यत्वादन्येषां दुर्बलत्वमिति तु न युक्तम्, बलवत्त्वस्योभयत्र "अब्भंतर-बज्झाणं" [ अभ्यन्तर-बाह्यानाम् ] इत्यादिना महता प्रतिबन्धेनान्यत्राविशेषेणैव साधितत्वादित्यामनन्त्युपाध्यायाः ॥८०॥१९२॥

स्वभाव-नियत्योरदृष्टमात्रधर्मत्वेनादृष्टस्य कारणत्वे तद्द्वारेणैव कारणत्वं न स्वातन्त्र्येण, किन्तु काला-ऽदृष्टयोरेव स्वातन्त्र्येण कारणत्वमित्येके आचार्याः प्रचक्षते; अन्ये पुनः सर्वस्य वस्तुनः सामान्येनैव धर्मौ स्वभाव-नियती इति तावपि स्वातन्त्र्येण कारणमिति कालादयश्चत्वारोऽपि स्वातन्त्र्येण कारणमित्युशन्तीति मतभेदमुपदर्शयति–

**स्वभावो नियतिश्चैव, कर्मणोऽन्ये प्रचक्षते ।**
**धर्मावन्ये तु सर्वस्य, सामान्येनैव वस्तुनः ॥ ८१ ॥ १९३ ॥**

**स्वभाव** इति । **नियतिश्चैवे**त्येवकारस्य 'कर्मणः' इत्यनन्तरं सम्बन्धाद् धर्माविल्यस्य पूर्वत्रोत्तरत्र च सम्बन्धात् **'स्वभावो नियतिश्च कर्मण एव धर्मौ'** इति **अन्ये** आचार्याः, **प्रचक्षते** अभ्युपगमप्रकर्षेण व्याख्यान्ति, किञ्चिद्वस्तूद्भूतरूपवदेव किञ्चिदनुद्भूतवदेवेत्येवं स्वभावभेदस्य हेतुभूतादृष्टस्वभावभेदादेवेति स्वभावस्यादृष्टधर्मत्वं, वह्निरूर्ध्वमेव ज्वलति वायुस्तिर्यगेव गच्छतीत्यादिनियमो नियतादृष्टादेवेति नियमार्थं नियतेश्चादृष्टधर्मत्वमिति दिशा स्वभाव-नियत्योरदृष्टधर्मत्वमिति तेषामाशयः, **'अन्ये तु** अन्ये आचार्याः पुनः, **सामान्येनैव** दृष्टादृष्टसाधारण्येनैव, **सर्वस्य वस्तुनः** सर्वस्य पदार्थस्य स्वभावो नियतिश्च धर्माविति प्रचक्षते' इत्येवमन्वयः, यदि सामान्येन सर्ववस्तुधर्मौ स्वभाव-नियती कथं तर्हि स्वातन्त्र्येण कारण इत्याकाङ्क्षानिवृत्तये उपाध्यायाः कथयन्ति–"अत्र स्वभावस्तथाभव्यात्मिका जातिः कार्यैकजात्याय, नियतिश्चातिशयितपरिणतिरूपा कार्यातिशयाय सर्वत्रोपयुज्यत इति" ॥ ८१ ॥ १९३ ॥

व्याख्या श्रीहरिभद्रसूरिरचिता मूलार्थविद्योतिका,
भावार्थप्रकराञ्चिताऽतिगहनोपाध्यायजाताऽपरा ।
एवं सत्यपि तद्द्वयैकघटिताऽनन्याऽपि व्याख्या मया,
दृब्धा स्वीयमतिप्रचारचतुरा स्याद् बालबोधाप्तये ॥ १ ॥

श्रीमन्तो नेमिसूरीश्वरगुरुचरणाः सर्वतन्त्रस्वतन्त्राः,
दृष्ट्वेमां दर्शनानां विषयविदलने सुप्रगल्भां स्फुटार्थाम् ।
अन्तेवासीष्टसिद्ध्यै प्रमुदितमनसो भावयिष्यन्ति भव्यं,
स्वाध्यायस्तावताऽस्याः प्रसरतु सुगमो विज्ञवर्गेऽपविघ्नम् ॥ २ ॥
संपूर्णोऽयं द्वितीयः स्तबक इह सतां मोददानप्रगल्भः,
श्रीमल्लावण्यसूरिप्रथितवचनतो मन्दबुद्ध्याऽपि गम्यः ।
जैनानेकान्तचर्चाविदलितविषयैकान्तचर्चो नितान्तं,
श्रद्धां स्याद्वादशास्त्रे प्रगुणयतु शुभां धीधनानामधृष्याम् ॥ ३ ॥

इति श्रीतपोगच्छाधिपति-शासनसम्राट्-सर्वतन्त्रस्वतन्त्र-जगद्गुरुश्रीमद्विजयनेमिसूरीश्वर-पट्टालङ्कारेण व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्नेतिपदालङ्कृतेन विजय-लावण्यसूरिणा विरचितायां स्याद्वादवाटिकाभिधानायां शास्त्रवार्तासमुच्चय-टीकायां द्वितीयः स्तबकः समाप्तः ॥

## अथ तृतीयः स्तबकः ॥

सर्वा चर्चाऽपि लोके यदवगतिकृते सुप्रतीता बुधानां,
यं साक्षात्कर्तुमेकं शम-दमनिरता योगिनो भावयन्ति ।
उत्पाद्याद्यैरकल्प्यं निरुपममवरं स्वस्वरूपैकनिष्ठं,
यस्यैश्वर्यं तमीडे त्रिभुवनतिलकं वीरमाप्तं शरण्यम् ॥ १ ॥

अथ कार्यं प्रति प्रेरकत्वेनेश्वरोऽपि कारणमिति कारणकूटलक्षणसामग्र्यां सोऽपि प्रविशतीति वार्तान्तरमुपदर्शयति—

**ईश्वरः प्रेरकत्वेन, कर्ता कैश्चिदिहेष्यते ।**
**अचिन्त्यचिच्छक्तियुक्तोऽनादिशुद्धश्च सूरिभिः ॥ १ ॥१९४॥**

**ईश्वर** इति-नित्यज्ञानवान्, परमात्मेत्यर्थः, **प्रेरकत्वेन** परस्य चेतनस्य हितादि-कार्यप्रवृत्तिजनकत्वेन, जडस्य तु कार्यानुगुणक्रियाजनकत्वेन, **कर्ता** उपादानादि-गोचरापरोक्षज्ञानचिकीर्षाकृतिमान्, **कैश्चिदि**त्यस्य **सूरिभिरि**त्यनेनान्वयः, पातञ्जलाचार्यैरित्यर्थः, **इह** जगति, सामग्र्यां वा, द्वितीये घटकत्वं सप्तम्यर्थः, तस्य

कर्तेत्यनेनान्वयः, **इष्यते** अभ्युपगम्यते, कीदृशः स इत्यपेक्षायामाह—**अचिन्त्यचिच्छक्तियुक्त** इति—इन्द्रियादिकारणं विनाऽपि यथावत्सर्वविषयावगाहनस्वभावेत्यतश्चिन्तयितुम्-अस्यैतद्विषयनिबन्धनमेतस्मात् कारणादेतद्विषयनिबन्धनं पुनरन्यस्मादतः, इत्येवं विचारविषयीकर्तुमशक्या, या चिच्छक्तिश्चेतना, तया युक्तः-अविच्छेदेन तदाश्रयः, सर्वदा सर्वविषयकज्ञानवान्, तथा **अनादिसिद्धश्च** अमुकस्मिन् काले बन्धरहितत्वलक्षणसिद्धत्ववान् इति न, किन्तु सर्वदैव बन्धात्यन्ताभाववान्, नित्यमुक्त इति यावत्।

अत्र शिष्यबुद्धिवैशद्यायोपाध्यायैः पातञ्जलाद्यभिमतबन्धप्रभेदादिकमुपदर्शितमुल्लिख्यते—"त्रिविधो हि तैर्बन्ध उच्यते—प्राकृतिक-वैकारिक-दाक्षिणभेदात्, तत्र प्रकृतावात्मत्वज्ञानाद् ये प्रकृतिमुपासते तेषां प्राकृतिको बन्धः, यान् प्रतीदमुच्यते—

"पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः" [　　] इति, ये तु विकारानेव भूतेन्द्रिया-ऽहङ्कार-बुद्धीः पुरुषबुद्ध्योपासते तेषां वैकारिको बन्धः, यान् प्रतीदमुच्यते—

"दश मन्वन्तराणीह, तिष्ठन्तीन्द्रियचिन्तकाः।
भौतिकास्तु शतं पूर्णं, सहस्रं त्वाभिमानिकाः॥ १॥
बौद्धाः शतसहस्राणि, तिष्ठन्ति विगतज्वराः॥" [　　　] इति,

इष्टापूर्ते दाक्षिणो बन्धः, पुरुषतत्त्वानभिज्ञो हीष्टापूर्तकारी कामोपहतमना बध्यत इति; इयं च त्रिविधाऽपि बन्धकोटिरीश्वरस्य मुक्तिं प्राप्यापि भवे पुनरेष्यतां प्रकृतिलीनत्वज्ञानानां योगिनामिव नोत्तरा, नवा पूर्वा संसारिमुक्तात्मनामिव, इति निर्बाधमनादिसिद्धत्वम्; अत्र मुक्तिं प्राप्यापि भवे पुनरेष्यतां प्रकृतिज्ञानानां योगिनां यथोत्तरा बन्धकोटिः, यथा वा संसारिमुक्तात्मनां पूर्वा बन्धकोटिः, तथा ईश्वरस्योत्तरा त्रिविधाऽपि बन्धकोटिरुत्तरा न, नवा पूर्वाऽपीत्यन्वयार्थः, तथा चाह पतञ्जलिः—"क्लेश-कर्मविपाका-ऽऽशयैरपरामृष्टः पुरुषविशेष ईश्वरः" [ योगसूत्रे-१, २४ ] इति, क्लेशाः – अविद्या-ऽस्मिता-राग-द्वेषा-ऽभिनिवेशाः, कर्माणि-शुभा-ऽशुभानि, तद्विपाको-जात्यायुर्भोगाः, आशयाः-नानाविधास्तदनुगुणाः संस्काराः, तैरपरामृष्टोऽसंस्पृष्टः, सर्वज्ञतया भेदाग्रहनिमित्तकाऽविद्याऽभावात्, तस्या एव च सर्वहेतुसर्वक्लेशमूलत्वात्, तथा च सूत्रम्—"अविद्या क्षेत्रमुत्तरेषां प्रसुप्त-तनु-विच्छिन्नोदाराणाम्" [ योगसूत्रे २, ४ ] इति, अनभिव्यक्तरूपेणाव-

स्थानं सुप्तावस्था, अभिव्यक्तस्यापि सहकार्यभावात् कार्याजननं तन्ववस्था, अभिव्यक्तस्य जनितकार्यस्यापि केनचिद् बलवता सजातीयेन विजातीयेन वा लब्धवृत्तिकेनाभिभवाद् भविष्यद्वृत्तिकत्वेनावस्थानं विच्छिन्नावस्था, अभिव्यक्तस्य प्राप्तसहकारिसम्पत्तेरप्रतिबन्धेन लब्धवृत्तिकतया स्वकार्यकरत्वम्–उदारावस्था, तत्राऽऽद्यमवस्थाद्वयं प्रतिप्रसवाख्येन निर्बीजसमाधिना हीयते, अन्त्यं तु शुद्धसत्त्वमयेन भगवद्ध्यानेनेति, अविद्याभावात् तन्नाशजन्यं कथं तत्त्वज्ञानं तस्येति चेत्? अत एव नित्यं तत्, नित्यज्ञानवत्त्वादेव चायं कपिलप्रभृतिमहर्षीनामपि गुरुः" इति॥१॥१९४॥

ईश्वरे अन्यात्मतो वैशिष्ट्यख्यापनाय तद्गतानां ज्ञान-वैराग्यैश्वर्यधर्माणामप्रतिघत्वमुपदर्शयति–

**ज्ञानमप्रतिघं यस्य, वैराग्यं च जगत्पतेः।**
**ऐश्वर्यं चैव धर्मश्च, सह सिद्धं चतुष्टयम्॥ २॥ १९५॥**

**ज्ञानमप्रतिघमिति**–यस्य जगत्पतेर्ज्ञानं वैराग्यमैश्वर्यं धर्मश्चेति चतुष्टयमप्रतिघं सह सिद्धं चेति, ज्ञानं नित्यत्वेन सर्वविषयत्वात् क्वचिदपि प्रतिहतमनवगाहनस्वभावं न भवति; माध्यस्थ्यलक्षणं वैराग्यं च क्वचिदपि वस्तुनि रागाभावादप्रतिघम्; अणिमा-लघिमा-महिमा-प्राप्ति-प्राकाम्य-वशित्वेशित्व-यत्रकामावसायित्वभेदादष्टविधमैश्वर्यं पारतन्त्र्याभावादप्रतिघम्, यतो महानप्यणुर्भवति, सर्वभूतानामप्यदृश्यः, सोऽणिमा, यतो लघुर्भवति सूर्यरश्मीनप्यवलम्ब्य सूर्यलोकादिगमनसमर्थः स लघिमा, यतोऽल्पोऽपि नाग-नगादिमानो भवति स महिमा, यतो भूमिष्ठस्याप्यङ्गुल्यग्रेण गगनस्थादिवस्तुप्राप्तिः सा प्राप्तिः, प्राकाम्यमिच्छानभिघातः, यत उदक इव भूमावुन्मज्जति निमज्जति च, वशित्वं यतो भूतभौतिकेषु स्वातन्त्र्यम्, ईशित्वं यतस्तेषु प्रभव-स्थिति-व्ययानामीष्टे, यत्रकामावसायित्वंयतः सत्यसङ्कल्पता भवति, यथेश्वरसङ्कल्पमेव भूतभावादिति; धर्मश्च प्रयत्नसंस्काररूपोऽधर्माभावादप्रतिघः। एतच्चतुष्टयं **सह सिद्धम्** अन्यानपेक्षतयाऽनादित्वेन व्यवस्थितम्, जन्यधर्मानाश्रयत्वादेव स्वगतधर्मस्वरूपेणापि न नश्यतीत्यप्रच्युतानुत्पन्नस्थिरैकस्वभावत्वलक्षणं कूटस्थत्वं तस्य निर्वहतीति॥ २॥ १९५॥

तस्य कर्तृत्वं व्यवस्थापयति—

**अज्ञो जन्तुरनीशोऽयमात्मनः सुख-दुःखयोः।**
**ईश्वरप्रेरितो गच्छेत्, स्वर्गं वा श्वभ्रमेव वा॥ ३॥ १९६॥**

**अज्ञ** इति–स्वेष्टानिष्टप्रवृत्तिनिवृत्तिसाधनज्ञानलक्षणविवेकविकल इत्यर्थः, **जन्तुः** प्राणी, **अयं** भवे भ्रमणशीलत्वेन प्रत्यक्षत एवोपलभ्यमानः, संसारीति यावत्, **आत्मनः** स्वस्य, **सुख-दुःखयोः** चक्रपरिवर्तनवदनवरतं यथाक्रमं जायमान-सुख-दुःखयोः, इदमुपलक्षणं सुखदुःखसाधनविषयाणामपि, यत् स्वकर्तव्यं तत्र सर्वत्रेति यावत्, **अनीशः** अप्रभुः, कर्तुमकर्तुमन्यथा कर्तुं वा समर्थो न भवति, एतदुपपत्तये अज्ञ इति विशेषणम्, अज्ञानां पश्वादीनां प्रवृत्तिः परप्रेरणयैव भवतीत्यवधृततया **ईश्वरप्रेरितः** अस्येदं हितमिदं चाहितमित्येवं ज्ञात्वा परमेश्वरेण प्रेरितः सन्, **स्वर्ग**—

"यन्न दुःखेन संभिन्नं, न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च, तत् सुखं स्वःपदाऽऽस्पदम् ॥ १ ॥"

इत्येवंलक्षणलक्षितसुखविशेषोपभोगस्थानं, **वा** अथवा, **श्वभ्रमेव** निरन्त-सुखामिश्रितदुःखभोगैकस्थानं नरकमेव, **गच्छेत्** तत्रोत्पद्येत, न केवलं प्राणिन एवाज्ञस्य प्रेरक ईश्वरः किन्तु सर्वथा चैतन्यरहितत्वेन जडस्यापि कारणस्य स्वस्वकार्ये प्रतिनियतव्यापार ईश्वरप्रयत्नादेव अचेतनस्यापि वास्यादेश्चेतनाधिष्ठित-स्यैव छिदादिकार्यकरणत्वोपलब्धेः,

"मयाऽध्यक्षेण प्रकृतिः, सूयते स चराचरम् ।
तपाम्यहमहं सर्वं, निगृह्णाम्युत्सृजामि च ॥" [        ]

इत्यागमेन सर्वाधिष्ठानत्वं भगवतः श्रूयत इति पातञ्जलाः ।

नैयायिकास्तु वदन्ति—

"कार्या-ऽऽयोजन-धृत्यादेः, पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् सङ्ख्याविशेषाच्च, साध्यो विश्वविदव्ययः ॥ १ ॥"

[ कुसुमाञ्जलिपञ्चमस्तबके–१ ] इति ।

अस्यार्थः–कार्यादीश्वरसिद्धिः–कार्यं सकर्तृकं कार्यत्वादित्यनुमानात्, न च कर्तुरीश्वरस्य सिद्धावेव कृतिसाध्यत्वलक्षणं कार्यत्वं पृथिव्यादौ सिध्यति, ईश्वरस्तु नाद्यापि सिद्ध इति निरुक्तकार्यत्वलक्षणं साधनं पृथिव्यादावसिद्धमिति वाच्यं, कालवृत्त्यन्ताभावप्रतियोगित्वे सति प्रागभावप्रतियोगित्वे सति ध्वंसप्रतियोगित्वे सति वा सत्त्वस्य हेतुत्वात्, सत्यन्तत्रयमध्यादेकं सत्यन्तमुपादेयं, तत्र कालवृत्त्य-त्यन्ताभावप्रतियोगित्वे सतीति यदा निविशते, तदा तस्य ध्वंस-प्रागभावयोरपि

सत्त्वात् तयोश्च सकर्तृकत्वाभाव इति तावन्मात्रस्य हेतूकरणे व्यभिचारः स्यात् तद्वारणाय सत्त्वस्य विशेष्यतया प्रवेशः, प्रागभावप्रतियोगित्वे सतीत्यस्य यदा हेतौ प्रवेशस्तदा तावन्मात्रस्य हेतूकरणे तस्य ध्वंसे सत्त्वात् तत्र सकर्तृकत्वाभाव इति व्यभिचारवारणाय सत्त्वस्य तत्रोपादानम्, ध्वंसप्रतियोगित्वे सतीत्यस्य निवेशे तावन्मात्रस्य हेतूकरणे प्रागभावे व्यभिचार इति तद्वारणाय सत्त्वस्योपादानम्; कालवृत्त्यत्यन्ताभावप्रतियोगित्वे सतीत्यत्र कालवृत्तित्वमत्यन्ताभावे दैशिकविशेषणतासम्बन्धेन बोध्यम्, प्रतियोगित्वे च कालिकसम्बन्धावच्छिन्नत्वं विशेषणं देयम्, तेन सर्वस्यैव पदार्थस्य कालिकसम्बन्धेन कालवृत्तित्वमिति कालिकसम्बन्धावच्छिन्नात्मादिनित्यनिष्ठप्रतियोगिताकात्यन्ताभावस्य काले कालिकसम्बन्धेन वृत्तित्वेऽपि न नित्ये आत्मादौ व्यभिचारः, नित्ये कालिकायोगात् कालिकसम्बन्धावच्छिन्ननित्यनिष्ठप्रतियोगिताकात्यन्ताभावो नित्य एव प्रसिद्धः, न वा संयोगादिसम्बन्धावच्छिन्नात्मादिनित्यनिष्ठप्रतियोगिताकात्यन्ताभावस्य काले दैशिकविशेषणतया वृत्तेस्तत्प्रतियोगित्वेऽपि नित्ये व्यभिचारः, तथा चोभयत्र सम्बन्धविशेषस्य प्रवेशात् कालवृत्तित्वस्याधिकस्य प्रवेशाद् गौरवमतो लाघवात् प्रागभावप्रतियोगित्वे सतीति द्वितीयकल्पादरणम्; नवीनैः शिरोमण्यादिभिः प्रागभावानङ्गीकारात् तन्मतसाधारण्येन प्रागभावप्रतियोगित्वे सतीति विशेषणं न सम्भवतीति ध्वंसप्रतियोगित्वे सतीति तृतीयकल्पादरः। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वाच्च न कार्यस्य घटादेः सकर्तृत्वसिद्ध्यांशतः सिद्धसाधनं दोषः, पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरेव प्रतिबन्धकत्वेन पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरप्रतिबन्धकत्वेन तत्सत्त्वेऽपि निरुक्तानुमितिः संभवत्येव, पक्षतावच्छेदकावच्छेदेन साध्यानुमितौ च पक्षतावच्छेदकव्यापकसाध्यप्रतियोगिकसाध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वं पक्षे भासते, पक्षतावच्छेदकहेतुत्वेऽपि तत्र साध्यसामानाधिकरण्यमेव व्याप्तिज्ञाने भासते इति व्याप्तिग्रहे सति व्याप्तिघटकतया कार्यत्वं सकर्तृकत्वसमानाधिकरणमिति सहचारग्रहेऽपि कार्यं सकर्तृकमित्यनुमित्यात्मकबुद्धेरभावात् पक्षतावच्छेदकस्य हेतुत्वेऽपि न क्षतिः; ननु तथाऽपि सकर्तृकत्वं यदि कर्तृसहितत्वं तदाऽस्मदाद्यात्मलक्षणकर्त्रा व्यापकीभूतेन सहितत्वस्य संयोगित्वलक्षणस्य कार्यमात्रे सत्त्वात् सिद्धसाधनात्, यदि च कर्तृजन्यत्वं सकर्तृकत्वं, तदा कार्यमात्रस्यादृष्टजन्यत्वेनादृष्टद्वाराऽस्मदाद्यात्मलक्षणकर्तृजन्यत्वसद्भावात् सिद्धसाधनम्, तथा कार्यं प्रति स्वोपादानगोचरा-

परोक्षज्ञानादेरेव कारणत्वेन कर्तुरजनकतया कार्यमात्रे कर्तृजन्यत्वाभावाद् बाधोऽपीति चेत्?, न—कार्यत्वेन हेतुना प्रत्यक्षजन्यत्वेच्छाजन्यत्वादेरेव साधनीयत्वेनोक्तदोषाभावात्; न चैवमपि अस्मदादिज्ञानस्यादृष्टद्वारा जन्यमेव कार्यजातमिति सिद्धसाधनं तदवस्थमेवेति वाच्यम्, अदृष्टाद्वारकज्ञानादिजन्यत्वस्यैव साध्यत्वात्; अथवा विशेष्यत्वसम्बन्धावच्छिन्नज्ञानादिनिष्ठजनकतानिरूपितसमवायसम्बन्धावच्छिन्नजन्यत्वमेव साध्यम्, अस्मदादिज्ञानादिनिष्ठजनकता च स्वजन्यादृष्टवदात्मसंयोगादिसम्बन्धावच्छिन्ना, न तु विशेष्यत्वसम्बन्धावच्छिन्नेति नोक्तसिद्धसाधनावकाशः, अत एव नास्मदादिज्ञानजन्यत्वमादायार्थान्तरमपि। अथ यत्र यत्र सकर्तृकत्वं तत्र शरीरजन्यत्वं, यत्र यत्र कार्यत्वं तत्र शरीरजन्यत्वमिति नियमो नास्ति क्षित्यादौ व्यभिचारादित्येवं साध्यव्यापकत्वे सति साधनाव्यापकत्वाच्छरीरजन्यत्वमत्रोपाधिः; न चाङ्कुरादौ सकर्तृकत्वं नास्तीति न निश्चयः किन्तु सकर्तृत्वस्य सन्देह एव, तत्र शरीरजन्यत्वं नास्तीति निश्चय एवेति सकर्तृकत्ववत्तया संदिग्धे शरीरजन्यत्वरूपोपाधेरभावनिश्चयान्न साध्यव्यापकत्वनिश्चयस्तत्रेति वाच्यम्, इत्थं साध्यव्यापकतानिश्चयाभावेऽप्यङ्कुरादौ साध्यव्यापकतासंदेहेन शरीरजन्यत्वस्य सन्दिग्धोपाधितासम्भवात्, संदिग्धोपाधिशरीरजन्यत्वव्यभिचारेण कार्यत्वे सकर्तृकत्वव्यभिचारसंशयतोऽनुमानप्रतिबन्धसम्भवात्, व्यभिचाराभावाप्रकारकव्यभिचारप्रकारकहेतुविशेष्यकज्ञानत्वरूपव्यभिचारनिश्चयत्वापेक्षया व्यभिचारप्रकारकहेतुविशेष्यकज्ञानत्वेनैव व्यभिचारज्ञानस्य व्याप्तिज्ञानं प्रति प्रतिबन्धकत्वात्, यद्यपि कार्यत्वस्य पक्षतावच्छेदकत्वेऽङ्कुरस्यापि पक्षत्वमेव जन्यक्षितित्वस्य पक्षतावच्छेदकत्वेऽङ्कुरस्य पक्षत्वाभावेऽपि संदिग्धं साध्यं यथा जन्यक्षितौ तथाऽङ्कुरेऽपीति साध्यप्रकारकसंदेहविशेष्यत्वेन पक्षसमत्वमङ्कुरस्य, उभयथाऽपि व्यभिचारशङ्कानिवर्तकतर्काभावे तत्र व्यभिचारसंशयस्य दोषत्वादिति चेत्? न—प्रकृते ज्ञानत्वादि-कार्यत्वाभ्यां हेतुहेतुमद्भावनिश्चयात्, लाघवतर्कावतारे तदुपाधिसंशयस्याविरोधित्वात्, अनुकूलतर्कानवतार एव संदिग्धोपाधेर्व्यभिचारसंशयाधायकत्वात्, अनुकूलतर्कावतारे सत्यपि संदिग्धोपाधेर्व्यभिचारसंशयाधायकत्वे पर्वतो वह्निमान् धूमादिति प्रसिद्धानुमानेऽपि पर्वते वह्निसंदेहेन पर्वतेतरत्वे वह्निव्यापकत्वसंदेहेन सन्दिग्धोपाधित्वेन पर्वते संदिग्धोपाधिपर्वतेतरत्वव्यभिचारेण धूमे वह्निव्यभिचारसंशयतो व्याप्तिग्रहप्रतिबन्धाद् वह्न्यनुमानस्याप्युच्छेदप्रसङ्गादित्येके आमनन्ति।

परे तु—"स्वोपादानगोचरा या स्वजनकादृष्टाजनिका कृतिस्तदजन्यं समवेतं

जन्यं स्वोपादानगोचरस्वजनकादृष्टजनकान्यापरोक्षज्ञान-चिकीर्षाकृतिजन्यम्, कार्यत्वात्, अत्र प्रथमजन्यान्तेन पक्षनिर्देशः, द्वितीयजन्यान्तेन साध्यनिर्देश इति बोध्यम्, अत्र समवेतं जन्यमित्येतावन्मात्रस्य पक्षीकरणे घटादिरपि पक्षः स्यात्, तत्र स्वोपादानगोचरस्वजनकादृष्टजनकान्यापरोक्षज्ञानचिकीर्षाकृतिजन्यत्वं सिद्धमेव, कुलालाऽपरोक्षज्ञान-चिकीर्षा-कृतीनां घटाद्युपादानगोचरत्वाद् घटादिजनकादृष्टजनकान्यत्वाच्च तज्जन्यत्वं घटादौ समस्तीत्यंशतः सिद्धसाधनं स्यात्, तद्वारणाय तदजन्यान्तमिति, तस्य स्वोपादानगोचर-स्वजनकादृष्टाजनककृतिजन्यं यत् स्वं तद्भिन्नमित्यर्थः, तेन द्व्यणुकादेरपि पक्षत्वं सम्भवति, यतः स्वं घटादि तदुपादानगोचर-घटादिजनकादृष्टाजनककुलालकृतिजन्यं यत् स्वं तद्घटादि तद्भिन्नं द्व्यणुकादि भवतीति, अन्यथा तदजन्यस्यैव स्वपदेन ग्रहणे द्व्यणुकादिकं ग्रहीतुं न शक्यते, यतः स्वं द्व्यणुकादि तदुपादानं परमाण्वादि तद्गोचरा द्व्यणुकाजनकादृष्टाजनिका काऽपि कृतिर्न संभवति, अस्मदादिकृतेः परमाण्वादिगोचरत्वाभावात्, ईश्वरकृतेश्च परमाण्वादिगोचरत्वेऽपि द्व्यणुकादिजनकादृष्टजनकत्वस्यैव भावेन तादृशादृष्टाजनकत्वाभावादिति तादृशकृत्यप्रसिद्ध्या तदजन्यमप्रसिद्धं स्यादिति स्वपदेन द्व्यणुकादेरग्रहणे तस्य पक्षत्वाभावः प्रसज्येतेति, प्रतियोगिकोटौ स्वोपादानगोचरेत्यस्याप्रवेशे शब्दफूत्कारादेः पक्षत्वं न स्यात्, यतः स्वपदेन शब्दफूत्कारादिकं ग्रहीतुं शक्यते तज्जनकादृष्टाजनिका कृतिर्मृदङ्गादिगोचरकृतिस्तज्जन्यं यत् स्वं तच्छब्दादि तद्भिन्नं शब्दादि न भवतीति शब्दफूत्कारादेरपक्षत्वे संदिग्धसाध्यकत्वेन तत्रानैकान्तिकत्वसंशयः स्यादतः प्रतियोगिकोटौ स्वोपादानगोचरेत्यस्य प्रवेशः, एवं च स्वपदेन शब्द-फूत्कारादेर्ग्रहणं न संभवति, अस्मदादिकृतेस्तदुपादानगगनवाय्वादिगोचरत्वाभावात्, ईश्वरकृतेस्तदुपादानगगनवाय्वादिगोचरत्वेऽपि शब्दफूत्कारादिजनकादृष्टजनकत्वस्यैव भावेन तादृशादृष्टाजनकत्वाभावात्, तादृशकृतिजन्यं घटाद्येव तद्भिन्नं शब्दफूत्कारादीति तस्य पक्षत्वमुपपन्नं; प्रतियोगिकोटौ स्वजनकादृष्टाजनकेति कृतिविशेषणतयाऽनुपादाने यद्यपि कृतौ जन्यत्वविशेषणमुपादेयमेव, अन्यथा स्वपदेन जन्यसमवेतमात्रस्यैव ग्रहणं भवेत्, तदुपादानगोचरेश्वरकृतिजन्यत्वस्य सद्भावान्न द्व्यणुकादीनां पक्षत्वं स्यात्, तथाऽप्यस्त्वीश्वरकृतिवारणाय जन्येति विशेषणं, तद्वारणाय स्वजनकादृष्टाजनकेति न प्रवेश्यम्, तत्र तदप्रवेशे मन्त्रविशेषपाठपूर्वकस्पर्शजन्यकांश्यादिगमनस्य स्पर्शजन्यादृष्टद्वारा स्वोपादानकांश्यगोचरस्पर्शजनककृतिजन्यस्यापक्षत्वे तत्र संदिग्धानैकान्ति-

कत्वं स्यात्, एवं स्वोपादानशरीरगोचरोर्ध्वचरणादितपःकृतिजन्यकाल-शरीरीय-गौररूपादौ संदिग्धानैकान्तिकत्वं स्यात्, अतः प्रतियोगिककोटौ स्वजनकादृष्टाजनकेति प्रवेशः, एवं च कांश्यचालनादिकं स्वजनकादृष्टजनकजन्यकृतिजन्यमेव न तु स्वजनकादृष्टाजनककृतिजन्यमिति स्वपदेन तद्ग्रहणं न सम्भवति, किन्तु तदन्येषामेव घटादीनां, तद्भिन्नं च कांश्यचालनादिकमिति भवति तस्य पक्षत्वम्, ध्वंसोऽपि तादृशकृतिजन्यभिन्नो जन्यश्चेति तस्य पक्षत्वे तत्र साध्याभावादंशतो बाधः स्यात्, तद्वारणाय समवेतमिति, ध्वंसस्य समवेतत्वाभावान्न पक्षत्वमिति तत्र निरुक्तसाध्याभावेऽपि न क्षतिः, गगनैकत्वादिकं च नित्यत्वादेव न तादृशकृतिजन्यं गगनादौ समवेतं चेति तस्य पक्षत्वे तत्र निरुक्तसाध्याभावादंशतो बाध इति तद्वारणाय जन्यमिति, तस्य जन्यत्वाभावान्न पक्षत्वमिति तत्र निरुक्तसाध्याभावेऽपि न दोषः, एवं तत्र कार्यत्वहेतोरभावेऽपि न स्वरूपासिद्धिः। साध्ये स्वोपादानगोचरेत्यस्यापरोक्षज्ञानचिकीर्षाकृतिविशेषणतयाऽप्रवेशे प्रागुक्तदिशा पक्षतावच्छेदकाक्रान्तत्वेन पक्षीभूते शब्दफूत्कारादौ स्वजनकादृष्टजनकान्यमृदङ्गादिगोचरास्मदाद्यपरोक्षज्ञानचिकीर्षाकृतिजन्यत्वस्य सिद्धत्वेनांशतः सिद्धसाधनं स्यात्, तद्वारणायापरोक्षज्ञानादिविशेषणतया स्वोपादानगोचरेत्यस्योपादानम्, अस्मदाद्यपरोक्षज्ञान-चिकीर्षा-प्रयत्नाश्च न शब्दोपादानगगनफूत्कारोपादानवाय्वादिगोचरा इति न सिद्धसाधनम्, मन्त्रविशेषपाठपूर्वकस्पर्शजन्यकांश्यादिगमनादौ चोक्तदिशा पक्षतावच्छेदकाक्रान्तत्वात् पक्षीभूते तदुपादानकांश्यादिगोचरास्मदाद्यपरोक्षज्ञानचिकीर्षाकृतिजन्यत्वस्य सिद्धत्वेनांशतः सिद्धसाधनं स्यात् तद्वारणाय स्वजनकादृष्टजनकान्येत्यपरोक्षज्ञानचिकीर्षाकृतिविशेषणतयोपात्तम्, तत्रास्मदाद्यपरोक्षज्ञान-चिकीर्षा-कृतीनां कांश्यादिचालनजनकादृष्टजनकत्वेन तादृशजनकान्यत्वविरहान्न सिद्धसाधनावकाशः; न च पक्षे साध्ये च स्वोपादानगोचरेति न प्रवेश्यं, मृदङ्गादिगोचरकृतिजन्यशब्दादिस्तु पक्षबहिर्भूत एव दृष्टान्तोऽस्त्विति वाच्यम्, अदृष्टेतरव्यापारद्वाराऽस्मदादिकृतिजन्यत्वसिद्ध्याऽर्थान्तरवारणाय साध्ये तन्निवेशावश्यकत्वे, शब्दादावनैकान्तिकत्वसंशयवारणाय पक्षेऽपि तन्निवेशावश्यकत्वात्, तादृशशब्दादिकर्तृतयाऽपि भगवत्सिद्ध्ये पक्षे तन्निवेशेंऽशतः सिद्धसाधनवारणाय साध्ये तन्निवेशावश्यकत्वाच्च। मन्त्रविशेषपाठपूर्वकस्पर्शजन्यकांश्यचालनादिकर्तृतयाऽपीश्वरसिद्ध्यर्थं पक्षे स्वजनकादृष्टजनकान्यत्वविशेषणोपादानस्यावश्यकर्तव्यत्वे साध्येऽपि स्वजनकादृष्टजनकान्यत्वनिवेशस्यावश्यकत्वात्, यदि च स्वजनकादृष्टजनककृतेर्न

स्वजनकत्वं मानाभावादिति विभाव्यते तदा पक्षे स्वजनकादृष्टजनकान्यत्वं नोपादेयं, तदन्तरेणापि तादृशकांश्यादिगमनस्य स्पर्शजन्यादृष्टद्वारा स्वोपादानकांश्यगोचरस्पर्शजनकजन्यकृतिजन्यत्वाभावेन पक्षत्वसंभवेन तत्र संदिग्धानैकान्तिकत्वस्यादोषत्वात्, साध्ये तु स्वजनकादृष्टजनकान्यत्वमुपादेयमेव, अन्यथा सर्गान्तरीयज्ञानादीनां द्व्यणुकाद्युपादानागोचरत्वेन द्व्यणुकादौ सिद्धसाधनाभावेऽपि मन्त्रविशेषपाठपूर्वकस्पर्शजन्यकांश्यादिगमनादावदृष्टजनककृतिजन्यत्वसिद्ध्याऽर्थान्तरतापत्तेर्वस्तुगत्या स्वोपादानगोचरकृतिजन्यं यत् तत्त्वावच्छिन्नभेदकूटवत्त्वेन कांश्यचालनादेरपि पक्षान्तर्गतत्वात्" इत्याहुः, अत्रेश्वरज्ञान-चिकीर्षाकृतीनां जन्यमात्रजनकत्वे स्वजनकादृष्टजनकत्वमप्यस्तीति कथं स्वजनकादृष्टजनकान्यत्वमिति नाऽऽशङ्क्यम्, अदृष्टस्य व्यापारत्वनिर्वाहकं यत् समवायसम्बन्धेनादृष्टं प्रति समवायसम्बन्धेन जनकत्वं तदेवात्र प्रविष्टम्, ईश्वरज्ञानादीनां तु न समवायसम्बन्धेनादृष्टं प्रति समवायसम्बन्धेन कारणत्वम्, ईश्वरेऽदृष्टाभावात्, किन्तु जीवगतादृष्टं प्रत्येव तथा, तत्र च कारणतावच्छेदकसम्बन्धः स्वाश्रयसंयोगादिरेवेति।

अन्ये तु—"जन्यद्रव्याणि ज्ञानेच्छा-कृतिमन्ति, कार्यत्वात्, कपालवत्, अत्र साध्यतावच्छेदकसम्बन्धो विशेष्यत्वं, हेतुतावच्छेदकसम्बन्धः स्वरूपसम्बन्धः, पक्षे जन्यत्वविशेषणोपादानादात्मादिनित्यद्रव्ये निरुक्तसाध्य-साधनयोरभावेऽपि नांशतो बाध-स्वरूपासिद्धी; यदि च कपालं घटोपादानमिति ज्ञानं, कपालं घटवज्जायतामितीच्छा, कपालं घटवदिति कपालविशेष्यकघटप्रकारककृतिश्च घटस्य कारणम्, एवं पटादीनामपि, तदा कपालवदिति दृष्टान्तस्वारस्याद् द्रव्याणीत्येव पक्षः, हेतुश्च समवायसम्बन्धेन कार्यवत्त्वं समवायसम्बन्धावच्छिन्नकार्यनिष्ठनिरूपकतानिरूपिताधिकरणत्वं, साध्यतावच्छेदकहेतुतावच्छेदकसम्बन्धौ चोपदर्शितावेव, कार्यवत्त्वादित्यस्य स्थाने कार्यादित्येवं हेतोरुपादाने समवायसम्बन्ध एव हेतुतावच्छेदकसम्बन्धः, नित्यद्रव्येऽप्यात्मादौ ज्ञानादिगुणानां मनसि च परत्वादिगुणस्य कर्मणश्चोत्पादान्न बाधस्वरूपासिद्धी। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्नांशतः सिद्धसाधनम्; न च बहिरिन्द्रियग्राह्यत्वमुपाधिः, तस्य कपालादौ साध्यव्यापकत्वं, द्व्यणुकादौ च साधनाव्यापकत्वमिति वाच्यम्, अनुकूलतर्केण प्रकृतहेतोः प्रकृतसाध्यव्याप्यत्वनिर्णये उपाधेरनवकाशात्, न च ज्ञान-चिकीर्षा-प्रयत्नानां प्रत्येकरूपेणैव ज्ञानत्वादिना कार्यं प्रति कारणत्वं न तु मिलितत्वेनेति मिलितस्य त्रितयस्य ज्ञानेच्छायत्नस्य साध्यत्वे कार्यकारणभावरूपानुकूलतर्काभावादप्रयोजकत्वं, प्रत्येकं तेषां साध्यत्वे

ज्ञानेच्छावत्त्वेन साधने सर्गान्तरीयज्ञानादिना सिद्धसाधनमिति वाच्यम्, मिलितत्वेन साध्यत्वेऽपि कार्यकारणभावत्रयस्य प्रयोजकत्वात्; न च मिलितमपि निरुक्तत्रितयमपि सर्गान्तरीयज्ञानादिकमादाय समस्त्येवेति सिद्धसाधनं तदवस्थमिति वाच्यं, कृतेरव्यवहितपूर्ववर्त्तिन एव जनकत्वेन सर्गान्तरीयकृतिमत्त्वस्यैतत्सर्गीयद्रव्येऽभावात्, ज्ञानेच्छयोरपि जन्ययोः स्वजन्यकृतिद्वारेणैव कारणत्वेनैतत्सर्गीयकृतेस्तज्जन्यत्वाभावेन तद्व्यापारत्वासम्भवात् सर्गान्तरीयज्ञानेच्छाभ्यां सममेतत्सर्गीयकृतेरेतत्सर्गकार्योपयोगिमिलनासम्भवात्; न चैवं सिद्धसाधनाभावेऽपि सर्गान्तरीयज्ञानादिमत्त्वसाधनतोऽर्थान्तरमेवास्त्विति वाच्यं, सर्गाद्यकालीनं द्रव्यं ज्ञानवत्, कार्यत्वादित्येवमनुमाने पक्षतावच्छेदककालावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् सर्गाद्यकालेऽस्मदादीनां ज्ञानाभावात् पूर्वसर्गीयज्ञानादेः सर्गाद्यकालीनद्रव्ये कथमपि जनकत्वासम्भवादीश्वरज्ञानवत्त्वमादायैवोक्तानुमितेः सम्भवः" इत्यप्याहुः ॥

'क्षित्यादिकं सकर्तृकं कार्यत्वात्' इत्येवानुमानम्, न च क्षित्यादीत्यत्रादिपदाद् यस्य कस्यचिदङ्कुरादेः परिग्रहे तदन्यस्मिन् कार्ये सकर्तृकत्वं न सिद्ध्येत्, तदन्यकार्यकर्तृतयाऽपीश्वरसिद्धिराकाङ्क्षिता, प्रत्येकं पक्षत्वे युगसहस्रेणापि प्रत्येकं सकलकार्याणामुपादानासम्भवात् सकलविवादापन्नकार्यकर्तृत्वेनाभिमताया ईश्वरसिद्धेरभावः स्यादिति वाच्यं, प्रकृतविचारानुकूलविवादविषयत्वेन क्षित्यादीनामनुगमसम्भवात्; न च ज्ञानादीनामेव कार्यं प्रति कारणत्वं न कर्तुरिति कर्त्रा समं क्षित्यादीनां कार्यकारणभावसम्बन्धासम्भवात् कर्तृनिरूपितसम्बन्धलक्षणं सकर्तृकत्वं दुर्निरूपमिति वाच्यं, घटः कुलालकर्तृकः पटस्तन्तुवायकर्तृक इत्यादिव्यवहारसाक्षिकस्य घटादिदृष्टान्तदृष्टस्य नित्यवर्गव्यावृत्तस्य प्रतिनियतकर्तृनिरूपितसम्बन्धलक्षणस्य सकर्तृकत्वस्य विशिष्य ख्यातुमशक्यत्वेऽपि प्रत्याख्यातुमशक्यत्वादित्यपि केचित् ।

आयोजनादपीश्वरसिद्धिः, आयुज्यते–संयुज्यतेऽन्योऽन्यं द्रव्यमनेनेत्यायोजनं, द्व्यणुकारम्भकसंयोगजनकं सर्गाद्यकालीनपरमाणुकर्मात्र विवक्षितं, 'तत् प्रयत्नजन्यं कर्मत्वात्, अस्मदादिशरीरकर्मवत्' इत्यनुमानात्; परमाणोरेव तादृशप्रयत्नवत्त्वे जडताहानिः स्यात्, समवायेन प्रयत्नं प्रति समवायेन ज्ञानेच्छयोः कारणत्वेन समवायेन ज्ञानवत्त्वे सत्येव तत्र प्रयत्नवत्त्वं भवेत्, तथा च ज्ञानशून्यत्वलक्षणं जडत्वं तत्र न स्यात्, दृष्टहेत्वनपेक्षस्यादृष्टस्यैव सर्गाद्यकालीनपरमाणुकर्मकारणत्वं तु न युक्तिसहं, तथा सति कार्यमात्रं प्रति दृष्टहेत्वनपेक्षस्यादृष्टस्य हेतुत्वसम्भवाद् दृष्टहेतूनामुच्छेदप्रसङ्गात् । ननु चेष्टात्वमेव प्रयत्नजन्यतावच्छेदकमिति यत्र

प्रयत्नजन्यत्वं तत्र चेष्टात्वं, क्रियात्वं च परमाणुक्रियायामप्यस्ति तत्र न चेष्टात्वमित्येवं साध्यव्यापकत्वे सति साधनाव्यापकत्वरूपोपाधिलक्षणाक्रान्तत्वाच्चेष्टात्वमुपाधिरिति चेत्? किं तत्? प्रयत्नजन्यक्रियात्वं चेष्टात्वमिति चेत्? प्रयत्नजन्यक्रियात्वमेव साध्यं तस्यैव तत्साधने उपाधित्वासम्भवात्, हेतुव्यापकतयाऽभिमतस्यैव साध्यतयाऽभिमतत्वेन हेतुव्यापकस्य साध्यस्य साधनाव्यापकत्वाभावेनोपाधिलक्षणानाक्रान्तत्वात्; हिता-ऽहितप्राप्ति-परिहारफलकक्रियात्वं चेष्टात्वमिति चेत्? न–विषभक्षणा-ऽहिलङ्घनादीनामपि चेष्टात्वेन लक्ष्यतया तेषु हिता-ऽहितप्राप्ति-परिहारफलकत्वाभावेनाव्याप्तेः; शरीरसमवायिक्रियात्वं चेष्टात्वमिति चेत्? न–मृतशरीरक्रियायामपि शरीरसमवायिक्रियात्वं समस्ति, न च सा चेष्टेत्यलक्ष्ये लक्षणगमनादतिव्याप्तेः; जीवच्छरीरसमवायिक्रियात्वं चेष्टात्वमिति चेत्?, न–नेत्रस्पन्दादेरतथात्वात्; स्पर्शवद्द्रव्यान्तराप्रेरणे सति शरीरक्रियात्वं चेष्टात्वम्, शरीरपदोपादानान्न ज्वलन-पवनादिक्रियाऽतिव्याप्तिरिति चेत्? न–शरीरत्वं चेष्टावत्त्वं, चेष्टात्वं च स्पर्शवद्द्रव्यान्तराप्रेरणे सति शरीरक्रियात्वमित्येवमन्योऽन्याश्रयात्; चेष्टात्वं सामान्यविशेषो यत उन्नीयते प्रयत्नपूर्विकेयं क्रियेति चेत्?, न–क्रियामात्रेण तदुन्नयनात्, तदुक्तं कुसुमाञ्जलावुदयनाचार्येण—

"स्वातन्त्र्ये जडताहानिर्निर्दिष्टं दृष्टघातकम्।
हेत्वभावे फलाभावो, विशेषस्तु विशेषवान्" ॥ १ ॥

परमाण्वादयो हि चेतनायोजिताः प्रवर्तन्ते, अचेतनत्वात्, वास्यादिवत्, अन्यथा कारणं विना कार्यानुत्पत्तिप्रसङ्गः, अचेतनक्रियायाश्चेतनाधिष्ठानकार्यत्वावधारणात्, क्रियाविशेषविश्रान्तोऽयमर्थो न तु तन्मात्रगोचरः; चेष्टा हि चेतनाधिष्ठानमपेक्षते इति चेत्?, अथ केयं चेष्टा नाम?, यदि प्रयत्नवदात्मसंयोगासमवायिकारणिका क्रिया प्रयत्नमात्रकारणिका वेति विवक्षितं, तन्न–तस्यैव तत्रानुपाधित्वात्; अथ हिताहितप्राप्तिपरिहारफलत्वं तत्त्वम्, तन्न–विषभक्षणोद्बन्धनाद्यव्यापनात्; इष्टानिष्टप्राप्तिपरिहारफलत्वमिति चेत्?, कर्तारं प्रत्यन्यं वा, उभयथाऽपि परमाण्वादिक्रियासाधारण्यादविशेषः, भ्रान्तसमीहाया अतथाभूताया अपि चेतनव्यापारापेक्षणाच्च; शरीरसमवायिक्रियात्वं तदिति चेत्?, न–मृतशरीरक्रियाया अपि चेतनत्वप्रसक्तेः; जीवत इति चेत्?, न–नेत्रस्पन्दादेश्चेतनाधिष्ठानाभ्युपगमप्रसङ्गात्; स्पर्शवद्द्रव्यान्तराप्रयोगे सतीति चेत्?, न–ज्वलन-पवनादौ तथाभावाभ्युपगमापत्तेः; शरीरस्य स्पर्शवद्द्रव्यान्तराप्रयुक्तस्येति चेत्?, न–चेष्टयैव

शरीरस्य लक्ष्यमाणत्वात्, सामान्यविशेषश्चेष्टात्वं, यत उन्नीयते प्रयत्नपूर्विकेयं क्रियेति चेत् ?, न–क्रियामात्रेणैव तदुन्नयनात्; भोक्तृबुद्धिमत्पूर्वकत्वं यत इति चेत् ?, तर्हि तद्विश्रान्तत्वमेव तस्य, न चैतावतैव क्रियामात्रं प्रत्यचेतनमात्रस्य चेतनाधिष्ठानेन व्याप्तिरपसार्यते, विशेषस्य विशेषं प्रति प्रयोजकतया सामान्यव्याप्तिं प्रत्यविरोधकत्वात्, अन्यथा सर्वसामान्यव्याप्तेरुच्छेदादित्युक्तम्; एतेनाशरीरत्वादिना सत्प्रतिपक्षत्वमपास्तम्; अत्राप्यागमसंवादः—

"यदा स देवो जागर्ति, तदेदं चेष्टते जगत् ।
यदा स्वपिति शान्तात्मा, तदा सर्वं निमीलति ॥ १ ॥
अज्ञो जन्तुरनीशोऽयमात्मनः सुख-दुःखयोः ।
ईश्वरप्रेरितो गच्छेत्, स्वर्गं वा श्वभ्रमेव वा ॥ २ ॥
मयाऽध्यक्षेण प्रकृतिः, सूयते सचराचरम् ।
तपाम्यहमहं वर्षं, निगृह्णाम्युत्सृजामि च ॥ ३ ॥" इत्यादि ।

अत्र जागर-स्वापौ सहकारिलाभालाभौ, ईश्वरप्रेरणायामज्ञत्वमप्रयतमानत्वं च हेतू दर्शितौ परमाण्वादिसाधारणौ, स्वर्ग-श्वभ्रे चेष्टानिष्टोपलक्षणे, एतदेव सर्वाधिष्ठानमुत्तरत्र विभाव्यते–मयेत्यादिना, न केवलं प्रेरणायामधिष्ठाता, अपि तु प्रतिरोधेऽपि, यो हि यत्र प्रभवति, स तस्य प्रेरणावद् धारणेऽपि समर्थः, यथाऽर्वाचीनः शरीर-प्राणधारणयोरिति दर्शितं–"तपामीत्यादिना", अत्राप्यागम इत्यत्रापिना कार्यहेतुकेश्वरसिद्धौ य आगमसंवादः स्वयमुपदर्शितः प्राक् तस्य सूचनम्, स चेत्थमुल्लिखितः–"तमिममर्थमागमः संवदति विसंवदति च परेषां विचारम्–

"विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतःपात् ।
संबाहुभ्यां धमति सम्पतत्रैर्द्यावा-भूमी जनयन् देव एकः" [ श्वेताश्व. उ. ३।३ ]

अत्र प्रथमेन सर्वज्ञत्वं चक्षुषा दृष्टेरुपलक्षणात्, द्वितीयेन सर्ववक्तृत्वं मुखेन वागुपलक्षणात्, तृतीयेन सर्वसहकारित्वं बाहुना सहकारित्वोपलक्षणात्, चतुर्थेन व्यापकत्वं पदा व्याप्तेरुपलक्षणात्, पञ्चमेन धर्माधर्मलक्षणप्रधानकारणत्वं, तौ हि लोकयात्रावहनाद् बाहू, षष्ठेन परमाणुरूपप्रधानाधिष्ठेयत्वं, ते हि गतिशीलत्वात् पतत्रव्यपदेशाः पतन्तीति, सन्धमति सञ्जनयन्निति च व्यवहितोपसर्गसम्बन्धः, तेन संयोजयति समुत्पादयन्नित्यर्थः, द्यावा इत्यूर्ध्वसप्तलोकोपलक्षणं, भूमीत्यधस्तात्, 'एकः' इत्यनादितेति, स्मृतिरपि–

"अहं सर्वस्य प्रभवः, मत्तः सर्वं प्रवर्तते" [भ. गी. १०।८] इत्यादि;

"एतेन ब्रह्मादिप्रतिपादका आगमा बोद्धव्याः" इति ।

धृतेरपीश्वरसिद्धिः, तथाहि-ब्रह्माण्डादिपतनाभावः पतनप्रतिबन्धकप्रयुक्तः धृतित्वात्, उत्पतत्पतत्रिपतनाभाववत्, तत्पतत्रिसंयुक्ततृणादिधृतिवद्वा; एतेनेन्द्राग्नियमादिलोकपालप्रतिपादका आगमा अपि व्याख्याताः, तेषां तदधिष्ठानदेशानामीश्वरावेशेनैव पतनाभाववत्त्वात्, तथा च श्रुतिः—"एतस्य चाक्षरस्य प्रशासने गार्गि! द्यावा-पृथिव्यौ विधृते तिष्ठतः" [बृह. उ. ३।८।९] इति, प्रशासनं—दण्डभूतः प्रयत्नः, आवेशस्तच्छरीरावच्छिन्नप्रयत्नवत्त्वमेव, सर्वावेशनिबन्धन एव च सर्वतादात्म्यव्यवहारः "आत्मैवेदं, सर्वं, ब्रह्मैवेदं सर्वम्" [छां. उ. ७।२५।२] इत्यादिः । कार्यायोजनधृत्यादेरित्यत्राऽऽदिपदान्नाशस्य ग्रहणं; तथा च नाशादपि ईश्वरः सिध्यति, तथाहि-ब्रह्माण्डनाशः प्रयत्नजन्यो नाशत्वात्, पाट्यमानपटनाशवदिति; उदयनाचार्यास्तूक्तमेवार्थमित्थं परिष्कृत्याहुः-तथाहि-"धृतेः खल्वपि क्षित्यादि ब्रह्माण्डपर्यन्तं हि जगत् साक्षात् परम्परया वा विधारकप्रयत्नाधिष्ठितं गुरुत्वे सत्यपतनधर्मकत्वात्, वियति विहङ्गमशरीरवत्, तत्संयुक्तद्रव्यवच्च; एतेन इन्द्राग्नियमादिलोकपालप्रतिपादका अप्यागमा व्याख्याताः, सर्वावेशनिबन्धनश्च सर्वतादात्म्यव्यवहारः, आत्मैवेदं सर्वमिति, यथा एक एव मायावी अश्वो वराहो व्याघ्रो वानरः किन्नरो भिक्षुस्तापसो विप्र इत्यादि; अदृष्टादेव तदुपपत्तेरन्यथासिद्धमिदमिति चेत्?, तद्भावेऽपि प्रयत्नान्वय-व्यतिरेकानुविधानेन तस्यापि स्थितिं प्रति कारणत्वात्, कारणैकदेशस्य च कारणान्तरं प्रत्यनुपाधित्वात्, उपाधित्वे वा सर्वेषामकारणत्वप्रसङ्गात्; शरीरस्थितिरेवं न त्वन्यस्थितिरिति चेत्?, न-प्राणेन्द्रिययोः स्थितेरव्यापनात्, प्राङ्न्यायेनापास्तत्वाच्च, अत्राप्यागमः— "एतस्य वा अक्षरस्य प्रशासने गार्गि! द्यावा-पृथिव्यौ विधृते तिष्ठतः" [बृह. उ. ३।८।९] इति, प्रशासनं-दण्डभूतः प्रयत्नः ।

"उत्तमः पुरुषस्त्वन्यः, परमात्मेत्युदाहृतः ।

यो लोकत्रयमाविश्य, बिभर्त्यव्यय ईश्वरः ॥" [भ. गी. १५।१७] इति स्मृतिः, अत्रोत्तमत्वम्-असंसारित्वं सर्वज्ञत्वादि च, परमत्वं-सर्वोपास्यता, लोकत्रयमिति सर्वोपलक्षणम्, आवेशो-ज्ञानचिकीर्षाप्रयत्नवतः संयोगः, भरणं-धारणम्, अव्ययत्वम्-आगन्तुकविशेषगुणशून्यत्वम्, ऐश्वर्यं-संकल्पाप्रतिघातः, इति; एतेन

कूर्मादिविषया अप्यागमा व्याख्याताः । संहरणात् खल्वपि-ब्रह्माण्डादिद्व्यणुक-पर्यन्तं जगत् प्रयत्नवद्विनाश्यं विनाश्यत्वात् पाट्यमानपटवत्, अत्राप्यागमः-

"एष सर्वाणि भूतानि, समभिव्याप्य मूर्तिभिः ।
जन्म-वृद्धि-क्षयैर्नित्यं, सम्भ्रामयति चक्रवत् ॥ १ ॥" [ ]
"सर्वभूतानि कौन्तेय !, प्रकृतिं यान्ति मामकीम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ १ ॥" [भ. गी. ९।७]

इत्यादि, "एतेन रौद्रमंशं प्रतिपादयन्तोऽप्यागमा व्याख्याताः" इति ।

पदादपि ईश्वरः सिद्ध्यति, पद्यते गम्यतेऽनेनेति पदं व्यवहारः, तत ईश्वर-सिद्धिरेवं-'घटादिव्यवहारः स्वतन्त्रपुरुषप्रयोज्यो व्यवहारत्वात्, आधुनिककल्पित-लिप्यादिव्यवहारवत्' इत्यनुमानात्, न च पूर्वपूर्वकुलालादिनैवान्यथासिद्धिः, प्रलयेन तद्विच्छेदात्; अमुमर्थमुदयनाचार्या इत्थमुपवर्णयाञ्चक्रुः-"पदात् खल्वपि-

"कार्यत्वान्निरुपाधित्वमेवं धृति-विनाशयोः ।
विच्छेदेन पदस्यापि, प्रत्ययादेश्च पूर्ववत् ॥ १ ॥" [ ]

पदशब्देनात्र पद्यते-गम्यते व्यवहाराङ्गमर्थोऽनेनेति वृद्धव्यवहार एवोच्यते, अतोऽपीश्वरसिद्धिः, तथाहि-यदेतत् पटादिनिर्माणनैपुण्यं कुविन्दादीनां, वाग्व्यव-हारश्च व्यक्तवाचां, लिपितत्क्रमव्यवहारश्च बालानां, स सर्वः स्वतन्त्रपुरुषविश्रान्तो व्यवहारत्वात्, निपुणतरशिल्पिनिर्मितापूर्वघटघटनानैपुण्यवत्, चैत्र-मैत्रादिपद-व्यवहारवत्, पत्राक्षरवत्, पाणिनीयवर्णनिर्देशक्रमवच्चेति; आदिमान् व्यवहार एवम्, अयं त्वनादिरन्यथाऽपि भविष्यतीति चेत् ?, न-तदसिद्धेः, आदिमत्तामेव साधयितुमयमारम्भः; न चैवं संसारस्यानादित्वभङ्गप्रसङ्गः, तथाऽपि तस्याविरोधात्, नहि चैत्रादिव्यवहारोऽयमादिमानिति भवस्याप्यनादिता नास्ति, तदनादित्वे वा न चैत्रादिव्यवहारोऽप्यादिमानिति; अस्त्ववार्ग्दर्शी कश्चिदेवात्र मूलमिति चेत् ?, न-तेनाशक्यत्वात्, कल्पादावादर्शाभासस्याप्यसिद्धेः, साधितौ च सर्ग-प्रलयौ; ननु व्यवहारयितृवृद्धः शरीरी समधिगतो न चेश्वरस्तथा, तत् कथमेवं स्यात् ? न-शरीरान्वयव्यतिरेकानुविधायिनि कार्ये तस्यापि तद्वत्त्वात्, गृह्णाति हीश्वरोऽपि कार्यवशाच्छरीरमन्तराऽन्तरा, दर्शयति च विभूतिमिति; अत्राप्यागमः-

"पिताऽहमस्य जगतो, माता धाता पितामहः ॥ [भ. गी. ९।१७] तथा,
यदि ह्यहं न वर्तेयं, जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते, मनुष्याः पार्थ ! सर्वशः ॥ १ ॥ [ ]
उत्सीदेयुरिमे लोका, न कुर्यां कर्म चेदहम् ।" [भ. गी. ३।२३] इति,

एतेन "नमः कुलालेभ्यः कर्मारेभ्यः" [ शु. यजुः. सं. १६।२७ ] इत्यादि यजूंषि बोद्धव्यानि" इति ।

प्रत्ययतोऽपीश्वरसिद्धिः, प्रत्ययशब्देन प्रमेत्युच्यते, वेदजन्यप्रमा वक्तृयथार्थ-वाक्यार्थज्ञानजन्या शाब्दप्रमात्वात्, आधुनिकवाक्यजशाब्दप्रमावत्; अत्रो-दयनाचार्या एवमाहुः–प्रत्ययोऽपि, प्रत्ययशब्देनात्र समाश्वासविषयप्रामाण्यमुच्यते, तथा च प्रयोगः–आगमसंप्रदायोऽयं कारणगुणपूर्वकः प्रमाणत्वात्, प्रत्यक्षादिवत्, नहि प्रामाण्यप्रत्ययं विना क्वचित् समाश्वासः, न चासिद्धस्य प्रामाण्यस्य प्रतीतिः, न च स्वतः प्रामाण्यमित्यावेदितम्, न च नेदं प्रमाणं महाजनपरिग्रहादित्युक्तम्, न चासर्वज्ञो धर्माधर्मयोः स्वातन्त्र्येण प्रभवति, न चासर्वज्ञस्य गुणवत्तेति निःशङ्कमेतत् ।

श्रुतेरपीश्वरः सिध्यति, तथाहि–वेदोऽसंसारिपुरुषप्रणीतः, वेदत्वात्, यन्नैवं तन्नैवं यथा भारतादि, इति व्यतिरेकिणः; न च परमते साध्याप्रसिद्धिः, आत्म-त्वमसंसारिवृत्ति जातित्वात्, घटत्ववदित्यनुमानेन पूर्वं साध्यसाधनात्; अत्रो-दयनाचार्या इत्थमामनन्ति–"श्रुतेः खल्वपि, तथाहि–सर्वज्ञप्रणीता वेदा वेदत्वात्, यत् पुनर्न सर्वज्ञप्रणीतं नासौ वेदो यथेतरवाक्यम्; ननु किमिदं वेदत्वं नाम, वाक्यत्वस्यादृष्टविषयवाक्यत्वस्य च विरुद्धत्वात्, अदृष्टविषयप्रमाणवाक्यत्वस्य चासिद्धेः, मन्वादिवाक्ये गतत्वेन विरोधाच्चेति चेत्? न–अनुपलभ्यमानमूलान्तरत्वे सति महाजनपरिगृहीतवाक्यत्वस्य तत्त्वात्, न ह्यस्मदादीनां प्रत्यक्षादि मूलं नापि भ्रम-विप्रलिप्से, महाजनपरिग्रहादित्युक्तं, नापि परम्परैव मूलं प्रलये विच्छेदादि-त्युक्तम्" इति,

एतद्व्याख्याने वर्द्धमानोपाध्याया वेदत्वस्वरूपासन्दिग्धप्रतिपत्तये इत्थमाहुः–ननु वाक्यत्वमसिद्धं समुदायस्याप्रतिपादकत्वात्; न च शाखासमुदायो वेदः, तस्य वेदनिरूप्यत्वात्; नापि महाजनानां वेदाकारानुगतव्यवहाराद् वेदत्वं जातिः, देव-दत्तीयत्वानुमापकशब्दवृत्तिजातिभिः सङ्करप्रसङ्गात्; नापि स्वर्गकामादिशब्दः, स्मृत्यादौ तथात्वात्; उच्यते–शब्द-तदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविष-यार्थकत्वे सति शब्दाजन्यवाक्यार्थज्ञानजन्यप्रमाणशब्दत्वं वेदत्वम्, ईश्वरप्रमाया अजन्यत्वात्, वेदार्थस्यानुमानादिविषयत्वेऽप्यनुमानादेर्वेदोपजीवकत्वात्, स्मृत्या-दीनां वेदसमानार्थकत्वेऽपि शब्दजन्यधीजन्यत्वात्, वेदादर्थं प्रतीत्य तत्प्रणयनात्"

इति । वाक्यादपि ईश्वरः सिध्यति–'वेदः पौरुषेयो वाक्यत्वात्, भारतवत्' इत्यन्वय्यनुमानात्, उक्तार्थमित्थं स्पष्टीकृतवन्त उदयनाचार्याः–"अन्वयतो वा वेदवाक्यानि पौरुषेयाणि वाक्यत्वात्, अस्मदादिवाक्यवत्; अस्मर्यमाणकर्तृकत्वान्नैवमिति चेत्?, न–असिद्धेः,

"अनन्तरं च वक्त्रेभ्यो, वेदास्तस्य विनिःसृताः ।
प्रतिमन्वन्तरं चैषा, श्रुतिरन्या विधीयते ॥ १ ॥
वेदान्तकृद्वेदविदेव चाहम्" इति स्मृतेः,

"तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे" इत्यादिश्रुतिपाठकस्मृतेश्च; अर्थवादमात्रमिति चेत्?, न–कर्तृस्मरणस्य सर्वत्राविध्यर्थत्वात्, तथा चास्मरणे कालिदासादेरस्मरणात्, एवं च कुमारसम्भवादेरकर्तृकत्वप्रसङ्गः, अनैकान्तिकत्वं वा हेतोः; प्रमाणान्तरागोचरार्थत्वात् सत्प्रतिपक्षत्वमिति चेत्?, न–प्रणेतारं प्रत्यसिद्धेः, अन्यं प्रत्यनैकान्तिकत्वात्, आकस्मिकस्मितबीजसुखानुस्मृतेः कारणविशेषस्यान्यं प्रति प्रमाणान्तरगोचरस्यापि तेनैव वक्त्रा प्रतिपाद्यमानत्वात्; वक्त्रैव प्रकृते न सम्भवति, हेत्वभावे फलाभावात् चक्षुरादीनां तत्रासामर्थ्यात्, अस्मदादीन्द्रियवत्, मनसो बहिरस्वातन्त्र्यात्, न–चेतनस्य ज्ञानस्येन्द्रियस्य मनसो वा पक्षीकरणे आश्रयासिद्धेः प्रागेव प्रपञ्चनात्, नित्यनिराकरणे चासामर्थ्यात्; परमाण्वादयो न कस्यचित्प्रत्यक्षास्तत्सामग्रीरहितत्वादिति चेत्, न–द्रष्टारं प्रत्यसिद्धेः, अन्यं प्रति सिद्धसाधनात्; तथापि वाक्यत्वं न प्रमाणम्, अप्रयोजकत्वात् प्रमाणान्तरगोचरार्थत्वप्रयुक्तं तत्र पौरुषेयत्वं, न तु वाक्यत्वप्रयुक्तं, न–सुगताद्यागमानामपौरुषेयत्वप्रसङ्गात्; प्रमाणवाक्यस्य सत इति चेत्? न–प्रणेतृप्रमाणान्तरगोचरार्थत्वस्य साध्यानुप्रवेशात् स्वतन्त्रपुरुषप्रणीतत्वं हि पौरुषेयत्वम्, अर्थप्रतीत्येकविषयौ हि विवक्षा-प्रयत्नौ स्वातन्त्र्यम्, मन्वादिवाक्यस्यापौरुषेयत्वप्रसङ्गाच्च, तदर्थस्य शब्देतरप्रमाणागोचरत्वात्; प्रयुज्यमानवाक्येतरगोचरार्थत्वमात्रमिति चेत्? न–तस्य वेदेऽपि सत्त्वात्, एकस्याप्यर्थस्य शाखाभेदेन बहुभिर्वाक्यैः प्रतिपादनात्; अस्त्वेवं, न तु तेषां मिथो मूलमूलीभाव इति चेत्? न–उक्तोत्तरत्वात्" इति ।

सङ्ख्याविशेषादपि ईश्वरः सिद्ध्यति, संख्याविशेषः–द्व्यणुकपरिमाणजनिका संख्या, तथाहि–इयं संख्या अपेक्षाबुद्धिजन्या एकत्वान्यसंख्यात्वात्, इति, अस्मदाद्यपेक्षाबुद्ध्यजन्यत्वादतिरिक्तापेक्षाबुद्धिसिद्धौ तदाश्रयतयेश्वरसिद्धेः; न चासिद्धिः,

द्वयणुकपरिमाणं संख्याजन्यं जन्यपरिमाणत्वात् घटादिपरिमाणवत्, न वा दृष्टान्तासिद्धिः, द्विकपालादिपरिमाणात् त्रिकपालादिघटपरिमाणोत्कर्षात्।

उदयनाचार्याणामियमत्र प्रक्रिया-"संख्याविशेषात् खल्वपि, द्वयणुक-त्र्यणुके तावत् परिमाणवती द्रव्यत्वात्, तच्च परिमाणं कार्यं कार्यगुणत्वात्, न च तस्य परमाणुपरिमाणं द्वयणुकपरिमाणं वा कारणं, नित्यपरिमाणत्वात्, अणुपरिमाणत्वाच्च, अन्यथा अनाश्रयकार्योत्पत्तिप्रसङ्गात्, द्वयणुकस्य महत्त्वप्रसङ्गाच्च-त्र्यणुकवद्ण्वारभ्यत्वाविशेषाच्च, तत्र कारणबहुत्वेन महत्त्वे अणुपरिमाणस्यानारम्भकत्वस्थितेः, अणुत्वमेव महदारम्भे विशेष इत्यपि न युक्तम्, महतो महदनारम्भप्रसङ्गात्, अणुत्व-महत्त्वयोर्विरुद्धतया एकजातीयकार्यानारम्भकत्वप्रसङ्गात्, बहुभिरपि परमाणुभिर्द्वाभ्यामपि द्वयणुकाभ्यामारम्भप्रसङ्गाच्च, एवं सति को दोष इति चेत्?, परमाणुकार्यस्य महत्त्वप्रसङ्गः, कारणबहुत्वस्य तद्धेतुत्वात्, अन्यथा द्वाभ्यां त्रिभिश्चतुर्भिरित्यनियमेनाप्यण्वारम्भे तद्वैयर्थ्यप्रसङ्गात्, अणुन एव तारतम्याभ्युपगमस्तु संख्यामवधीर्य न स्यात्, अस्तु महदारम्भ एव त्रिभिरिति चेत्? न-महतः कार्यस्य कार्यद्रव्यारभ्यत्वनियमात्, तथापि वा तारतम्ये संख्यैव प्रयोजिकेति, न च प्रचयोऽपेक्षणीयोऽवयवसंयोगस्याभावात्, तस्मात् परिमाण-प्रचयौ महत एवारम्भकाविति स्थितिः, अतोऽनेकसंख्या परिशिष्यते, सा अपेक्षाबुद्धिजन्या अनेकसंख्यात्वात्, न चास्मदादीनामपेक्षाबुद्धिः परमाणुषु सम्भवति, तद् यस्यासौ सर्वज्ञः, अन्यथाऽपेक्षाबुद्धेरभावात् संख्यानुत्पत्तौ तद्गतपरिमाणानुत्पादेऽपरिमितस्य द्रव्यस्यानारम्भकत्वात्, त्र्यणुकानुत्पत्तौ विश्वानुत्पत्तिप्रसङ्गः; अस्मदादीनामानुमानिक्यपेक्षाबुद्धिरस्त्विति चेत्?, न-इतरेतराश्रयप्रसङ्गात्, जाते हि स्थूलकार्ये तेन परमाण्वाद्यनुमानं, तस्मिन् सति द्वयणुकादिक्रमेण स्थूलोत्पत्तिः; अस्त्वदृष्टादेव परिमाणं कृतमपेक्षाबुद्ध्येति चेत्?, न-अस्तु तत एव सर्वं, किं दृष्टकारणेनेत्यादेरसमाधेयत्वप्रसङ्गादिति" इति।

अथवा कार्यायोजनधृत्यादेरित्यत्र कार्यपदेन तात्पर्यमुच्यते, तथा च वेदे यस्य तात्पर्यं स एवेश्वर इति तात्पर्यादीश्वरसिद्धिः, आयोजनं-सद्व्याख्यानं, वेदाः केनचिद् व्याख्याताः, महाजनपरिगृहीतवाक्यत्वात्, अव्याख्यातत्वे तदर्थानवगमेऽननुष्ठानापत्तेः, एकदर्शिनोऽस्मदादेश्च व्याख्यायामविश्वास इति तद्व्याख्ययेश्वरसिद्धिः, धृतिपदेन मेधाख्यज्ञानरूपा धारणोच्यते, धृत्यादेरित्यादिपदादनुष्ठानस्य ग्रहणं, तथा च वेदावेदविषयकजन्यधारणान्यधारणाविषयाधृतिवाक्यत्वात्, लौकिक-

वाक्यवदित्येवं धृत्येश्वरानुमानम्; यागादिकं यागादिविषयकजन्यज्ञानान्यज्ञानवदनुष्ठितम् अनुष्ठितत्वात् गगनवदित्येवमनुष्ठानेनेश्वरानुमानम्; पदादित्यत्र पदशब्देन प्रणवेश्वरादिपदं गृह्यते, तत्सार्थक्यात्, स्वतन्त्रोच्चारयितृशक्तश्रुत्यादिस्थार्हंपदाद् वा ईश्वरसिद्धिः, न चेश्वरादिपदस्य स्वपरता,

"सर्वज्ञता तृप्तिरनादिबोधः, स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः, षडाहुरङ्गानि महेश्वरस्य ॥ १ ॥ [ ]"

इत्यादिवाक्यशेषेण "ईश्वरमुपासीत" [ ] इत्यादिविधिस्थेश्वरादिपदशक्तिग्रहात्, यथा यवादिपदस्य—

"वसन्ते सर्वशस्यानां, जायते पत्रशातनम् ।
मोदमानाश्च तिष्ठन्ति, यवाः कणिशशालिनः ॥ १ ॥ [ ]"

इत्यादिवाक्यशेषात् दीर्घशूकविशेषे शक्तिनिर्णयेन न कङ्ग्वादिपरतेति, तदुक्तं कुसुमाञ्जलौ—

"उद्देश एव तात्पर्यं, व्याख्या विश्वदृशः सती ।
ईश्वरादिपदं सार्थं, लोकवृत्तानुसारतः ॥ १ ॥" इति,

व्याख्यातं चेदं वर्द्धमानोपाध्यायेन, तद्यथा–"अत्र कार्यत्वमुद्देश्यत्वम्, उद्देशश्च तात्पर्यं, तद्विषय एव वेदस्य प्रामाण्यम्, तच्च परिशेषाद् वक्तुरिच्छा, सा च वेदार्थे नास्मदादीनामिति तदाश्रयेश्वरसिद्धिरित्याह–उद्देश एवेति; वेदस्यायोजनमासमन्ताद्भावेन योजनं व्याख्यानं, तच्चास्मदादीनां सर्ववेदादर्शिनां न निष्कम्पप्रवृत्तिहेतुरिति तद्व्याख्यातृतयेश्वरसिद्धिरित्याह–व्याख्येति, ईश्वरादिपदानां सर्वज्ञे नित्यज्ञाने वेदादेव शक्तिग्रहात् ततोऽपि तत्सिद्धिरित्याह–ईश्वरादीति, लोकवृत्तेति–लौकिकदृष्टान्ते व्याप्तिग्रहादित्यर्थः, विस्तरश्चात्र मूले कुसुमाञ्जलौ तद्व्याख्याने च प्रकाशे द्रष्टव्यः ।

प्रत्ययत इत्यत्र प्रत्ययपदेन विधिप्रत्यय उच्यते ततोऽपीश्वरसिद्धिः, आप्ताभिप्रायस्यैव विध्यर्थत्वात्, न हीष्टसाधनत्वमेव तथा, "अग्निकामो दारुणी मथ्नीयात्" [ ] इत्युक्तौ, कुत इति प्रश्ने 'यतो दारुमथनमग्निसाधनम्' इत्युत्तरेऽग्निसाधनत्वेन विध्यर्थवत्त्वानुमानानुपपत्तेः, अभेदे हेतुत्वेनोपन्यासानौचित्यात्, "तरति मृत्युम्" [ ] इत्यादौ विधिवाक्यानुमानानुमानानुपपत्तेश्च, इष्टसाधनतायाः प्रागेव बोधात्, 'कुर्याः कुर्याम्' इत्यादौ वक्तृसंकल्पस्यैव बोधात्,

आज्ञा-ऽध्येषणा-ऽनुज्ञा-संप्रश्न-प्रार्थना-ऽऽशंसासु लिङि इच्छाशक्तत्वस्यैव कल्पनाच्च, उल्लङ्घने क्रोधादिभयजनिकेच्छा आज्ञा, अध्येषणीये प्रयोक्तुरनुग्रहद्योतिकाऽध्येषणा, निषेधाभावव्यञ्जिकाऽनुज्ञा, प्रयोजनादिजिज्ञासा प्रश्नः, शुभेच्छाऽऽशंसा, निषेधानुपपत्तेश्च, इष्टसाधनत्वनिषेधस्य बाधात्, बलवदनिष्टाननुबन्धित्वस्यापि तदर्थत्वे "श्येनेन" इत्यादौ, अलसस्य यागादिदुःखेऽपि बलवद्द्वेषेण 'यजेत' इत्यादौ बाधात्, तत आप्ताभिप्रायस्यैव विध्यर्थत्वात् तादृशाभिप्रायवदीश्वरसिद्धिः।

एतद्विषये उदयनाचार्या इत्थमाहुः-"प्रत्ययादपि, लिङादिप्रत्यया हि पुरुषधौरेयनियोगार्था भवन्तस्तं प्रतिपादयन्ति, तथाहि—

"प्रवृत्तिः कृतिरेवात्र, सा चेच्छातो यतश्च सा।
तज्ज्ञानं विषयस्तस्य, विधिस्तज्ज्ञापकोऽथवा ॥ १ ॥ [ ]"

प्रवृत्तिः खलु विधिकार्या सती न तावत्कायपरिस्पन्दमात्रम्, आत्मा ज्ञातव्य इत्याद्यव्यापनात्, नापीच्छामात्रं, तत एव फलसिद्धौ कर्मानारम्भप्रसङ्गात्, ततः प्रयत्नः परिशिष्यते, आत्मज्ञानभूतदयादावपि तस्या भावात्, तदुक्तं-प्रवृत्तिरारम्भ इति, सेयं प्रवृत्तिर्यतः सत्तामात्रादवस्थितात्, नासौ विधिः शास्त्रवैयर्थ्यात्, अप्रतीतादेव कुतश्चित् प्रवृत्तिसिद्धौ तत्प्रत्ययनार्थं तदभ्यर्थनाभावात्, न च प्रवृत्तिहेतुजननार्थं तदुपयोगः, प्रवृत्तिहेतोरिच्छाया ज्ञानयोनित्वात्, ज्ञानमनुत्पाद्य तदुत्पादनस्याशक्यत्वात्, तस्य च निरालम्बनस्यानुत्पत्तेरप्रवर्तकत्वाच्च, नियामकाभावात्, तस्मात् यस्य ज्ञानं प्रयत्नजननीमिच्छां प्रसूते सोऽर्थविशेषो तज्ज्ञापको वाऽर्थविशेषो विधिः प्रेरणा प्रवर्तना नियुक्तिर्नियोग उपदेश इत्यनर्थान्तरमिति स्थिते विचार्यते-स हि कर्तृधर्मो वा स्यात्, कर्मधर्मो वा, करणधर्मो वा नियोक्तृधर्मो वेति" इत्थं चतुर्धा विकल्प्य, तस्य कर्तृधर्मत्वनिराकरणपरमुदयनाचार्यपद्यमिदम्—

"इष्टहानेरनिष्टाप्तेरप्रवृत्तेर्विरोधतः।
असत्त्वात् प्रत्ययत्यागात्, कर्तृधर्मो न सङ्करात् ॥ १ ॥ [ ]" इति।

यत्नस्य कर्तृधर्मस्याख्यातसामान्यवाच्यत्वव्यवस्थापनपरं—

"कृताकृतविभागेन, कर्तृरूपव्यवस्थया।
यत्न एव कृतिः, पूर्वापरस्मिन् सैव भावना ॥ १ ॥
भावनैव हि यत्नात्मा, सर्वत्राख्यातगोचरः।
तया विवरणध्रौव्यादाक्षेपानुपपत्तितः ॥ २ ॥" [ ]

इति तदीयं पद्यद्वयम् । सङ्ख्येयस्य कर्तुराख्यातवाच्यत्वनिराकरणपरं तदीय-पद्यमिदम्—

"आक्षेपलभ्ये सङ्ख्येये, नाभिधानस्य कल्पना ।
सङ्ख्येयमात्रलाभेऽपि, साकाङ्क्षेण व्यवस्थितिः ॥ १ ॥" [ ] इति,

कर्मधर्मस्य विध्यर्थत्वनिराकरणपरं तदीयपद्यमिदम्—

"अतिप्रसङ्गान्न फलं, नापूर्वं तत्त्वहानितः ।
तदलाभान्न कार्यं च, न क्रियाऽप्यप्रवृत्तितः" ॥ १ ॥ [ ] इति ।

करणधर्मस्य विध्यर्थत्वनिराकरणपरं तदीयपद्यमिदम्—

"असत्त्वादप्रवृत्तेश्च, नाभिधाऽपि गरीयसी ।
बाधकस्य समानत्वात् परिशेषोऽपि दुर्लभः ॥ १ ॥" इति [ ]

इष्टसाधनत्वस्य विध्यर्थत्वनिराकरणपरं तदीयपद्यमिदम्—

"हेतुत्वादनुमानाच्च, मध्यमादौ वियोगतः ।
अन्यत्र क्लृप्तसामर्थ्यात्, निषेधानुपपत्तितः ॥ १ ॥" इति [ ]

नियोक्तृधर्मस्याभिप्रायस्य विध्यर्थत्वोपसंहरणपरं तदीयपद्यमिदम्—

"विधिर्वक्तुरभिप्रायः, प्रवृत्त्यादौ लिङादिभिः ।
अभिधेयाऽनुमेया तु, कर्तुरिष्टाऽभ्युपायता ॥ १ ॥" [ ] इति ।

एतत्पद्यनिकरार्थाधिगतये कुसुमाञ्जलिग्रन्थो विशेषावगत्यर्थिभिरवलोकनीयो, ग्रन्थगौरवभयान्नेह दर्शितः ।

श्रुतेरित्यत्र श्रुतिपदेनेश्वरप्रतिपादकवेदः परिगृह्यते, तस्मादपीश्वरः सिध्यति, "यज्ञो वै विष्णुः" [ ] इत्यादेर्विध्येकवाच्यतया "यन्न दुःखेन संभिन्नम्" [ ] इत्यादिवत् तस्य स्वार्थ एव प्रामाण्यात्,

उदयनाचार्यास्तु–"श्रुतेः खल्वपि—

"कृत्स्न एव हि वेदोऽयं, परमेश्वरगोचरः ।
स्वार्थद्वारैव तात्पर्यं, तस्य स्वर्गादिवद्विधौ ॥ १ ॥" [ ]

न सन्त्येव हि वेदभागा यत्र परमेश्वरो न गीयते, तथा हि स्रष्टृत्वेन पुरुषसूक्तेषु, विभूत्या रुद्रेषु, शब्दब्रह्मत्वेन मण्डलब्राह्मणेषु, प्रपञ्चं पुरस्कृत्य निष्प्रपञ्चतयोप-निषत्सु, यज्ञपुरुषत्वेन मन्त्रविधिषु, देहाविर्भावैरुपाख्यानेषु, उपास्यत्वेन च सर्वत्रेति; सिद्धार्थतया न ते प्रमाणमिति चेत्? न–तद्धेतोः कारणदोषशङ्कानिरासस्य

भाव्यभूतार्थसाधारणत्वात्; अन्यत्रामीषां तात्पर्यमिति चेत्? स्वार्थप्रतिपादनद्वारा, शब्दमात्रतया वा, प्रथमे स्वार्थेऽपि प्रामाण्यमेषितव्यम्, तस्यार्थस्यानन्यप्रमाणकत्वात्, अत एव तत्र तस्य स्मारकत्वमित्यपि मिथ्या; तत्प्रतिपादकत्वेऽपि न तत्र तात्पर्यमिति चेत्?, स्वार्थापरित्यागे ज्योतिःशास्त्रवदन्यत्रापि तात्पर्ये को दोषः, अन्यथा स्वर्गनरकव्रात्यश्रोत्रियादिस्वरूपप्रतिपादकानामप्रामाण्ये बहु विप्लवेत; तत्राबाधनात् तथेति चेत्?, तुल्यम्; न तादृगर्थः क्वचिद्दृष्ट इति चेत्?, स्वर्गादयोऽपि तथा; तन्मिथ्यात्वे तदर्थिनामप्रवृत्तौ विधानानर्थक्यप्रसङ्ग इति चेत्? इहापि तदुपासनानर्थक्यप्रसङ्गः, तन्मिथ्यात्वे हि सालोक्य-सायुज्यादिफलमिथ्यात्वे कः प्रेक्षावांस्तमुपासीतेति तुल्यमिति" इत्याहुः।

वाक्यादित्यत्र वाक्यपदेन वैदिकप्रशंसानिन्दावाक्यं गृह्यते, ततोऽपीश्वरसिद्धिः, तस्य तदर्थज्ञानपूर्वकत्वात्, तदर्थज्ञानं चेश्वरस्यैव नास्मदादेरिति, उदयनाचार्यास्तु—"वाक्यादपि संसर्गभेदप्रतिपादकत्वं ह्यत्र वाक्यत्वमभिप्रेतं, तथा च यत्पदकदम्बकं यत्संसर्गभेदप्रतिपादकं तत् तदनपेक्षसंसर्गज्ञानपूर्वकं, यथा लौकिकं तथा च वैदिकमिति प्रयोगः, विपक्षे च बाधकमुक्तम्" इत्युदीरितवन्तः।

संख्याविशेषादित्यत्र संख्याविशेषपदेन वक्तृगामिनी संख्या गृह्यते, तस्मादपीश्वरः सिध्यति, स्यामभूवं भविष्यामीति वेदवचनप्रतिपाद्या स्वतन्त्रोच्चारयितृपुरुषनिष्ठा संख्या स्वाश्रयतया पुरुषधौरेयमीश्वरं गमयतीति। उदयनाचार्यास्तु–संख्याविशेषादपि—

"स्यामभूवं भविष्यामीत्यादिसंख्या च वक्तृगा।
समाख्याऽपि न शाखानामाद्यप्रवचनादृते ॥ १ ॥"

कार्यतया हि प्राक् संख्योक्ता, सम्प्रति तु प्रतिपाद्यतयोच्यते, तथाहि–उत्तमपुरुषाभिहिता संख्या वक्तारमन्वेतीति सुप्रसिद्धम्, अस्ति च तत्प्रयोगः प्रायशो वेदे ततस्तदभिहितया तयाऽपि स एवानुगन्तव्यः, अन्यथाऽनन्वयप्रसङ्गात्, अथवा समाख्याविशेषः संख्याविशेष उच्यते, काठकं कालापकमित्यादयो हि समाख्याविशेषाः शाखाविशेषाणामनुस्मर्यन्ते, ते च न प्रवचनमात्रनिबन्धनाः, प्रवक्तॄणामनन्तत्वात्, नापि प्रकृष्टवचननिमित्ताः; उपाध्यायेभ्योऽपि प्रकर्षे प्रत्युतान्यथाकरणदोषात्, तत्पाठानुकरणे च प्रकर्षाभावात्, कति चानादौ संसारे प्रकृष्टाः प्रवक्तार इति को नियामक इति, नाप्याद्यस्य वक्तुः समाख्येति युक्तं, भवद्भिस्त-

दनभ्युपगमात्, अभ्युपगमे वा स एवास्माकं वेदकार इति वृथा विप्रतिपत्तिः। स्यादेतत्-ब्राह्मणत्वे सत्यवान्तरजातिभेदा एव कठत्वादयः, तदध्येया तदनुष्ठेयार्था च शाखा तत्समाख्यया व्यपदिश्यते इति किमनुपपन्नम्, न-क्षत्रियादेरपि तत्रैवाधिकारात्; न च यो ब्राह्मणस्य विशेषः स क्षत्रियादौ सम्भवति, न च क्षत्रियादेरन्यो वेद इत्यस्ति, न च कठाः काठकमेवाधीयते तदर्थमेवानुतिष्ठन्तीति नियमः; शाखासञ्चारस्यापि प्रायशो दर्शनात्; प्रागेवायं नियम आसीदिदानीमयं विप्लवते इति चेत्? विप्लव एव तर्हि सर्वदा कठाद्यवान्तरजातिविप्लवादित्यगतिरेवेयम्, तस्मादाद्यप्रवक्तृवचननिमित्त एवायं समाख्याविशेषसम्बन्ध इत्येव साध्विति" इत्यामनन्ति।

इत्थं पातञ्जला-ऽक्षपादागमोपढौकितेश्वरसाधनश्रवणतस्तावदेव लोको विस्मयतरलितमानसो भवति यावत् तत्खण्डनपटिष्ठजैनागमस्मरणाभिमुखो न भवति, यथा बदरीफलरसमास्वादयन् पुरुषस्तावदेव तन्माधुर्यमहिमानमातनोति यावत् परिपक्वरसां द्राक्षां रसनया न साक्षात्करोति, रसनया साक्षात्कृतवतां परिपक्वद्राक्षामाधुर्यं पुरतो बदरीफलं सर्वथोपेक्षणीयभावमेवाञ्चति यथा तथा जैनागमाभिहितजगत्कारणेश्वरमननखण्डनप्रवणागमस्मरणतानहृदयानां पुरो युक्त्याभासकरम्बितमेवाभाति जगत्कर्तृसाधनवचनं, यदुक्तमुपाध्यायैः-

"श्रुत्वैवं सकृदेवमीश्वरपरं सांख्याक्षपादागमं,
लोको विस्मयमातनोति न गिरो यावत् स्मरेदार्हतीः।
किं तावद्बदरीफलेऽपि न मुहुर्माधुर्यमुन्नीयते,
यावत् पीनरसा रसाद् रसनया द्राक्षा न साक्षात्कृता ॥ १ ॥"

॥ इति ईश्वरकर्तृत्वपूर्वपक्षः ॥

---

## अथ ईश्वरजगत्कर्तृत्वखण्डनम्—

अथ ईश्वरकर्तृत्वपूर्वपक्षप्रतिविधानवार्तामुपदर्शयति—

**अन्ये त्वभिदधत्यत्र, वीतरागस्य भावतः।**
**इत्थं प्रयोजनाभावात्, कर्तृत्वं युज्यते कथम्? ॥४॥१९७॥**

अन्ये त्विति-ईश्वरजगत्कर्तृत्ववादिभिन्ना जैनाः पुनरित्यर्थः, अत्र ईश्वरविषयकविचारे, अभिदधति परीक्षां कुर्वन्ति, परीक्षापूर्वाङ्गं परमतनिराकरणं यथा

तथोपदर्शयति–**वीतरागस्ये**ति–सर्वथा रागरहितस्य, पातञ्जलाभ्युपगतस्य महेश्वरस्येत्यर्थः । **इत्थं** यथोक्तप्रेरकत्वे, **प्रयोजनाभावात्** प्रयोजनस्य कस्यचित् स्वेष्टस्याभावात्, **भावतः** परमार्थतः, पारमार्थिकं कर्तृत्वमिच्छाधीनमेव भवति "नहि प्रयोजनमनुद्दिश्य मन्दोऽपि प्रवर्तते", वीतरागस्य तु भगवत इच्छैव नास्ति, लोकेऽपि यः कश्चित् परप्रेरको दृश्यते स स्वप्रयोजनाभिलाष्येव, तथा च परप्रेरकत्वस्य व्यापिका स्वप्रयोजनेच्छेति निर्णीता, ईश्वरे च व्यापकीभूतस्वप्रयोजनेच्छाया अभावाद् व्याप्यस्य कर्तृत्वस्य परप्रेरकत्वलक्षणस्याप्यभाव इत्याह–**कतृत्वं युज्यते कथमि**ति–न कथञ्चित् कर्तृत्वं तस्य युज्यत इत्यर्थः ॥ ४ ॥ १९७ ॥

एतदेव स्पष्टयति—

**नरकादिफले कांश्चित्, कांश्चित् स्वर्गादिसाधने ।**
**कर्मणि प्रेरयत्याशु, स जन्तून् केन हेतुना ? ॥ ५ ॥ १९८ ॥**

**नरकादिफल** इति–ब्रह्महत्यादिलक्षणप्राणातिपातादौ नरकादिफलसाधने इत्यर्थः, अस्य **कर्मणी**त्यनेन सम्बन्धः, **कांश्चित्** कांश्चिज्जन्तून्, **कांश्चित्** कांश्चिज्जन्तून्, **स्वर्गादिसाधने कर्मणि** स्वर्गादिफलावन्ध्यकारणे यम-नियमादिक्रियायाम्, **आशु** शीघ्रम्, **स** ईश्वरः, **केन हेतुना** केन कारणेन, **प्रेरयति** चोदयति, क्रीडाकौतुकादिकं स्वाभिलषितं प्रयोजनमभिकाङ्क्षन् जन्तून् प्रेरयतीत्यभ्युपगमे नरकादिफलके ब्रह्महत्यादौ यान् प्राणिनः प्रेरयति तान् प्रति द्वेषः, यांश्च स्वर्गादिफलके यम-नियमादौ प्रेरयति तान् प्रति रागोऽस्य प्रसज्यत इति वैराग्यव्याहतिः, यदि च नास्य किञ्चित् प्रयोजनं तदा तन्मूलकप्रेरणाभावात् प्रेरकत्वं स्वसिद्धान्तितं व्याहन्यत इति सेयमुभयतःपाशा रज्जुः परस्येति हृदयम् ॥५॥१९८॥

पराभिप्रायमाशङ्क्य परिहरति—

**स्वयमेव प्रवर्तन्ते, सत्त्वाश्चेच्चित्रकर्मणि ।**
**निरर्थकमिहेशस्य, कर्तृत्वं गीयते कथम् ॥ ६ ॥ १९९ ॥**

**स्वयमेवे**ति–आत्मनैव, तमःसत्त्वोद्रेकेण तामसबुद्ध्यंशव्यापारावेशेनैवेति यावत्, **चित्रकर्मणि** ब्रह्महत्याद्यशुभकर्मणि यमनियमादिशुभकर्मणि च, **सत्त्वाः** प्राणिनः, **प्रवर्तन्ते**, अहमेव कर्तेत्येवमभिमन्यन्ते, तत्प्रयोजनं तु सर्वज्ञत्वादीश्वरो जानातीत्येवं प्रयोजनज्ञानार्थमीश्वरापेक्षेति चेत्? **इह** उपदर्शिते शुभाशुभात्मककर्मणि **ईशस्य** परमेश्वरस्य, **निरर्थकं** निष्प्रयोजनं, **कर्तृत्वं** प्रेरकत्वं, **कथं**

कस्मात्, **गीयते** उच्यते; ननूक्तं प्रयोजनज्ञानार्थमीश्वरापेक्षेति चेत्?, नोक्तं केनोच्यते, न तु युक्तमुक्तं, यदि प्रवर्तयेदीश्वरस्तदाऽस्य कर्मणः पूर्वकृतस्य फलमेतदनेन कर्मणा सम्पद्यते नान्यथेति तदुपभोगेन तत्क्षपणार्थं जन्तून् प्रेरयतस्तस्य प्रयोजनज्ञानमावश्यकं, यदा तु प्राणी स्वकर्मफलोपभोगार्थं स्वयमेव प्रवर्तते, तदेश्वरसिद्धिव्यसनं गृहलब्ध एव धने तदर्जनार्थं विदेशगमनसदृशम्, यथा च विदेशगमनेऽकृतेऽपि गृहस्थितधनं स्वत एव समुपार्जितमस्त्येव, तथा प्रेरकत्वादिनेश्वरसाधनेऽकृतेऽपि जन्तवश्चित्रकर्मणि प्रवर्तन्त एव स्वतः, सर्वज्ञत्वस्वाभाव्यादीश्वरस्य तत्प्रयोजनज्ञानमस्तु नाम, न च तत् तत्रोपयुज्यत इति ॥ ६ ॥ १९९ ॥

परस्याभिप्रायान्तरमाशङ्क्य प्रतिक्षिपति—

**फलं ददाति चेत् सर्वं, तत् तेनेह प्रचोदितम् ।**
**अफले पूर्वदोषः स्यात्, सफले भक्तिमात्रता ॥ ७ ॥ २०० ॥**

फलमिति । इह जगति, **सर्वं तत्** शुभाशुभभेदभिन्नं निखिलमपि कर्म, **तेन** ईश्वरेण, **प्रचोदितं** प्रेरितमधिष्ठितं सदिति यावत्, **फलं** सुख-दुःखादिलक्षणं, **ददाति** जनयति, अचेतनस्य चेतनाधिष्ठितस्यैव कार्यजनकत्वादिति, **चेत्** यदि, तदाऽत्र विकल्पद्वयमुपतिष्ठते—चित्रकर्म स्वतश्चित्रफलदाने समर्थम्, असमर्थं वा, तत्र प्रथमपक्षाभ्युपगमे आह—**अफले पूर्वदोषः स्यादि**ति—स्वतश्चित्रफलदानासमर्थे कर्मणि ईश्वरेण तत्तत्फलदानाय प्रेरिते शुभेनापि तेनेश्वरप्रेरणयाऽशुभफलं भवेत्, अशुभेनापि तेनेश्वरप्रेरणया शुभफलमुपजायेतेत्येवं स्वर्गनरकादिफल-नियमदोषः स्यात्, अथवा कर्म स्वतोऽफलं किन्तु ईश्वरो यं स्वर्गं नेतुमिच्छति तं तेन कर्मणा स्वर्गं प्रापयति, यं नरकं नेतुमिच्छति तेन कर्मणा नरकं प्रापयतीत्येवमीश्वरस्य तत्तत्फलदातृत्वेऽवीतरागत्वं प्रसज्येतेत्यर्थः; द्वितीयपक्षे त्वाह—**सफले भक्तिमात्रते**ति—स्वत एव चित्रफलदानसमर्थे कर्मण्यभ्युपगम्यमाने ईश्वरप्रेरणामन्तरेणापि ततः फलं स्यादेवेति 'ईश्वरोऽस्मात् कर्मण इदं फलं मे प्रयच्छतु' इति प्रार्थनमीश्वरे भक्तिमात्रं स्यात्, यथा हरीतकी मम मलरेचनं विदधात्वित्येवमजानताऽपि भक्षिता हरीतकी रेचनं करोत्येवेति; अचेतनं चेतनाधिष्ठितमेव कार्यं जनयतीति नियमस्तु वने केनचित् पुंसाऽकृतवपनेनापि बीजेनाङ्कुरलक्षणकार्यदर्शनादसिद्धः; ननु सर्वमचेतनं चेतनाधिष्ठितं सत् कार्यं करोति अचेतनत्वादित्येवमनुमानप्रयोगे वनबीजस्यापि पक्षत्वात् तत्र व्यभिचारो न दोषा-

येति चेत्?, एवं सति अयोगोलकं धूमवद् वह्नेरित्येवमनुमानप्रयोगेऽयोगोलकस्य पक्षीकृतत्वात् तत्र व्यभिचारो नोद्भावनीयः स्यादित्येवं यत्र यत्र व्यभिचारस्तस्य पक्षीकरणतः कोऽपि हेतुरनैकान्तिको न भवेदित्याशयः ॥ ७ ॥ २०० ॥

आदिसर्गे स्वातन्त्र्यादीश्वरस्यैव कर्तृत्वमित्याशङ्क्य प्रतिक्षिपति—

**आदिसर्गेऽपि नो हेतुः, कृतकृत्यस्य विद्यते ।**
**प्रतिज्ञातविरोधित्वात्, स्वभावोऽप्यप्रमाणकः ॥ ८ ॥ २०१ ॥**

**आदिसर्गेऽपीति**–सर्गध्वंससमानकालीनसर्गेऽपीत्यर्थः, **कृतकृत्यस्य** वीतरागस्य, **हेतुः** आदिसर्गकरणप्रयोजनं, **न विद्यते** न समस्ति, यदि किञ्चित् प्रयोजनं स्याद् वीतरागत्वमेव तस्य प्रतिज्ञातं हीयेत, **स्वभावोऽपि** एवंभूत एवास्य स्वभावो यत् प्रयोजनाभावेऽप्यादिसर्गं स्वातन्त्र्येणैव करोति कालान्तरे त्वदृष्टापेक्षया करोत्यपि, **अप्रमाणकः** यदीश्वरः केनचित् प्रमाणेन सिद्धः स्यात् तदा तत्रोक्तस्वभावः कल्पयितुं शक्येतापि, तदसिद्धौ च कुत्र स स्वभावः कल्पनीय इत्याशयः ॥ ८ ॥ २०१ ॥

कर्मादिकमीश्वरानपेक्षमेव जगत् करोतीत्येवमुपगमे न कश्चिद् दोषः, नहि चेतनस्य प्रयोजनमनुद्दिश्य प्रवृत्तिः सम्भवतीत्यतः कर्मानपेक्षत्वलक्षणस्वातन्त्र्येणेश्वरस्य जगत्कर्तृत्वं कृतकृत्यत्वव्याघातकं कर्मसापेक्षस्यापि तस्य जगत्कर्तृत्वं कृतकृत्यत्वव्याघातकम्, फलेच्छाया आवश्यकत्वेन वीतरागत्वासम्भवादित्याह—

**कर्मादेस्तत्स्वभावत्वे, न किञ्चिद् बाध्यते विभोः ।**
**विभोस्तु तत्स्वभावत्वे, कृतकृत्यत्वबाधनम् ॥ ९ ॥ २०२ ॥**

**कर्मादेरिति**–आदिपदात् काल-नियत्यादेरुपग्रहः, **तत्स्वभावत्वे** ईश्वरानपेक्षमेव कर्मादिकं जगत् करोतीत्येवम्भूतस्वभावत्वे, **विभोः** सर्वविषयकज्ञानादिमतः परमेश्वरस्य, **न किञ्चित्** न किमपि, **बाध्यते** व्याहतं भवति, प्रत्युत अनुपकारित्वेन वीतरागत्वं तस्य दृढं भवति, वीतरागत्वादेव च न जगत्कर्तृत्वमित्यपि सुदृढं सम्पद्यते, **तु** पुनः, **विभोः** निरुक्तलक्षणपरमेश्वरस्य, **तत्स्वभावत्वे** स्वभिन्नादृष्टादिकारणानपेक्षत्वलक्षणस्वातन्त्र्येण स्वभिन्नकर्मादिकारणसापेक्षतया वा जगज्जननस्वभावत्वे, **कृतकृत्यत्वबाधनम्** जगत्सर्जनप्रयोजनेच्छाया आवश्यकत्वेन कृतकृत्यत्वं न स्यात्, यदि कर्तव्यं किमपि न भवेत् तदैव कृतकृत्यता भवति, तस्य तु जगत्सर्जनप्रयोजनसम्पादनं कर्तव्यमवशिष्टमेवेति वीतरागत्वमपि व्याह-

न्यते, एवं न प्रकृतिर्नापि विकृतिरीश्वर इति योगाचार्यमननमपि न सम्भवति जगत्कारणत्वेन प्रकृतित्वप्रसङ्गात्; ननु जगतो निमित्तकारणमेव परमेश्वरो न परिणामिकारणं, परिणामित्वमेव च प्रकृतित्वमिति न निमित्ते ईश्वरे प्रकृतित्वप्रसङ्गः, इच्छा द्विविधा—फलेच्छा उपायेच्छा च, तत्र फलेच्छां प्रति फलज्ञानं कारणम्, उपायेच्छां प्रतीष्टसाधनताज्ञानमिति योऽयं कार्यकारणभावः स जन्येच्छां प्रति, ईश्वरस्य तु सर्वविषयिणीच्छा नित्यैव न प्रयोजनमपेक्षते, जन्येच्छाया एव रागपदार्थत्वेन तत्सत्त्व एव जन्येच्छाविच्छेदलक्षणं वैराग्यं व्याहन्यते, न तु नित्येच्छासत्त्वे, ऐश्वर्यमपि न जन्यं, किन्तु तत्तत्फलावच्छिन्नेच्छैव, सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, तस्यामवस्थायां न सर्गः, किन्तु रजःप्रभृत्युद्रेके सति सर्गो भवतीति रजःप्रभृत्युद्रेकादीश्वरः सर्गं विदधातीति योऽयमभ्युपगमस्तत्रापि तत्तत्कार्यकारितयैवेश्वरे रजःप्रभृत्युद्रेक उपचार्यते न तु परमार्थत इतीश्वरस्याप्रच्युतानुत्पन्नस्थिरैकस्वभावत्वलक्षणं न हीयते इति चेत्? अत्राहुः श्रीयशोविजयोपाध्यायाः—

"जल्पता गिरिशसाधने गिरं, न्यायदर्शननिवेशपेशलाम् ।
साङ्ख्य! सम्प्रति निजं कुलं, त्वया हन्त हन्त सकलं कलङ्कितम्" ॥ १ ॥

सेश्वरसाङ्ख्यनिरीश्वरसाङ्ख्यभेदेन साङ्ख्यदर्शनस्य द्वैविध्यम्, पातञ्जलास्तु सेश्वरसाङ्ख्या इति निरीश्वरसाङ्ख्यात् कापिलादीश्वराभ्युपगम एव विशेष इति प्रकृत्यादिप्रक्रियाभ्युपगन्तार एते, एवं च कार्यजनकज्ञानादिसिद्धौ तदाश्रयतया बुद्धिरेव नित्या सिद्ध्येत्, न त्वीश्वरः, बुद्धित्वस्यैव ज्ञानाद्याश्रयतावच्छेदकत्वात्, आत्मत्वस्य ज्ञानाद्याश्रयतावच्छेदकत्वे तु जन्यज्ञानादीनामप्यात्माश्रिततया कर्तृत्वमप्याश्रितमेव भवेन्न तु बुद्ध्याश्रितमिति प्रकृत्यादिप्रक्रिया स्वमान्या तेषामुच्छिद्येतेति प्रकृत्यादिप्रक्रियाभ्युपगन्तारः पातञ्जला नेश्वरं सिद्धिप्रासादे स्थापयितुं प्रगल्भाः ।

नैयायिकादिरपि न कार्यादिसाधनेन महेश्वरं साधयितुमीष्टे, तथाहि—कार्यं सकर्तृकं कार्यत्वाद् घटवदिति प्रथमानुमाने सकर्तृत्वमुपादानगोचरापरोक्षज्ञानजन्यत्वोपादानगोचरचिकीर्षाजन्यत्वोपादानगोचरकृतिजन्यत्वानामेकैकपर्यवसायिस्वरूपमेव साध्यमभिमतम्, तत्र व्यभिचारशङ्कानिवर्तकतर्काभावेनाप्रयोजकत्वम्, यत उपादानगोचरापरोक्षज्ञानत्व-कार्यत्वाभ्यां यत्कार्यकारणभावस्तन्मूलको यदि कार्यमुपादानगोचरापरोक्षज्ञानजन्यं न स्यात् कार्यं न स्यादिति तर्को व्यभिचारशङ्कानिवर्तकः पराभिप्रेतः, स च नास्ति, तत्तत्पुरुषीयपटाद्यर्थिप्रवृत्तित्वावच्छिन्नं प्रति

तत्तत्पुरुषीयपटादिमत्त्वप्रकारकोपादानप्रत्यक्षत्वेनोपादानप्रत्यक्षं कारणमिति विशिष्य कार्यकारणभावस्यान्यपुरुषीयोपादानप्रत्यक्षतस्तत्पुरुषीयान्योपादानप्रत्यक्षतो वा प्रवृत्त्यापत्तिवारणायावश्यकतया कार्यत्वावच्छिन्नं प्रति उपादानप्रत्यक्षत्वेनोपादानप्रत्यक्षं कारणमिति सामान्यतः कार्यकारणभावे मानाभावात्, यद्विषयिणी चिकीर्षा तद्विषयिणी प्रवृत्तिर्भवतीति चिकीर्षा प्रवृत्तावेव कारणं, न तु कार्ये, तत्र तस्या अन्यथासिद्धत्वात्, तन्त्वाद्युपादानकपटादिविधेयकतन्तुवायादिकृतितो घटादिकार्योत्पत्तिवारणाय पटत्वावच्छिन्नं प्रति तन्तूपादानकपटविधेयकतन्तुवायकृतित्वेन, घटत्वावच्छिन्नं प्रति कपालोपादानकघटविधेयककुलालकृतित्वेन कृतिः कारणमित्येवं विशिष्य तत्तत्कृति-तत्तत्कार्ययोः कार्यकारणभावस्यावश्यकतया कृतित्व-कार्यत्वाभ्यां कृति-कार्ययोरपि कार्यकारणभावे मानाभावात्; न चोक्तदिशा प्रवृत्तिं प्रत्येवोपादानप्रत्यक्षचिकीर्षयोः कारणत्वेन कार्यं प्रत्यन्यथासिद्धत्वमिति भवतोऽभिमतं न युक्तं, यतोऽन्वय-व्यतिरेकाभ्यामेव कार्यकारणभावग्रहो भवति, अन्वय-व्यतिरकौ च यथा प्रवृत्तिं प्रति ज्ञानचिकीर्षयोस्तथा घटादिकार्यं प्रत्यपीति प्रवृत्ताविव घटादावपि तयोः कारणत्वमेव नान्यथासिद्धत्वम्, विशिष्य तत्तत्कार्यं प्रति तत्तत्कृतेः कारणत्वक्लृप्तौ कृतित्व-कार्यत्वाभ्यामपि कार्यकारणभावः स्यादेव "यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपि" इति न्यायात्, घटत्व-पटत्वादीनां सामान्यरूपत्वेनाखण्डतया लघुशरीरत्वेऽपि तदपेक्षया प्रागभावप्रतियोगित्वात्मकसखण्डोपाधिरूपत्वेन गुरुशरीरस्यापि कार्यत्वस्य सकलकार्यसङ्ग्राहकत्वेन ज्ञानेच्छादिजन्यतावच्छेदकत्वमुचितं, शरीरलाघवमपेक्ष्य सङ्ग्राहकलाघवस्य न्याय्यत्वात्, अन्यथा कार्यतावच्छेदकभेदेनानन्तकार्यकारणभावापत्तेरिति वाच्यम्; कार्यत्वं हि न प्रागभावप्रतियोगित्वादिलक्षणसखण्डोपाधिरूपम्, किन्तु लाघवात् कालिकसम्बन्धेन घटत्वादिजातिमत्त्वरूपमेव, जन्यमात्रस्य कालोपाधित्वेन कालिकसम्बन्धेन नित्याधारत्वमिति घटत्वादिमत्त्वमपि सकलकार्यसङ्ग्राहकं भवत्येव, तथा च विनिगमनाविरहात् कालिकसम्बन्धेन घटत्व-पटत्वादिमत्त्वानां सर्वेषामपि ज्ञानेच्छादिजन्यतावच्छेदकत्वप्राप्तौ कार्यत्वस्य कार्यतावच्छेदकत्वेऽपि तन्नानात्वात् कार्यकारणभावानन्त्यं प्रसज्यत एव, ध्वंसेऽपि च कार्यत्वं समस्ति, न च तस्योपादानं किञ्चिदिति न तत्रोपादानगोचरापरोक्षज्ञानादिकार्यतेत्यतिप्रसक्तत्वात् कार्यत्वं ज्ञानादिकार्यतावच्छेदकं न स्यादिति ध्वंसव्यावृत्तं सत्त्वे सति कार्यत्वमेव कार्यतावच्छेदकं वाच्यं, तत्र सत्त्वे सति कार्यत्वं कार्यत्वे सति सत्त्वं वा कार्यतावच्छेदक-

मित्यत्र विनिगमनाविरहेणोभयोरपि विशेष्यत्व-विशेषणत्वतोऽतिगुरुत्वाच्च । न च द्रव्य-गुण-कर्मणां कार्याणां समवायिकारणं द्रव्यमेवेत्यस्योपपत्तये समवायसम्बन्धेन सन्मात्रं प्रति तादात्म्यसम्बन्धेन द्रव्यं कारणमित्यवश्यमभ्युपेयं, तत्र नित्यद्रव्य-नित्यगुणवृत्तित्वेनातिप्रसक्तत्वान्न सत्त्वं कार्यतावच्छेदकं, किन्तु जन्यसत्त्वमेव, तथा च तादात्म्यसम्बन्धावच्छिन्नद्रव्यनिष्ठकारणतानिरूपितसमवायसम्बन्धावच्छिन्न-कार्यता किञ्चिद्धर्मावच्छिन्ना कार्यतात्वात्, या या कार्यता सा किञ्चिद्धर्मावच्छिन्ना, यथा कपालनिष्ठकारणतानिरूपितघटनिष्ठकार्यतेत्येवं द्रव्यजन्यतावच्छेदकतया सिद्धं जन्यसत्त्वं, नित्यगुणजातिसाधारणत्वात् समवेतत्वस्य कार्यतातिप्रसक्तत्वेऽपि जन्य-समवेतमात्रवृत्त्यवच्छिन्नसमवेतत्वं वोपादानप्रत्यक्षादिजन्यतावच्छेदकमिति वाच्यं; तथापि प्रत्येकं विनिगमनाविरहात्, यद्विशेष्ययोः इति न्याये मानाभावेन सामान्य-कार्यकारणभावाभावात्, किञ्च व्याप्यधर्मस्य कार्यतावच्छेदकत्वे सम्भवति तद-वच्छिन्नं प्रत्येव कारणत्वं युक्तं, न तु व्यापकधर्मावच्छिन्नं प्रति, एवं च प्रायोगिक-वैस्रसिकभेदेन कार्यं द्विविधमिति कार्यत्वं व्यापकधर्मः, तद्व्याप्यं च प्रायोगिकत्वं वैस्रसिकत्वं च, तत्र वैस्रसिकस्येन्द्रधनुरादेः प्रयत्नमन्तरेणैव भावाद् वैस्रसिकत्वं न प्रयत्नजन्यतावच्छेदकं, किन्तु प्रायोगिकत्वं संभवति, तस्य प्रयत्नजन्यशैलादि-व्यावृत्तस्य प्रयत्नजन्यदेवकुलादिसकलानुगतस्य कस्यचित् प्रयत्नादुत्पन्नोऽयमित्येव-मविगानेन सकलजनव्यवहारसिद्धस्य प्रयत्नजन्यतावच्छेदकत्वम्, व्याप्यधर्मत्वात्, अमुमेवाभिप्रायं स्वहृदयगतं कृत्वा—

"अथ पृथिव्यादेः कार्यत्वं बौद्धैरभ्युपगम्यत एवेति नासिद्धत्वं तरस्य हेतोः प्रेरणीयम्, नन्वत्रापि यादृग्भूतं बुद्धिमत्पूर्वकत्वेन देवकुलादिष्वन्वय-व्यतिरेकाभ्यां व्याप्तं कार्यत्वमुपलब्धम्, यदक्रियादर्शिनोऽपि जीर्णदेवकुलादावुपलभ्यमानं लौकिकपरीक्षकादेस्तत्र कृतबुद्धिमुत्पादयति, तादृग्भूतस्य क्षित्यादिषु कार्यत्वस्या-नुपलब्धेरसिद्धः कार्यत्वलक्षणो हेतुः, उपलम्भे वा तत्र ततो जीर्णदेवकुलादिष्विवा-क्रियादर्शिनोऽपि कृतबुद्धिः स्यात्, नह्यन्वय-व्यतिरेकाभ्यां सुविवेचितं कार्यं कारणं व्यभिचरति, तस्याहेतुकत्वप्रसङ्गात्, अतः क्षित्यादिषु कार्यत्वदर्शनादक्रियादर्शिनः कृतबुद्ध्यनुत्पत्तेर्यद्बुद्धिमत्कारणत्वेन व्याप्तं कार्यत्वं देवकुलादिषु निश्चितं तत् तत्र नास्तीत्यसिद्धो हेतुः, केवलं कार्यत्वमात्रं प्रसिद्धं तत्र, न च प्रकृत्या परस्परमर्था-न्तरत्वेन व्यवस्थितोऽपि धर्मः शब्दमात्रेणाभेदी हेतुत्वेनोपादीयमानोऽभिमत-साध्यसिद्धये पर्याप्तो भवति, साध्यविपर्ययेऽपि तस्य भावाविरोधात्, यथा

वल्मीके धर्मिणि कुम्भकारकृतत्वसिद्धये मृद्विकारमात्रं हेतुत्वेनोपादीयमानमिति, यद्बुद्धिमत्कारणत्वेन व्याप्तं देवकुलादौ कार्यत्वं प्रमाणतः प्रसिद्धं तच्च क्षित्यादावसिद्धं यच्च क्षित्यादौ कार्यत्वमात्रं हेतुत्वेनोपन्यस्यमानं सिद्धं, तत् साध्यविपर्यये बाधकप्रमाणाभावात् सन्दिग्धव्यतिरेकित्वेनानैकान्तिकं न ततोऽभिमतसाध्यसिद्धिः। नन्वेतत् कार्यसमं नाम जात्युत्तरं, तथाहि–कृतकत्वादनित्यः शब्द इत्युक्ते जातिवादी अत्रापि प्रेरयति–किमिदं घटादिगतं कृतकत्वं हेतुत्वेनोपन्यस्तम्?, किं वा शब्दगतम्?, अथोभयगतमिति, आद्ये पक्षे हेतोरसिद्धिः, न ह्यन्यधर्मोऽन्यत्र वर्तते, द्वितीयेऽपि साधनविकलो दृष्टान्तः, तृतीयेऽप्येतावेव दोषाविति, एतच्च कार्यसमं नाम जात्युत्तरमिति प्रतिपादितम्, यथोक्तम्–"कार्यत्वान्यत्वलेशेन यत् साध्यासिद्धिदर्शनं तत् कार्यसमम्" इति, कार्यत्वसामान्यस्यानित्यत्वसाधकत्वेनोपन्यासेऽभ्युपगते धर्मिभेदेन विकल्पनवद्बुद्धिमत्कारणत्वे क्षित्यादेः कार्यत्वमात्रेण साध्येऽभीष्टे धर्मिभेदेन कार्यत्वादेर्विकल्पनात्, असदेतत्, यतः सामान्येन कार्यत्वानित्यत्वयोर्विपर्यये बाधकप्रमाणबलाद् व्याप्तिसिद्धौ कार्यत्वसामान्यं शब्दादौ धर्मिण्युपलभ्यमानमनित्यत्वं साधयतीति कार्यत्वमात्रस्यैव तत्र हेतुत्वेनोपन्यासे धर्मविकल्पनं यत् तत्र क्रियेत तत् सर्वानुमानोच्छेदकत्वेन कार्यसमजात्युत्तरतामासादयति, न त्वेवं क्षित्यादेर्बुद्धिमत्कारणत्वे साध्ये कार्यत्वसामान्यं हेतुत्वेन संभवति, तस्य विपर्यये बाधकप्रमाणाभावात् सन्दिग्धविपक्षव्यावृत्तिकत्वेनानैकान्तिकत्वात् यच्च बुद्धिमत्कारणपूर्वकत्वेन व्याप्तं देवकुलादौ कार्यत्वं प्रतिपन्नं यदक्रियादर्शिनोऽपि जीर्णप्रासादादौ कृतबुद्धिमुत्पादयति तत् तत्रासिद्धमिति प्रतिपादितम्" ॥

इति ग्रन्थेन सम्मतिटीकाकृता हेतुविशेषविकल्पने कार्यसमजात्युत्तरं नैयायिकाभिमतमपाकृतम् ।

यदपि कार्यत्वावच्छिन्नं प्रति कृतेर्हेतुत्वाभावेऽपि घटत्वाद्यवच्छिन्नं प्रति कृतेर्हेतुतया खण्डघटोत्पत्तेः पूर्वं कृतेरावश्यकतया तदाश्रयत्वेनेश्वरसिद्धिरिति दीधितिकृन्मतं, 'खण्डघटं पक्षीकृत्य कुलालकृतिजन्यत्वसाधने जीवरूपकुलालकृतेर्बाधादीश्वरसिद्धिः, घटकरणसमर्थस्यैव कुलालत्वेन तादृश[ ]कुलालत्वस्येश्वरेऽपि स्वीकारसम्भवात्, अत एव "नमः कुलालेभ्यः" इति श्रुतिरपि सङ्गच्छते, इत्येवमुपपादितमपि तुच्छम्, जीवकुलालकृतिसमुत्पन्नस्य तदानीं स्थितस्यैव घटस्य खण्डत्वपर्यायोत्पत्त्या खण्डघटत्वस्य स्याद्वादिभिरभ्युपगमात्, खण्डत्वपर्यायोत्पत्तावपि पूर्वोत्पन्नस्य घटस्य

तदानीं समवस्थितत्वादेव स एवायं घट इति प्रत्यभिज्ञाऽप्युपपद्यते बाधकमन्तरेण सादृश्यदोषप्रभवत्वमङ्गीकृत्य तस्यां भ्रमत्वकल्पना प्रमाणशून्यत्वाद् गौरवपराहतैव, पाकोत्तीर्णेऽपि घटे सोऽयं घट इति प्रत्यभिज्ञाभावादेव पाकेनापि नान्यघटोत्पत्तिः, घटादेर्द्रव्यस्य कथञ्चिदविनाशेऽपि विशिष्टसामग्रीवशाद् विशिष्टवर्णस्योत्पत्तिसम्भवात्, अत्र विशेषप्रतिपत्तये सम्मतिटीकाऽवलोक्या, तदानीं कथञ्चिद् घटाद्युत्पत्त्युपगमेऽपि कुलालकृत्यादीनां स्वप्रयोज्यविजातीयसंयोगसम्बन्धेन सत्त्वादेव विशिष्टवर्णस्य घटस्योत्पत्तिसम्भवान्न तदर्थमीश्वरकृतिकल्पना भद्रा, न च पिठरपाकवादिनैयायिकमते पाकेनापि न घटनाश इति अवयवसंयोगस्य पूर्वस्य सत्त्वात् तद्घटितोक्तपरम्परासम्बन्धेन कुलालकृत्यादीनां तदानीं सत्त्वेऽपि पीलुपाकवादिवैशेषिकनये श्यामघटादिनाशोत्तरं रक्तघटाद्युत्पत्तिकाले प्राक्तनपरमाणुद्वयसंयोगद्वयणुकादेर्नाशान्न स्वप्रयोज्यविजातीयसंयोगसम्बन्धेन कुलालवृत्त्यादीनां तदानीं सत्त्वमिति वाच्यं, स्वजन्यजन्यादेरपि स्वप्रयोज्यत्वस्य स्वीकारेण पूर्वसंयोगादिध्वंस-पूर्वद्वयणुकादिध्वंसानामुत्तरसंयोगद्वयणुकादावन्ततः कालोपाधितयाऽपि जनकत्वेन तत्कालेऽपि कुलालादिकृतेः स्वप्रयोज्यविजातीयसंयोगसम्बन्धेन सत्त्वात्, उत्तरसंयोगादेरपि परम्परया कुलालकृतिजन्यत्वेन कुलालवृत्तिप्रयोज्यत्वात्, एवमनभ्युपगमे ईश्वरकृतिमुपादाय तदानीं तस्मिन् घटे कृतिजन्यत्वोपपादनसम्भवेऽपि घटत्वावच्छिन्नं प्रति दण्डादीनामपि कारणत्वमिति न तदानीं स्वजन्यचक्रभ्रमिजन्यत्वादिसम्बन्धेन दण्डादीनां सत्त्वमिति दण्डादिकमन्तरेण कथं तद्घटोत्पत्तिर्भवेत्?, यदि च दण्डादिजन्यतावच्छेदकं विलक्षणघटत्वादिकमेव, तच्च तद्घटादौ नास्तीति दण्डादिकार्यतावच्छेदकधर्मानाक्रान्तत्वाद् दण्डादिकमन्तरेणापि तदुत्पत्तिः सम्भवतीति विभाव्यते तदा यदेव दण्डादिजन्यतावच्छेदकं विलक्षणघटत्वादिकं तदेव कृतिजन्यतावच्छेदकमप्युररीक्रियतां, तथा च कृतिजन्यतावच्छेदकधर्मानाक्रान्तत्वादेव तस्य घटादेः कृतिमन्तरेणाप्युत्पत्तेः सम्भवेन न तदर्थमीश्वरकृतिकल्पनाऽपि युक्ता स्यात्; ननु स्वप्रयोज्यविजातीयसंयोगादिसम्बन्धापेक्षया विशेष्यत्वसम्बन्धस्य लघुभूतत्वेन तेनैव सम्बन्धेन कृतेर्घटत्वाद्यवच्छिन्नं प्रति हेतुत्वम्, स्वप्रयोज्यकपालद्वयसंयोगापेक्षया स्वजन्यचक्रभ्रमिजन्यत्वस्य न लघुत्वमिति, स्वप्रयोज्यकपालद्वयसंयोगसम्बन्धेन दण्डस्य घटहेतुत्वं सम्भवति, एवं च खण्डघटस्थले स्वप्रयोज्यकपालद्वयसंयोगसम्बन्धेन दण्डस्य सत्त्वात् तस्य तत्र कारणत्वं सम्भवति, कुलालकृतिस्तु न तत्र विशेष्यतया समस्तीति न तस्याः कारणत्वमिति तदानीं तत्र

विशेष्यतया महेशकृतेरेव सत्त्वात् कारणत्वमिति चेत् ?, न–अतिरिक्तेश्वरकृतिकल्पनापेक्षया कृतेरपि स्वप्रयोज्यसम्बन्धेनैव हेतुत्वात्, गौरवाद् विजातीयसंयोगत्वस्य तत्र संसर्गतानवच्छेदकत्वात्, घटत्वावच्छिन्ने जन्यकृतिमात्रविजातीयकृतित्वेनैव हेतुत्वात् तस्येश्वरकृतावभावेन तस्याः कारणत्वासम्भवान्न तत्सिद्धिरिति दिक् ।

यथा चेश्वरकृतिर्न कारणं तथेश्वरप्रत्यक्षमपि न कारणम्, उपादानप्रत्यक्षस्य लौकिकस्यैव हेतुत्वात्, संयोग-संयुक्तसमवायादिषड्विधलौकिकसन्निकर्षजन्यप्रत्यक्षस्यैव लौकिकत्वेन लौकिकेन्द्रियसन्निकर्षाजन्यस्येश्वरप्रत्यक्षस्य लौकिकत्वासम्भवादित्युपादानप्रत्यक्षस्य घटादिकारणत्वबलादपि न तत्सिद्धिः; अपि च प्रणिधानाद्यर्थं मनोवहनाड्यादौ प्रवृत्तिः स्वीक्रियते, न च मनोवहनाड्याद्युपादानप्रत्यक्षं प्रणिधानकर्तुरिति यद्धर्मावच्छिन्ने यदर्थिप्रवृत्तिः तद्धर्मावच्छिन्ने तत्प्रकारकज्ञानमात्रस्य हेतुत्वादुपादानप्रत्यक्षत्वेन कारणत्वाभावात् कथमुपादानप्रत्यक्षमीश्वरस्य सिद्ध्यति; जन्यमात्रकारणतया सिद्धस्येश्वरज्ञानस्यानुमितित्वे नित्यानुमितिरेवेश्वरस्येत्यतिप्रसक्ततयाऽनुमितित्वं व्याप्तिज्ञानजन्यतावच्छेदकं न स्यादिति जन्यानुमितित्वं व्याप्तिज्ञानजन्यतावच्छेदकं वाच्यमिति गौरवं स्यादतो नेश्वरज्ञानमनुमितिरूपं किन्तु प्रत्यक्षरूपमेव तदिति भवत्युपादानप्रत्यक्षमीश्वरस्येति कल्पनमपि नैयायिकस्य न युक्तम्, तथा सति ईश्वरज्ञानस्य प्रत्यक्षत्वेऽतिप्रसक्ततया प्रत्यक्षत्वमपि नेन्द्रियजन्यतावच्छेदकमिति जन्यप्रत्यक्षत्वमिन्द्रियजन्यतावच्छेदकं वाच्यमिति गौरवं स्यादिति प्रत्यक्षत्वाभावापत्तेः । अपि च जन्यमात्रकारणतया सिद्धमुपादानप्रत्यक्षं निराश्रयमेवास्त्विति न तदाश्रयतयेश्वरसिद्धिः, यो यो गुणः स द्रव्याश्रित एव दृष्टो जन्यप्रत्यक्षमप्यस्मदादीनां जीवाश्रिततयैवानुभूयत इति निराश्रयमुपादानप्रत्यक्षं दृष्टविपरीतं न कल्पनार्हमिति चेत् ? यद् यज्ज्ञानं तत् तत् किञ्चित्कारणजन्यमेवास्मदादीनामनुभूयत इति तार्किकत्वमात्मनोऽभिमन्यमानो नैयायिकस्त्वं दृष्टविपरीतकल्पनाभीतः किमिति नित्यज्ञानं कल्पयसि ?, इच्छा-प्रयत्नावप्यस्मदादीनां ज्ञानेच्छाजन्यावेव दृश्येते, तावपीश्वरस्याजन्यौ कथं कल्पयसीति चक्षुषी निमील्य विचारय, उक्तश्चायमर्थः सम्मतिटीकायामपि, तथा च तद्ग्रन्थः—

"बुद्धिश्चेश्वरस्य यदि नित्या व्यापिकैका चाभ्युपगम्येत तदा सैवाचेतनपदार्थाधिष्ठात्री भविष्यतीति किमपरतदाधारेश्वरात्मपरिकल्पनया ?; अथानाश्रितं तज्ज्ञानं न सम्भवतीति तदात्मपरिकल्पना, ननु तदात्माऽप्यनाश्रितो न सम्भवतीति अपरापराश्रयपरिकल्पनयाऽनन्तेश्वरप्रसङ्गः; अथ द्रव्यत्वात् तस्यानाश्रितस्यापि

सद्भावः, न बुद्धेः, गुणत्वादिति नायं दोषः; ननु कुतस्तस्या गुणत्वम् ?, तत्र समवेतत्वादिति नोत्तरम्, तस्यैवानिश्चयात्; तदाधेयत्वात् तस्यास्तत्समवेतत्वमिति चेत् ?, ननु केनैतत् प्रतीयते ?, न तावदीश्वरेण, तेनात्मनो ज्ञानस्य चाग्रहणात् 'इदमत्र समवेतम्' इति तस्य प्रतीतेरयोगात्; तज्ज्ञानस्य तत्र समवेतत्वमेव तद्ग्रहणमित्यपि नोत्तरम्, अन्योऽन्यसंश्रयात्— सिद्धे हि 'इदमत्र' इति ग्रहणे तत्र समवेतत्वासिद्धिः, अस्याश्च तद्ग्रहणसिद्धिरित्यन्योऽन्याश्रयः, तत्रेश्वरस्तज्ज्ञानमात्मनि समवेतमवैति, यश्चात्मीयमपि ज्ञानमात्मनि व्यवस्थितं न वेत्ति स सर्वजगदुपादान-सहकारिकारणादिकमवगमयिष्यतीति कः श्रद्धातुमर्हति ?, नापि तज्ज्ञानमवैति 'स्थाणावहं समवेतम्' इति, तेनात्मनोऽवेदनात्, आधारस्य च; न च तद्ग्रहणे 'इदं मम रूपमत्र स्थितम्' इति प्रतीतिः सम्भवति, न च तद् आत्मानमप्यवैति, अस्वसंविदित्वाभ्युपगमात्, न चापरं तद्ग्राहकं नित्यं ज्ञानं तस्येश्वरस्य संभवति—येनैकेन सकलं पदार्थजातमवगमयति, अपरेण तु तज्ज्ञानम्, समानकालं यावद् द्रव्यभाविसजातीयगुणद्वयस्यान्यत्रानुपलब्धेस्तत्रापि तत्कल्पनाऽसम्भवात्, तत्कल्पने वाऽकर्तृकमङ्कुरादिकार्यं किं न कल्प्येत; अस्तु वा तत्र यथोक्तं ज्ञानद्वयं तथापि तयोर्ज्ञानयोरन्यतरेण स्वग्रहणविधुरेण न स्वाधारस्य न सहचरस्य ज्ञानस्य नाप्यन्यस्य गोचरस्य ग्रहणम्, तथाहि—यत् स्वग्रहणविधुरं तन्नान्यग्रहणं, यथा घटादि, स्वग्रहणविधुरं च प्रकृतं ज्ञानम्, ततोऽनेन सहचरस्याग्रहणात् कथं तेनास्य ग्रहणम् ?, तेनापि ग्रहणविरहितेनास्य वेदने तदेव वक्तव्यमिति न कस्यचिद् ग्रहणम्, इति न समवेतत्वेन तद्बुद्धेर्ग्रहणम्, नापि तदाधारस्य द्रव्यत्वं सिद्धिमुपगच्छति; तस्मान्नित्य-बुद्धिपूर्वकत्वेऽङ्कुरादीनां किमिति युगपदुत्पादो न भवेत् ?, ईश्वरवत् तद्बुद्धेरपि सदा सन्निहितत्वात्, अनित्यबुद्धिसव्यपेक्षस्यापीश्वरस्याचेतनाधिष्ठायकत्वेन जगद्वि-धातृत्वे तस्य नित्यत्वेन तद्बुद्धेरपि सदा सन्निहितत्वम्, अविकलकारणयोः सर्वदा सन्निहितत्वाद् युगपदङ्कुरादिकार्योत्पत्तिप्रसङ्गः" इति ।

किञ्च तदुपादानप्रत्यक्षस्य सकलविषयकस्य साश्रयत्वेऽपि न तदाश्रयत्वेनाति-रिक्तमीश्वरात्मद्रव्यं कल्पनीयम्, किन्तु नानात्मस्वेव व्यासज्यवृत्ति तत् कल्प्यताम्, यथा च ज्ञानान्तरेष्वदृष्टमपि नित्यत्वं तत्र तथा ज्ञानान्तरेष्वदृष्टमपि व्यासज्य-वृत्तित्वं तत्र स्यादेव, यथा च तस्यानित्यत्वे प्रागभाव-ध्वंसादिकल्पनया गौरवमतो लाघवान्नित्यत्वं, तथा तस्य समवायेनेश्वरगतत्वे स्वाश्रयसंयुक्तसंयोगसम्बन्धेन नानात्मगतत्वं तत्तदात्मगतसुखदुःखादिकारणत्वानुरोधेनावश्यं वाच्यमिति निरुक्त-

परम्परासम्बन्धेन नानात्मगतत्वकल्पनापेक्षया समवायेन नानात्मगतत्वकल्पनैव लाघवाद् युक्ता; न च तस्य प्रमात्मकस्य तत्तद्वृत्तानिश्चयस्वरूपस्य तदभाववत्ता-बुद्धिप्रतिबन्धकस्य सर्वेष्वात्मसु सत्त्वाद् घटादिभ्रमोच्छेदापत्तिरिति वाच्यं, चैत्रीय-बाधबुद्धितो मैत्रीयभ्रमबुद्धिप्रतिबन्धाभावाच्चैत्रीयतद्वृत्ताभ्रमं प्रति चैत्रीयतदभाव-निश्चयस्यैव प्रतिबन्धकत्वं वाच्यं, चैत्रीयत्वं च समवेतत्वसम्बन्धेन चैत्रवत्त्वं पर्याप्त-त्वसम्बन्धेन चैत्रवत्त्वं वेत्यत्र न किञ्चिद् वैषम्यम्, तथा च समवेतत्वसम्बन्धेन चैत्रवत्तद्वृत्ताबुद्धिं प्रति पर्याप्तत्वसम्बन्धेन चैत्रवत्तदभाववत्तानिश्चयात्मकबाधबुद्धेः प्रतिबन्धकत्वमिति प्रमात्मकस्य सकलविषयकस्योपादानप्रत्यक्षस्य समवायसम्बन्धेन सकलात्मकस्यापि पर्याप्तत्वसम्बन्धेन चैत्रवत्त्वाभावात् तस्य प्रतिबन्धकतावच्छेदक-धर्मानाक्रान्तत्वात् तेन प्रतिबन्धासम्भवात् तत्सत्त्वेऽपि घटादिभ्रमोत्पत्तिसम्भवात्; अपि च "यत्र तर्हि तोये तेजसि वायौ वा न पाकजो विशेषः, तत्र कथमुद्भवा-ऽनुद्भव-द्रवत्व-कठिनत्वादयो विशेषाः, कथं वा पार्थिवे प्रतिमादौ प्रतिष्ठादिना संस्कृतेऽपि विशेषाभावात् पूजनादिना धर्मो व्यतिक्रमे त्वधर्मोऽप्रतिष्ठिते तु न किञ्चित्, न च तत्र यजमानधर्मेणान्यस्य साहाय्यकमाचरणीयम्, अन्यधर्मस्यान्यं प्रत्यनुपयोगात्, उपयोगे वा साधारण्यप्रसङ्गात्, अत्रोच्यते—

"निमित्तभेदसंसर्गादुद्भवानुद्भवादयः।
देवताः सन्निधानेन, प्रत्यभिज्ञानतोऽपि वा" ॥ १ ॥ [ ]

उपनायकादृष्टविशेषसहाया हि परमाणवो द्रव्यविशेषमारभन्ते, तेषां विशेषा-दुद्भवानुद्भवविशेषाः प्रादुर्भवन्ति, तथा स्वभावद्रवा अप्यापोनिमित्तभेदप्रतिबद्ध-द्रवत्वाः कठिनं करकाद्यारभन्ते, इत्यादि स्वयमूहनीयम्; प्रतिमादयस्तु तेन तेन विधिना सन्निधापितरुद्रोपेन्द्रमहेन्द्राद्यभिमानिदेवताभेदास्तत्र तत्राऽऽराधनीयता-मासादयन्ति, दष्टमूर्च्छितं राजशरीरमिव विषापनयनविधिनाऽऽपादितचैतन्यम्, सन्निधानं च तत्र तेषामहङ्कार-ममकारौ चित्रादाविव स्वसादृश्यदर्शिनो राज्ञ इति नो दर्शनम्, अन्येषां तु पूर्वपूर्वपूजितप्रत्यभिज्ञानविषयस्य प्रतिष्ठितप्रत्यभिज्ञान-विषयस्य च तथात्वमवसेयम्"।

इति कुसुमाञ्जलिग्रन्थावधृतेन "देवताः सन्निधानेन" इति नैयायिकाभिमत-स्वपक्षेण प्रतिष्ठादिना प्रतिमाविशेष्यकस्वाभेदस्वीयत्वादिप्रकारकं भ्रमात्मकज्ञानं तद्वाहितसंस्काररूपं ब्रह्मादौ भगवद्गीतावचनप्रामाण्यादीश्वराभिन्ने स्वीकृतं, यदि

चेश्वरे सर्वज्ञे दोषाभावाद् भ्रमात्मकज्ञानं सम्भवति तथाप्यहार्यभ्रमरूपं तदवश्य-मेष्टव्यमितीश्वरेऽपि जन्यज्ञानं समस्त्येव, बाधकालीनस्येच्छाजन्यस्यैवाहार्यत्वात्, एवं स्वस्वकामिन्यादिसम्पर्कप्रभवसुख-तद्वियोगप्रभवदुःखादिकं ब्रह्मादिषु श्रूयते, न च धर्माधर्मावन्तरेण सुखदुःखाद्युत्पत्तिसम्भव इति तावप्यङ्गीकर्तव्यौ, न चानित्य-ज्ञानादिनित्यज्ञानयोर्विशेषान्नैकत्र सम्भव इति वाच्यम्, ब्रह्मादिशरीरावच्छेदेना-नित्यज्ञानादिसत्त्वेऽप्यनवच्छिन्ननित्यज्ञानसत्त्वाविरोधात्, अत एव अन्ये तु-"स तपोऽतप्यत" [ ] इति श्रुतेः, अणिमादिप्रतिपादकश्रुतेश्च, धर्माधर्मावनित्य-ज्ञानादिकमपीश्वरे स्वीकुर्वन्ति" इति शशधरेऽभिहितम्, एतन्मते च बाधादि-प्रतिबन्धकतायामवच्छिन्नसमवेतत्वसम्बन्धेन चैत्रवत्त्वादिलक्षणचैत्रीयत्वादेरवश्यं निवेश्यत्वान्नातिरिक्तनित्यज्ञानाश्रयसिद्धिः, किञ्च सुखसाधनविषयसम्पादनादि-गोचरप्रवृत्तौ यथाऽन्वय-व्यतिरेकाभ्यामिच्छायाः कारणत्वं तथा दुःखसाधनशत्रु-सर्पादिमारणादिगोचरप्रवृत्तावन्वय-व्यतिरेकाभ्यां द्वेषस्यापि कारणत्वमवश्यं वाच्यं, न च प्रवृत्तौ द्वेषयोनित्वमसिद्धम्, दुःखद्वेषेन तत्साधनद्वेषे तन्नाशानुकूलप्रवृत्तेः कण्टकादौ दर्शनात्, न च दुःखसाधनद्वेषाद् दुःखसाधनविनाशादिविषयिणीच्छा भवति, ततस्तद्विनाशगोचरप्रवृत्तिरुपजायत इत्येवमिच्छैव तत्रापि कारणं, द्वेषो-ऽन्यथासिद्ध इति वाच्यम्, तस्य कारणत्वापेक्षया तद्धेतोरेव कारणत्वमिति न्यायाद् द्वेषस्यैव तत्र हेतुत्वौचित्यात्, यदि नैवमुपेयते तदा दुःखसाधने 'द्वेष्मि' इत्यनुभवे अनिष्टसाधनताज्ञानस्य, दुःखे 'द्वेष्मि' इत्यनुभवेऽनिष्टत्वज्ञानस्यैव द्वेषपदाभिलप्य-त्वतोऽतिरिक्तद्वेषपदार्थ एव न स्यात्, तथा च यथा कार्यसामान्ये इच्छाया हेतुत्वं तथा कार्यसामान्ये द्वेषस्यापि हेतुत्वसिद्धौ नित्यद्वेषोऽपीश्वरे सिद्ध्येत्, यत्र द्वेष-वत्त्वं तत्र संसारित्वमिति व्याप्तेरीश्वरस्य द्वेषवत्त्वे संसारित्वं प्रसज्येतेति चेत्?, यत्र चिकीर्षावत्त्वं तत्र संसारित्वमिति व्याप्तेरीश्वरे चिकीर्षावत्त्वे संसारित्वं किं न प्रसज्येतेति; ननु यत्र द्वेषस्तन्न क्रियते, यत्र चिकीर्षा तत् क्रियते, इति नियमा-दीश्वरगतद्वेषचिकीर्षयोर्नित्ययोः समानविषयत्वे युगपदेव कार्यस्य करणाकरण-प्रसङ्गः, तयोर्विभिन्नविषयत्वे यत्र द्वेषस्तत्र न चिकीर्षेति तत्कार्यं कदाचिदपि न कुर्यादिति बाधकादीश्वरे द्वेषकल्पना त्यज्यत इति चेत्? द्वेषसिद्ध्यनन्तरं तस्य चिकीर्षया समं समानविषयत्व-भिन्नविषयत्वविकल्पनतोऽनन्तरोपदर्शितो बाधकः समुपतिष्ठते, तेनापि बाधकेन तद्बाधोपगमे, क्लृप्तोऽपीश्वरो नित्यज्ञानादिकल्पना-गौरवादिबाधकेनोत्तरकालोपस्थितेन बाधितत्वात् त्यज्यतामिति ।

एतेन "पुरेषु पुरेशानामिव जगदीशज्ञानेच्छादित एव तत्तत्कार्याणां स्वल्पतमाऽधम-देशकालादिनियमः, वदन्ति हि पामरा अपि 'ईश्वरेच्छैव नियामिका' इति, न चैवं तत्तद्देश-कालनियततत्तत्कार्योत्पत्तिज्ञानादित एव तत्तत्कार्यनिर्वाहे गतं दण्डादिकारणत्वेनेति वाच्यं, तदनुमतत्वेनैव दण्डादीनां घटादिहेतुत्वात्, नहि दण्डादिरेव घटादेरनन्यथासिद्धनियतपूर्ववर्ती, न वेमादिः, कपालादि समवायि, न तन्त्वादिकम्, इत्यत्रान्यद् नियामकं पश्यामः, इति तदनुमत्यादिकमेव तथा, तदनुमत्यादिकं न साक्षात्, किन्तु तत्तत्कारणद्वारा तत्तत्सम्पादकम्, नहि राजाज्ञादितोऽपि विनांशुकं तन्त्वादि, विना तन्त्वादिकं पटादि" इति पामराशयानुसरण-संक्रान्तं पामरभावानां मतमपास्तम्, नहि राजाज्ञादितस्तत्तत्कारणप्रभवं तत्तत्कार्यं भवति किन्तु प्रतिनियतकार्यकारणभावबलात् प्रतिनियतकारणादेव प्रतिनियतं कार्यमिति यथा राजाज्ञादेर्न कारणत्वं तथा तत्तुल्याया इश्वरेच्छाया अप्यहेतुत्वात्, तत्तत्कार्यस्य तत्तन्नियतदेश-कालत्वं तत्तत्सामग्रीसिद्धमेव न तु तज्जन्यताघटकमिति तस्य तज्जन्यताघटकतयेश्वरेच्छाद्यनियम्यत्वात्, अन्यथा तत्कालावच्छिन्नतद्घटावच्छिन्नविशेष्यतासम्बन्धेनोपादाननिष्ठतयोपादानप्रत्यक्षादीनां त्रयाणां घटादिकं प्रति हेतुताकल्पने गौरवात्, उपादानप्रत्यक्षादीनां त्रयाणां समवेतत्वसम्बन्धेनेश्वरीयत्वेनानुगमेऽपि असंसार्यात्मत्वलक्षणेश्वरत्वनिवेशे गौरवात्, उक्तरूपेण कारणत्ववदुपादानप्रत्यक्षत्वादिनाऽपि प्रत्येकरूपेण कारणत्वं किं न स्यादित्येवं विनिगमनाविरहाच्च, तत्कालावच्छिन्नतद्घटावच्छिन्नत्वसम्बन्धेन नियतैरेव हेतुत्वकल्पनौचित्यात्, तावतैव तत्काल एव तद्घटवत्येव तद्घटस्योत्पत्तिरिति देशकालनियमसंभवेन नियत्यतिरिक्तकारणवैयर्थ्यापत्तेश्च, घटादिकं प्रति दण्डादिकमेव कारणं न तु वेमादिकमिति हेतुत्वनियमस्य स्वभावत एव सम्भवेन न हेतुत्वनियमार्थमपीश्वरानुसरणम्, स्वभावतो हेतुत्वनियमानभ्युपगमे ईश्वरज्ञानादेरेव तत्तत्कारणानुमतित्वं नान्वयस्येत्यत्र नियामकान्तरं गवेषणीयम्; येन प्रमाणेन ईश्वरज्ञानादिकं सिद्धं तेन प्रमाणेन तत्तत्कारणानुमतिरूपमेव तत्सिद्धमिति न तन्नियमनाय नियामकान्तरापेक्षेति चेत्? तर्हि येन प्रमाणेन दण्डादिकं घटादिकं प्रति कारणत्वेनावधृतं तेन प्रमाणेन दण्डादिकमेव घटादेः कारणमिति नियतमेव सिद्धमिति न तन्नियमनायेश्वरज्ञानादिकमपि कल्पनीयमिति; उक्तश्चायमर्थः सम्मतिटीकायामपि—

"न चाचेतनानामपि स्वहेतुसन्निधिसमासादितोत्पत्तीनां चेतनाधिष्ठातृव्यतिरेकेणापि देश-कालाकारनियमोऽनुपपन्नः, तन्नियमस्य स्वहेतुबलायातत्वाद्

अन्यथाऽधिष्ठातृज्ञानकृतोऽपि स न स्यात्, तज्ज्ञानस्य सर्वाचेतनाधिष्ठायकत्वे क्षणिकत्वे च तज्ज्ञेयत्वमेव तदधिष्ठितत्वं तेषां सर्वकालभाविकार्ये तदैव प्रवृत्तिरित्येकक्षण एवोत्तरकालभाविकार्योत्पत्तिप्रसङ्गः, अपरक्षणेऽपि तथाभूतज्ञानसद्भावे पुनरप्यनन्तरकालकार्योत्पत्तिः सदैवेति योऽयं क्रमेणाङ्कुरादिकार्यसद्भावः स विशीर्येत, कतिपयाचेतनविषयत्वे च तज्ज्ञानादेस्तदविषयाणां स्वकार्ये प्रवृत्तिर्न स्यात्, इति तत्कार्यशून्यः सकलः संसारः प्रसक्तः, नहि तज्ज्ञानादिविषयत्वव्यतिरेकेणापरं तेषां तदधिष्ठितत्वं परेणाभ्युपगम्यते; अथ नित्यं तज्ज्ञानादि, नन्वेवं क्षणिकं ज्ञानम्, अस्मदादिप्रत्यक्षत्वे सति विभुद्रव्यविशेषगुणत्वात्, शब्दवत्, इत्यत्र प्रयोगे महेशज्ञानेन हेतोर्व्यभिचारः; अथ तज्ज्ञानादिव्यतिरेके सतीति विशेषणान्नायं दोषः, न–विपक्षविरुद्धविशेषणं हेतोस्ततो व्यावर्तकं भवति, अन्यथा तद्व्यावर्तकत्वायोगात्, न च अक्षणिकत्वेन तद्व्यतिरिक्तत्वं विरुद्धम्, द्विविधस्यापि विशेषस्यानयोरसिद्धेः, न च विपक्षाविरुद्धविशेषणोपादानमात्रेण हेतोर्व्यभिचारोद्धारः, अन्यथा न कश्चिद्धेतुर्व्यभिचारी स्यात्, सर्वत्र व्यभिचारविषये एतद्व्यतिरिक्तत्वे सतीति विशेषणस्योपादातुं शक्यत्वात्, न च नैयायिकमतेनाक्षणिकं ज्ञानं संभवति, 'अर्थवत् प्रमाणम्' इति वचनात्–अर्थकार्यं ज्ञानं तद्विषयमभ्युपगतम्, अर्थश्च क्रमभावी अतीतोऽनागतश्च, यच्च क्रमवज्ज्ञेयविषयं ज्ञानं तत्क्रमभावि, तथा देवदत्तादिज्ञानं ज्वालादिगोचरम्, क्रमवद्विज्ञेयविषयं चेश्वरज्ञानमिति स्वभावहेतुः, प्रसङ्गसाधनं चेदं, तेनाश्रयासिद्धता हेतोर्नाशङ्कनीया, न च विपर्यये बाधकप्रमाणाभावाद् व्याप्यव्यापकभावासिद्धेर्न प्रसङ्गसाधनावकाशोऽत्रेति वक्तव्यं, तस्य भावात्, तथाहि–यदि क्रमवता विषयेण तद् ईश्वरज्ञानं स्वनिर्भासं जन्यते तदा सिद्धमेव क्रमित्वम्, अथ न जन्यते, तदा प्रत्यासत्तिनिबन्धनाभावान्न तज्जानीयात्, विषयमन्तरेणापि च भवतः प्रामाण्यमभ्युपगतं हीयेत, अतीतानागते विषये निर्विषयत्वप्रसङ्गादिति विपर्ययबाधकसद्भावः सिद्धः, तज्ज्ञानादेश्च नित्यत्वे तद्विषयत्वमन्तरेणापरस्य चेतनाधिष्ठितत्वस्याभावादविकलकारणस्य जगतो युगपदुत्पत्तिप्रसङ्गः, तथाहि–यदविकलकारणं तद् भवत्येव, यथाऽन्त्यावस्थाप्राप्तायाः सामग्र्या अविकलकारणो भवन्नङ्कुरः, अविकलकारणं च सर्वदा सर्वमीश्वरज्ञानादिहेतुकं जगदिति युगपद् भवेत्" इति ग्रन्थेन ।

किञ्च, एतादृशनियामकत्वं भवस्थ-सिद्धादिज्ञान एव, इति किं शिपिविष्टकल्पनाकष्टेन ?, तदिदमुक्तं हेमसूरिभिः—

"सर्वभावेषु कर्तृत्वं, ज्ञातृत्वं यदि सम्मतम् ।
मतं नः सन्ति सर्वज्ञा, मुक्ताः कायभृतोऽपि हि" ॥ १ ॥ [ ] इति ।
युक्तं चैतत्, "जं जहा भगवया दिट्ठं तं तहा विपरिणामइ"
[ यद् यद् भगवता दृष्टं तत् तथा विपरिणमते" ]
इति भगवद्वचनस्यापीत्थमेव व्यवस्थितत्वात्,

"समालोच्य क्षुद्रेष्वपि भवननाथस्य भवने,-
नियोगाद् भूतानां मितसमयदेश-स्थिति-लयम् ।
अये ! केयं भ्रान्तिः सततमपि मीमांसनजुषां,
व्यवस्थातः कार्ये जगति जगदीशाऽपरिचयः" ॥ १ ॥

इति परकीयं पद्यं प्रति प्रतिपद्यमिदं श्रीमन्न्यायविशारदानाम्-

"विनष्टीयं पिष्टं भवनियमसिद्धिव्यवसितिः,
स्वभावाद् भूतानां मितसमयदेशस्थितिरिति ।
अये ! केयं भ्रान्तिः सततमपि तर्कव्यसनिनां,
वृथा यद्व्यापारो जगति जगदीशस्य कथितः" ॥ १ ॥ इति ।

उक्तानुमानखण्डनयुक्त्यैवापराण्यपि परस्येश्वरसाधकान्यनुमानानि खण्डितानि भवन्ति, किञ्च स्वोपादानगोचरास्वजमकादृष्टाजनिका या कृतिस्तज्जन्यं समवेतं जन्यं स्वोपादानगोचरस्वजनकादृष्टजनकान्यापरोक्षज्ञानचिकीर्षाकृतिजन्यं कार्यत्वादिति द्वितीयानुमाने साध्यघटक'स्वोपादान' इत्यत्र स्वपदस्य द्व्यणुकादिपरत्वे घटादौ दृष्टान्ते द्व्यणुकाद्युपादानगोचर-द्व्यणुकादिजनकादृष्टजनकान्यापरोक्षज्ञान-चिकीर्षाकृतिजन्यत्वरूपसाध्याभावाद् दृष्टान्ताप्रसिद्धिः, घटादिपरत्वे पटादौ संदिग्धानैकान्तिकत्वं, घटादिकं प्रति विशेष्यकपालगोचरज्ञानत्वादिना कारणत्वेन स्वोपादानगोचरापरोक्षज्ञानत्वादिना सामान्यतः कार्यत्वावच्छिन्नं प्रति कारणत्वाभावेनाप्रयोजकत्वं च ।

'द्रव्याणि ज्ञानेच्छाकृतिमन्ति कार्यवत्त्वात् कपालवत्' इति तृतीयानुमाने यथा कृतित्वेन कार्यत्वेन सामान्यतो न कार्यकारणभाव इति कार्यवत्त्वमप्रयोजकत्वान्न कृतिमत्त्वसाधनप्रगल्भम्, तथा ज्ञानत्वेन कार्यत्वेन न कार्यकारणभावो न वेच्छात्वेन कार्यत्वेन कार्यकारणभाव इति कार्यवत्त्वप्रयोजकत्वान्न तत्साधनप्रगल्भमिति कार्यकोटौ ज्ञानेच्छापदोपादानं प्रयासमात्रम्, सर्गाद्यकालीनं द्रव्यं ज्ञानवत् कार्यवत्त्वादिति तुरीयानुमाने सर्गाप्रसिद्ध्या परं प्रति पक्षाप्रसिद्धिः ।

कार्यं सकर्तृकं कार्यत्वादिति प्रथमानुमानमेव कार्यमित्यस्य स्थाने क्षित्यादिकमित्यभिषिच्य यत् पञ्चममनुमानं प्रकृतविचारानुकूलविवादविषयत्वेन च क्षित्यादीनामनुगमः सकर्तृकत्वं च प्रतिनियतकर्तृनिरूपितः सम्बन्धो व्यवहारसाक्षिको घटादिदृष्टान्तदृष्टो नित्यवर्गव्यावृत्त इत्येवमुपबृंहितम्, तत्र क्षित्यादावकर्तृकत्वस्यैव व्यवहाराद् बाधः, विशेषान्वय-व्यतिरेकाभ्यां कर्तृत्वेन कार्यसामान्य एव हेतुत्वग्रहान्न बाध इति चेत् ?, यथा घटादिकार्ये कुलालादिकर्तुरन्वय-व्यतिरेकौ तथा तच्छरीर-चेष्टयोरपि तत्रान्वयव्यतिरेकाविति ताभ्यां शरीर-चेष्टयोरपि कार्यसामान्ये कारणत्वात् तयोरपि नित्ययोगीश्वरे प्रसक्तिः स्यात्; अथ नित्यशरीरमिष्यत एव भगवतः, प्रयत्नवदात्मसंयोगासमवायिकारणकक्रियायाश्चेष्टात्वं चेष्टावत्त्वं च शरीरत्वमिति प्रयत्नवदीश्वरात्मसंयोगाधीनक्रियात्मकचेष्टावत्त्वात् परमाणव एवेश्वरस्य शरीराणीत्येके, वायुपरमाणव एव नित्यक्रियावन्त ईश्वरस्य शरीराणि, अत एव तेषां सदागतिमत्त्वमित्यन्ये, "आकाशशरीरं ब्रह्म" [ ] इति श्रुतेः, आकाशस्तच्छरीरमित्यपरे, चेष्टाया नित्यत्वे तु मानाभावः, नित्यज्ञानसिद्धौ तु श्रुतिरपि पक्षपातिनी–"नित्यं विज्ञानम्" [ ] इत्यादिका, ज्ञानत्वस्य नित्यज्ञानवृत्तित्वस्य श्रुत्या निर्णीतत्वेनातिप्रसक्तत्वान्नात्ममनोयोगजन्यतावच्छेदकत्वमिति ज्ञानत्वावच्छेदेनात्ममनोयोगजन्यत्वमसिद्धं न नित्यज्ञानबाधकमिति चेत् ?, न–ईश्वरसम्बन्धस्य सर्वत्राविशेषेण 'इदमेवेश्वरशरीरम्' इति नियमाभावात्, चेष्टाया अपि ज्ञानवदेकस्या नित्यायाश्च स्वीकारौचित्यात्, उक्तश्रुतेस्त्वदभिमतेश्वरज्ञानापक्षपातित्वाच्च, अन्यथा आनन्दोऽपि ज्ञानभिन्नस्तत्रोक्तश्रुतिबलात् सिद्ध्येदिति ।

द्व्यणुकारम्भकसंयोगजनकसर्गाद्यकालीनाणुकर्मात्मकायोजनेनेश्वरसिद्धिः सर्गाद्यकालीनाणुकर्म प्रयत्नजन्यं कर्मत्वात् अस्मदादिशरीरकर्मवदिति कर्मत्वहेतुकानुमानतः प्राक् प्रतिपादिताऽपि न युक्ता, ईश्वराधिष्ठानस्य सर्वदा सत्त्वेऽप्यदृष्टविलम्बादेवाद्याणुक्रियाविलम्बाददृष्टस्यैवाद्याणुक्रियायां कारणत्वात्, दृष्टकारणकूटसत्त्व एवादृष्टविलम्बेन कार्यविलम्बाभावात्, अदृष्टस्य दृष्टाघातकत्वात्, यत्र यत्र क्रियायां प्रयत्नजन्यत्वं तत्र चेष्टावत्त्वमित्येवं साधनावच्छिन्नसाध्यव्यापकत्वेनाद्याणुक्रियायां क्रियात्वलक्षणसाधनाव्यापकत्वेन चेष्टात्वस्योक्तानुमाने उपाधित्वाच्च, चेष्टात्वावच्छिन्न एव हि जीवनयोनियत्नव्यावृत्तेन प्रवृत्तित्वेन हेतुत्वात्, चेष्टात्वस्य गमनत्वादिव्याप्यत्वे तु तदवच्छिन्ने विलक्षणयत्नत्वेनैव हेतुत्वात् क्रियासामान्ये यत्नत्वेन हेतुत्वे मानाभावात्, क्रियाविशेषे यत्नविशेषस्य कारणत्वे क्रियासामान्ये यत्न-

सामान्यस्य कारणत्वं यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपीति न्यायात् तदा सिध्येद् यद्युक्तन्यायः प्रमाणविषयो भवेत्, न चैवं, तत्र प्रमाणानुपलम्भात् ।

धृतेरपीश्वरसिद्धिः 'ब्रह्माण्डादिपतनाभावः पतनप्रतिबन्धकप्रयुक्तः, धृतित्वात्, उत्पतत्पतत्रिपतनाभाववत्, तत्पतत्रिसंयुक्ततृणादिधृतिवद् वा' इति धृतित्वहेतुकानुमानेन या पूर्वमावेदिता साऽपि न न्यायसङ्गता, गुरुत्ववत् पतनाभावमात्रस्य गुरुत्वेतरहेत्वभावप्रयुक्तस्याम्रफलादावेव व्यभिचारित्वात्, अर्थात् तत्र धृतित्वसत्त्वेऽपि पतनप्रतिबन्धकप्रयुक्तत्वाभावात्, प्रतिबन्धकाभावेतरसामग्रीकालीनत्वे सति धृतित्वस्य हेतूकरणेऽपि वेगवदिषुपतनाभावे निरुक्तहेतुसत्त्वेऽपि पतनप्रतिबन्धकप्रयुक्तत्वाभावेन व्यभिचारात्, वेगाप्रयुक्तत्वस्य हेतुघटकतयोपादानेऽपि मन्त्रविशेषप्रयुक्तगोलकपतनाभावे व्यभिचारात्, अदृष्टाप्रयुक्तत्वस्यापि विशेषणत्वे स्वरूपासिद्धिः, ब्रह्माण्डधृतेरप्यदृष्टप्रयुक्तत्वात्, तदुक्तम्—

"निरालम्बा निराधारा, विश्वाधारा वसुन्धरा ।
यच्चावतिष्ठते तत्र, धर्मादन्यन्न कारणम्" ॥ १ ॥ [ ] इति ।

पतनप्रतिबन्धकप्रयुक्तत्वमिहेश्वर-प्रयत्नसाधनार्थं साध्यतयोपन्यस्तं पतनप्रतिबन्धकप्रयत्नप्रयुक्तत्वरूपमेव परस्याभिप्रेतमत आम्रफलादिपतनप्रतिबन्धकवृन्तसंयोगस्य इषुपतनप्रतिबन्धकवेगस्य गोलकपतनप्रतिबन्धकमन्त्रविशेषस्य च प्रयुक्तत्वमुपादाय व्यभिचारपरिहारो न सङ्गतिमञ्चतीति बोध्यम्, युज्यते च ब्रह्माण्डधृतेरप्यदृष्टप्रयुक्तत्वम्, कथमन्यथा धृतेः प्रयत्नवदीश्वरात्मसंयोगप्रयुक्तत्वे प्रयत्नवत ईश्वरस्य व्यापकत्वेन तत्संयोगस्य सङ्ग्रामे प्रक्षिप्ते गुरुत्ववत्यपि शरे सत्त्वेन तत्पातः स्यात, ततस्तत्पाताभावस्यैव प्रसक्तेः; पतनाभावावच्छिन्नेश्वरप्रयत्नस्य पतनप्रतिबन्धकत्वं, यदा शरस्य पतनमुपजायते तदेश्वरप्रयत्नो न पतनाभावावच्छिन्न इति तत्सत्त्वेऽपि पतनं स्यादिति यदि तदा पतनाभावावच्छिन्नेश्वरज्ञानस्य पतनाभावावच्छिन्नेश्वरेच्छायाश्च विनिगमनाविरहात् तथात्वं प्रसज्येतेत्यतः क्लृप्तजातीयस्यादृष्टस्यैव ब्रह्माण्डधारकत्वकल्पनौचित्यात्; न च स्याद्वादिमते आत्मनोऽविभुत्वेन तद्गतस्यादृष्टस्य न स्वाश्रयात्मसंयोगसम्बन्धेन ब्रह्माण्डोदरवर्तिनिखिलसक्रियपदार्थसम्बद्धत्वमित्यसम्बद्धस्य तस्य कथं पतनाभावप्रयोजकत्वमिति वाच्यम्, असम्बद्धस्यापि तत्कार्यजननशक्तस्य तत्कार्यकारित्वात्, दृश्यते च लोहासम्बद्धस्याप्ययस्कान्तस्य लोहाकर्षकत्वम्, प्रयत्नस्य तु विलक्षणप्रयत्नत्वेन पतनप्रतिबन्धक-

संयोगविशेष एव हेतुत्वम्, तथा च ब्रह्माण्डधारकसंयोगस्य प्रयत्नजन्यसंयोगविलक्षणत्वान्न प्रयत्नजन्यत्वमिति न तद्द्वारा प्रयत्नप्रयुक्तत्वं ब्रह्माण्डधृतेरिति।

ब्रह्माण्डनाशः प्रयत्नजन्यो नाशत्वात् पाट्यमानपटनाशवदित्येवं ब्रह्माण्डनाशकतयेश्वरसाधनं प्रागुपदर्शितं न शोभनम्, प्रलयानभ्युपगमात्, अहोरात्रस्याहोरात्रपूर्वकत्वनियमात्, विवादाध्यासितमहोरात्रमहोरात्रपूर्वकमहोरात्रत्वादिदानीन्तनाहोरात्रवदित्यनुमानेनाहोरात्रप्रवाहस्यानादेरेव सिद्धेः। न च वर्षाद्यदिनत्वेनाभिमतं वर्षादिदिनं वर्षादिदिनपूर्वकं वर्षादिदिनत्वादुभयप्रतिपन्नद्वितीयादिवर्षादिदिनवदित्यनुमाने यथा राशिविशेषावच्छिन्नरविपूर्वकत्वमुपाधिस्तथा प्रकृतानुमानेऽपि अव्यवहितसंसारपूर्वकत्वमुपाधिरिति वाच्यम्, राशिविशेषस्य वर्षादिदिनं प्रति हेतुत्वेन तत्रानुकूलतर्केणोपाधेः साध्यव्यापकत्वग्रहेऽप्यनुकूलतर्काभावेन प्रकृते उपाधेरसमर्थत्वात्, यत्र यत्र कालत्वं तत्र तत्र भोगपदार्थवत्त्वमिति व्याप्तेर्भोग्यपदार्थवत्त्वस्य कालत्वव्यापकत्वेन प्रलयतया पराभिमते काले भोग्यपदार्थरूपव्यापकाभावात् कालत्वस्याप्यभावापत्तेरिति प्रलयकालो न सम्भवति, कर्मणां युगपन्निरोधात् तत्काले न भोग्यपदार्थभाव इति कालत्वस्य न भोग्यव्याप्यत्वमिति न वाच्यं, कर्मणां विषमविपाकतया युगपन्निरोधासम्भवात्, सुषुप्तौ कतिपयादृष्टनिरोधस्य दर्शनावरणनिरोधरूपादृष्टसामर्थ्यादेवोपपत्तेर्बलवताऽदृष्टेनादृष्टान्तरप्रतिरोधदर्शनात्, प्रलये तु कथं तादृशादृष्टं विनाऽदृष्टनिरोधः स्यात्, अन्यथा त्वनायाससिद्धो मोक्ष इति किं ब्रह्मचर्यादिक्लेशानुभवेन ?।

एतेन 'आद्यव्यवहारादीश्वरसिद्धिः, प्रतिसर्गं मन्वादीनां बहूनां व्यवहारप्रवर्तकानां कल्पने गौरवादेकस्यैव भगवतः सिद्धेः' इत्यपास्तम्, सर्गादेरेवासिद्धेः, इदानीमिव सर्वदा पूर्वपूर्वव्यवहारेणैवोत्तरोत्तरव्यवहारोपपत्तेः, यदि तु सर्गादिरुपेयते तदा तदानीं प्रयोज्य-प्रयोजकवृद्धयोरभावात् कथं व्यवहारः ?, अथ यथा मायावी सूत्रसंचाराधिष्ठितदारुपुत्रकं 'घटमानय' इत्यादि नियोज्य घटानयनं सम्पाद्य बालकस्य व्युत्पत्तौ प्रयोजकः, तथेश्वरोऽपि प्रयोज्य-प्रयोजकवृद्धीभूय व्यवहारं कृत्वाऽद्य व्युत्पत्तिं कारयति, न चात्र घटानयनानुकूला चेष्टा घटानयनगोचरप्रवृत्तिजन्या घटानयनानुकूलचेष्टात्वात्, मदीयस्तनपानाद्यनुकूलचेष्टावत्, अत्र या यदनुकूला चेष्टा सा तद्गोचरप्रवृत्तिजन्येति सामान्यव्याप्तिः प्रयोजिका, इत्येवं चेष्टया प्रवृत्तिम्, घटानयनविषयिणीयं प्रवृत्तिर्घटानयनविशेष्यकेष्टसाधनत्वप्रकारकज्ञानजन्या घटानयनविधेयकप्रवृत्तित्वात्, या यद्विधेयका प्रवृत्तिः सा तद्विशेष्यकेष्ट-

साधनत्वप्रकारकज्ञानजन्या यथा मदीयस्तन्यपानविधेयकप्रवृत्तिरित्येवं प्रवृत्त्या ज्ञानम्, घटानयनमिष्टसाधनमिति ज्ञानं घटमानयेतिवाक्यजन्यं तदन्वयव्यतिरेकानुविधायिकारणान्तराभावे सति एतद्वाक्यश्रवणानन्तरं जायमानत्वात्, यन्नैवं तन्नैवमित्येवं तज्ज्ञाने उपस्थितघटमानयेतिवाक्यहेतुकत्वम्, घटानयनमिष्टसाधनमिति ज्ञाने घटादितत्तत्पदार्थभानं घटमानयेतिवाक्यघटकघटादिपदज्ञानजन्यं घटादिपदाघटितपटमानयेति वाक्यप्रभवज्ञाने तदभावे सति घटादिपदघटितवाक्यजन्यज्ञानेऽवश्यम्भावादित्येवं तज्ज्ञाने घटादितत्तत्पदार्थभाने आवापोद्वापाभ्यां तत्तत्पदज्ञानहेतुकत्वं चानुमाय घटादितत्तत्पदं घटादितत्तदर्थसम्बन्धवत् तत्तदर्थज्ञानानुकूलत्वादित्येवं तत्तत्पदे तत्तदर्थज्ञानानुकूलत्वेन तत्तदर्थसम्बन्धवत्त्वमनुमेयम्, एवं चायं बालस्य पदपदार्थसम्बन्धग्रहो भ्रमः स्यात्, प्रयोजक-प्रयोज्यवृद्धयोरीश्वरानतिरेकेण प्रयोज्यवृद्धशरीरगतघटानयनानुकूलचेष्टायाः प्रयोज्यवृद्धेश्वरप्रवृत्तिजन्यत्वेऽपि तदीयघटानयनगोचरप्रवृत्तेर्नित्यायास्तदीयघटानयनविशेष्यकेष्टसाधनताज्ञानाजन्यत्वेन बालस्य प्रयोज्यवृद्धगतनिरुक्तप्रवृत्तिविशेष्यकस्य घटानयनविशेष्यकेष्टसाधनत्वप्रकारकज्ञानजन्यत्वप्रकारकस्य ज्ञानस्य भ्रमत्वात्, एवं प्रयोज्यवृद्धस्येश्वररूपस्य तज्ज्ञानं न जन्यमिति तज्ज्ञानविशेष्यकोपस्थितवाक्यप्रभवत्वप्रकारकज्ञानस्यापि बालस्य भ्रमत्वादिति जनकज्ञानस्य भ्रमत्वे तज्जन्यस्य बालके पदपदार्थसम्बन्धग्रहस्य भ्रमत्वावश्यम्भावादिति वाच्यं, जनकज्ञानस्य भ्रमत्वेऽपि पदपदार्थसम्बन्धस्याबाधितत्वेन तद्विषयकस्य ज्ञानस्य तज्जन्यस्य प्रमात्वात्, तत्तत् पदं तत्तदर्थसम्बन्धवत् तत्तदर्थज्ञानानुकूलत्वादित्यत्र तत्तत्पदविशेष्यकतत्तदर्थसम्बन्धप्रकारकानुमितिहेतोस्तत्तदर्थसम्बन्धव्याप्यतत्तदर्थज्ञानानुकूलत्ववत् तत्तत् पदमिति परामर्शस्य प्रमात्वेन तज्जन्यस्य तत्तत्पदविशेष्यकतत्तदर्थसम्बन्धप्रकारकानुमित्यात्मकपदपदार्थसम्बन्धग्रहस्य जनकज्ञानप्रामाण्यप्रयुक्तप्रामाण्यस्यापि सम्भवाच्च, एवमीश्वर एव कुलालादिशरीरं परिगृह्य घटादिसम्प्रदायप्रवर्तकः, अत एव श्रुतिः–"नमः कुलालेभ्यो नमः कर्मारेभ्यः" [ ] इत्यादि ।

उक्तं च, कुसुमाञ्जलावुदयनाचार्येण–"सर्गप्रलयसम्भवाद् अहोरात्रस्याहोरात्रपूर्वकत्वनियमात् कर्मणां विषमविपाकसमयतया युगपद्वृत्तिनिरोधानुपपत्तेर्वर्णादिव्यवस्थानुपपत्तेः समयानुपलब्धौ शाब्दव्यवहारविलोपप्रसङ्गात्, घटादिसम्प्रदायभङ्गप्रसङ्गाच्च कथमेवमिति चेत्? उच्यते—

"वर्षादिवद्भवोपाधिर्वृत्तिरोधः सुषुप्तिवत् ।
उद्भिद्वृश्चिकवद् वर्णा, मायावत् समयादयः" ॥ १ ॥

तत्पूर्वकत्वमात्रे सिद्धसाधनात्, अनन्तरतत्पूर्वकत्वेऽप्रयोजकत्वात्, वर्षादिदिनपूर्वकतद्दिननियमभङ्गवदुपपत्तेः, राश्यादिविशेषसंसर्गरूपकालोपाधिप्रयुक्तं हि तत्, तदभाव एव व्यावृत्तेः, तथेहापि सर्गानुवृत्तिनिमित्तब्रह्माण्डस्थितिरूपकालोपाधिनिबन्धनत्वात् तस्य तदभाव एव व्यावृत्तौ को दोषः?, न च तदनुत्पन्नमनश्वरं वा, अवयवित्वात्, वृत्तिनिरोधस्यापि सुषुप्त्यवस्थावदुपपत्तेः, न ह्यनियतविपाकसमयानि कर्माणीति न तदानीं कृत्स्नान्येव भोगविमुखानि, नह्यचेतनवतः कश्चिद् भोगो नाम, विरोधात्, कस्तर्हि तदानीं शरीरस्योपभोगः?, तं प्रति न कश्चित्, तर्हि किमर्थमनुवर्तते?, उत्तरभोगार्थं, चक्षुरादिवत्, प्राणिति किमर्थम्?, श्वासप्रश्वाससन्तानेनायुषोऽवस्थाभेदार्थम्, तेन भोगविशेषसिद्धेः, एकस्यैव तत् कथञ्चिदुपपद्यते न तु विश्वस्येति चेत्?, अनन्ततयाऽनियतविपाकसमयतया उपमर्द्योपमर्दकस्वभावतया च कर्मणां, विश्वस्यैकस्य वा को विशेषो येन तन्न भवेत्?, भवति च सर्वस्यैव सुष्वापः क्रमेण न तु युगपदिति चेत्?, न–कारणक्रमाऽऽयत्तत्वात् कार्यक्रमस्य, न च स्वहेतुबलाऽऽयातैः कारणैः क्रमेणैव भवितव्यम्, अनियतत्वादेव, सर्वग्रासवत्, ग्रहाणां ह्यन्यदा समागमानियमेऽपि तथा कदाचित् स्यात्, यथा कलाद्यनियमेऽपि सर्वमण्डलोपरागः स्यात्, त्रिदोषसन्निपातवद् वा, यथा हि वात-पित्त-श्लेष्मणां चयप्रकोपप्रशमक्रमानियमेऽपि एकदा सन्निपातः स्यात् तदा देहसंहारः, तथा कालानल-पवन-महार्णवानां सन्निपाते ब्रह्माण्डदेहप्रलयावस्थायां युगपदेव भोगरहिताश्चेतनाः स्युरिति को विरोधः?, तथापि विदेहाः कर्मिण इति दुर्घटमिति चेत्?, किमत्र दुर्घटम्?, भोगनिरोधवच्छरीरेन्द्रियविषयनिमित्तनिरोधादेव तदुपपत्तेः, वृश्चिकतण्डुलीयकादिवद् वर्णादिव्यवस्थाऽप्युपपद्यते, यथा हि वृश्चिकपूर्वकत्वेऽपि वृश्चिकस्य गोमयादाद्यः, तण्डुलीयकपूर्वकत्वेऽपि तण्डुलीयकस्य तण्डुलीयकादाद्यः, वह्निपूर्वकत्वेऽपि वह्नेररणेराद्यः, एवं क्षीर-दधि-घृत-तैल-कदलीकाण्डादयः, तथा मानुष-पशु-गो-ब्राह्मणपूर्वकत्वेऽपि तेषां प्राथमिकास्तत्तत्कर्मोपनिबद्धभूतभेदहेतुका एव स एव हेतुः सर्वानुगत इति सर्वेषां तत्सान्तानिकानां समानजातीयत्वमिति किमसङ्गतम्?, गतं तर्हि गोपूर्वकोऽयं गोत्वादित्यादिना, न गतं, योनिजेष्वेव व्यवस्थापनम्, मानसास्त्वन्यथाऽपीति, गोमयवृश्चिकादिदानीमपि किं न स्याद्? इति चेत्, न–कालविशेषनियतत्वात् कार्यविशेषाणां, नहि वर्षासु गोमयात् शालूक इति हेमन्ते किं न स्यात्?, समयोऽप्येकेनैव मायाविनेव व्युत्पाद्यव्युत्पादकभावावस्थितनानाकायाधिष्ठानाद् व्यवहारत एव सुकरः, यथा

हि–मायावी सूत्रसञ्चाराधिष्ठितं दारुपुत्रकम् इदमानयेति प्रयुङ्क्ते, स च दारुपुत्रकस्तथा करोति, तदा चेतनव्यवहारादिवत् तद्दर्शी बालो व्युत्पद्यते तथेहापि स्यात्, क्रियाव्युत्पत्तिरपि तत एव कुलाल-कुविन्दादीनाम्" इति ।

इति चेत्, न–अदृष्टाभावेन प्रयोज्यादिशरीरपरिग्रहस्यैव भगवतोऽयुक्तत्वात्, अन्यादृष्टेनान्यस्य शरीरपरिग्रहे चैत्रादृष्टाकृष्टं शरीरं मैत्रोऽपि परिगृह्णीयात्; प्राण्यदृष्टेन घटादिवत् तत्तच्छरीरोत्पत्तिः, तत्परिग्रहस्तु भगवतस्तदावेश एवेति न दोष इति चेत्?, न–घटादावतथात्वेऽपि तदीयशरीरे तदीयादृष्टत्वेनैव हेतुत्वात्, अन्यथा चैत्रादृष्टेन मैत्रशरीरोत्पत्तिरपि प्रसज्येतेति; किञ्च, प्राण्यदृष्टेनोत्पन्ने शरीरे भगवत आवेशस्तत्परिग्रहः' इति यदुक्तं तत्र कोऽयमावेशो नाम?, तच्छरीरावच्छिन्नप्रयत्न एव तच्छरीरावेश इति चेत्? न–अवच्छेदकतासम्बन्धेन प्रयत्नं प्रति तादात्म्यसम्बन्धेन शरीरं कारणमिति शरीरेऽवच्छेदकतयोत्पद्यमानः प्रयत्नः शरीरावच्छिन्नो भवति, ईश्वरप्रयत्नस्तु नित्यत्वान्न शरीरे अवच्छेदकतासम्बन्धेनोत्पद्यत इति कुलालादिशरीराजन्यस्येश्वरप्रयत्नस्य कुलालादिशरीरावच्छिन्नत्वासम्भवात्; अथैवं भूतावेशानुपपत्तिः, तत्र हि यच्छरीरे प्रविष्टो भूतस्तच्छरीरावच्छेदेन भूतात्मन्येव प्रवृत्तिरङ्गीक्रियते, तच्छरीरवतो जीवस्य यद्यत्पदार्थविषयकं ज्ञानं नास्ति तत्तत्पदार्थमपि भूतात्मा प्रतिपादयति तत्प्रतिपादनानुकूलप्रयत्नो भूतात्मगतोऽन्यजीवशरीराजन्योऽपि तदवच्छिन्न इति तज्जन्यस्यैव तदवच्छिन्नत्वमिति नास्ति नियमः, इत्यन्यजीवशरीराजन्योऽपीश्वरप्रयत्नस्तच्छरीरावच्छिन्न इति भवति तदावेशः, न च यच्छरीरे प्रविशति भूतस्तदात्मन्येव तादृशप्रयत्नं जनयति येन स जीवस्तत्तत्पदार्थानभिज्ञोऽपि तत्तत्पदार्थं प्रतिपादयतीति वाच्यं, मृतशरीरे नान्यजीवो वर्ततेऽथापि तत्र प्रविष्टो भूतो यथा तथा वचनचेष्टादिकं विदधातीति तत्र भूतात्मनि प्रयत्नानभ्युपगमे मृतावेशानापत्तेरिति चेत्? इयमपि तवैव नैयायिकस्यानुपपत्तिः, अस्माकं तु जिनवचनैकनिरतानां तत्र सङ्कोच-विकासस्वभावभूतात्मप्रदेशानुप्रवेशादुपपत्तेः, नैयायिकमते तु अवच्छेदकतासम्बन्धेन चैत्रप्रयत्नं प्रति चैत्रशरीरत्वेन हेतुताऽवश्यं वक्तव्या, विशिष्योक्तकार्यकारणभावानभ्युपगमे सामान्यतोऽवच्छेदकतासम्बन्धेन प्रयत्नत्वावच्छिन्नं प्रति शरीरत्वेन कारणत्वाभ्युपगमे तद्बलान्मैत्रशरीरावच्छेदेन चैत्रप्रवृत्त्यापत्तेः; न च सामान्यकारणबलादापत्तिस्तदैव भवति, कारणान्तरमप्यापादकं किमपि तत्सहकारि भवेत्, प्रकृते तन्नास्तीति नोक्तापत्तिसम्भव इति वाच्यं, पाण्यादिचालकप्रयत्नसत्त्व एव पुनस्तदापत्तिवारणा-

यावच्छेदकतया तत्प्रयत्ने अवच्छेदकतातत्प्रयत्नाभावस्य कारणत्वेन तद्रूपकारणस्यापादकस्य बलादुक्तापत्तिसम्भवात् ,तत्तच्छरीरत्वेन तत्तत्प्रवृत्त्यादिहेतुत्वाभ्युपगमोऽपि नैयायिकस्य गौरवपराहत एव, कायव्यूहस्थलेऽपि योगजादृष्टापगृहीतत्वसम्बन्धेन तदात्मवत्त्वस्य सर्वशरीरानुगतत्वादेव सर्वशरीरावच्छेदेन योगिनः कर्मभोगोपपत्तिः; अपि च यथा कथञ्चिद् भूतावेशन्यायेनेश्वरस्य प्रयोज्यवृद्धादिशरीरपरिग्रहे जगदप्यावेशेनैव प्रवर्तयेदिति व्यर्थमस्य वेदादिप्रणयनम् ; कर्मवदीश्वरस्यापि दृष्टेष्टानतिलङ्घनेनैव प्रवर्तकत्वान्नानुपपत्तिरिति चेत् ? तर्हि परप्रवृत्तये वाक्यमुपदिशन्नीश्वरः स्वेष्टसाधनताज्ञानादिकमपि प्रवृत्तिकारणं कथमतिपतेत् , कथं वा चेष्टात्वावच्छिन्ने विलक्षणयत्नत्वेन हेतुत्वाद् विलक्षणयत्नत्वावच्छिन्नस्य विजातीयमनःसंयोगादिजन्यत्वात् तादृशप्रयत्नं विना ब्रह्मादिशरीरचेष्टा; विलक्षणचेष्टायां विलक्षणप्रयत्नस्य हेतुत्वादत्रेश्वरीययत्न एव हेतुरिति चेत् ?, तर्हीश्वरयत्नस्य सर्वत्राविशिष्टत्वात् सर्वत्रापीश्वरचेष्टापत्तिः, विलक्षणचेष्टावच्छिन्नविशेष्यतयेश्वरप्रयत्नस्य हेतुत्वान्नातिप्रसङ्ग इति चेत् ?, तर्हि चेष्टावैलक्षण्यसिद्धौ तथाहेतुत्वं, तथाहेतुत्वे च तद्वैलक्षण्यमिति परस्पराश्रयः, किञ्च शरीराद्यन्तरं स्वाधिष्ठातरि भोगजनकमेव भवति, ईश्वरेण तु स्वाधिष्ठातरि भोगाजनकमेव शरीरादिकं सम्पादयतीत्येतद् दृष्टविरुद्धं तस्यैश्वर्यमात्रमेव, इति दृष्टविरोधेनैव जगत्प्रवृत्तिरायाता । एतेनैतत् प्रतिक्षिप्तम्—

"हेत्वभावे फलाभावात्, प्रमाणेऽसति न प्रमा ।
तदभावात् प्रवृत्तिर्नो, कर्मवादेऽप्ययं विधिः" ॥ १ ॥ इति,

इयं च कारिका कुसुमाञ्जलावुदयनाचार्यस्य, तत्सन्दर्भश्चायम्–"अस्त्वर्थापत्तिस्तर्हि बाधिका, तथाहि–यद्यभविष्यन्नोपादेक्ष्यत्, न ह्यसावनुपदिश्य प्रवर्तयितुं न जानाति, अत उपदेश एवान्यथानुपपद्यमानस्तथाविधस्याभावमौदासीन्यं वाऽऽवेदयति, न–अन्यथैवोपपत्तेः ।

"हेत्वभावे फलाभावात्, प्रमाणेऽसति न प्रमा ।
तदभावात् प्रवृत्तिर्नो, कर्मवादेऽप्ययं विधिः" ॥ १ ॥

बुद्धिपूर्वा हि प्रवृत्तिर्न बुद्धिमनुत्पाद्य शक्यसम्पादना, न च प्रकृते बुद्धिरप्युपदेशमन्तरेण शक्यसिद्धिः, तस्यैव तत्कारणत्वात्, भूतावेशन्यायेन प्रवर्तयेदिति चेत् ? प्रवर्तयेदेव यदि तदा फलसिद्धिः स्यात्, न त्वेवं, कुत एतदवसितम् ?, उपदेशान्यथानुपपत्त्यैव, यस्यापि मते अदृष्टवशादेव भूतानां प्रवृत्तिस्तस्यापि

तुल्यमेतत्, यद्यस्ति प्रवृत्तिनिमित्तमदृष्टं किमुपदेशेन ?, तत एव प्रवृत्तिसिद्धेः, न चेत् ? तथापि किमुपदेशेन ?, तदभावे तस्मिन् सत्यप्यप्रवृत्तेः, नित्यः स्वतन्त्र उपदेशो न पर्यनुयोज्य इति चेत् ? यूयं पर्यनुयोज्याः–ये तमवधानतो धारयन्ति विचारयन्ति चेति, एतत्प्रबन्धेनैतदेवावधारितं नैयायिकप्रवरेण–यदुत यस्य यावन्ति कारणानि दृष्टादृष्टस्वरूपाणि तावत्कारणसहकारेणैवेश्वरोऽपि कार्यं कर्तुं प्रभुर्न भूतावेशन्यायेन अन्यथा कार्यमात्रमेव भूतावेशन्यायेन कुर्यादिति उपदेशादिकमनर्थकमापद्येतेति सर्गादौ भूतावेशन्यायेन कारणसम्पादनं युक्तिशून्यमाग्रहविजृम्भितमेवेति, कर्मणः कर्त्रादिसापेक्षत्वेनैव जगद्धेतुत्वात्; समर्थितं च—

"धर्मा-ऽधर्मौ विना नाङ्गं, विनाऽङ्गेन मुखं कुतः ? ।
मुखाद् विना न वक्तृत्वं, तच्छास्तारः परे कथम् ? ॥ १ ॥" [ ] इति,

शरीरस्य स्वोपात्तनामकर्महेतुकत्वान्नामकर्मवैचित्र्येण शरीरवैचित्र्यात्, अन्यथाऽङ्गोपाङ्गवर्णादिप्रतिनियमो न स्यात्, तस्मात्, मायाविवत् समयग्राहकत्वादिकं पराभिमतेश्वरस्य विद्याधरविशेषस्य मायावितामेव प्रकटयति, यथा च पित्रादिः पुत्रादिकं समयादिकं ग्राहयति तथा युगादीशो युगादौ जगदेव शिक्षया समयं ग्राहयति घटादिसम्प्रदायं च प्रवर्तयति, तीर्थकृतां परोपकारित्वं स्वभावादेव, युगादीशगतसमयग्राहकत्व-घटादिसम्प्रदायप्रवर्तकत्वाश्रयणेनैव "कुलालेभ्यो नमः" इत्याद्या श्रुतिः सङ्गतिमङ्गतीति ॥

प्रत्ययादिना तु वेदप्रामाण्यवादिनामाप्ततत्तद्वक्तृसिद्धावपि नेश्वरसिद्धिः, इति न प्रत्ययादिना तत्साधनं सुसङ्गतम्, एतेन—

"उद्देश एव तात्पर्यं, व्याख्याविश्वदृशः सती ।
ईश्वरादिपदं सार्थं, लोकवृत्तानुसारतः ॥ १ ॥" [ ]

इत्यादिना कार्यादिपदानां तात्पर्याद्यर्थान्तरपरत्वमाश्रित्य तत ईश्वरसाधनमपि प्रयासमात्रम्, जन्यतत्प्रमासाम्ये तत्प्रमात्वेन गुणतया हेतुत्वात्, आद्यप्रमाजनकप्रमाश्रयतयेश्वरसिद्धिरिति तु न समीचीनम्, घटत्वादिमद्वृत्तिविशेष्यतासम्बन्धेन प्रमायां घटत्वादिमद्वृत्तिविशेष्यतासम्बन्धेन घटत्वादिविषयकत्वेन घटत्वादिविषयकं कारणं, घटत्वादिविषयकं च यथा ज्ञानं तथा संस्कारोऽपि सर्गाद्यकालीनास्मदाद्याद्यप्रमात्मकज्ञानात् पूर्वक्षणेऽस्मदादेर्घटत्वादिविषयकज्ञानस्य सत्त्वेऽपि पूर्वपरामर्शीयघटत्वादिविषयकप्रमात्मकानुभवप्रभवस्य घटत्वादिविषयकसंस्कारस्य घट-

त्वादिमद्वृत्तिविशेष्यतासम्बन्धेन घटत्वादिमति घटादौ सत्त्वात् ततो घटत्वादिप्रकारकप्रमात्मकसर्गाद्यकालीनज्ञानस्य घटत्वादिमद्वृत्तिविशेष्यतासम्बन्धेन तत्रोत्पत्तिः सम्भवत्येवेति न तदर्थमीश्वरप्रमात्मकज्ञानमभ्युपेयं, विषयनिष्ठप्रत्यासत्त्या कार्यकारणभावेऽपि चैत्रीयप्रमात्मकगुणान्मैत्रीयप्रमोत्पत्त्यापत्तिवारणाय तत्तत्पुरुषीयप्रमां प्रति तत्तत्पुरुषीयप्रमात्मकगुणस्य कारणत्वस्य स्वीकरणीयतया आद्यास्मदादिप्रमाया ईश्वरीयप्रमात्मकगुणादुत्पत्तिर्न सम्भवतीति, किञ्च ज्ञानमात्रं साक्षात् परम्परया वा प्रत्यक्षपूर्वकमेव भवतीति, सर्गाद्यकालेऽस्मदाद्याद्यप्रमात्मकं ज्ञानं प्रत्यक्षात्मकमेव सर्गाद्यभ्युपगन्तुर्नैयायिकस्य मते वाच्यं, प्रमात्मकप्रत्यक्षे च विशेषणवद् विशेष्येण सममिन्द्रियसन्निकर्ष एव गुणविधया कारणं, तथा च घटत्वादिप्रकारकप्रत्यक्षात्मकप्रमायां घटत्वादिमता सममिन्द्रियसन्निकर्ष एव गुणविधया कारणम्, घटत्वादिप्रमामात्रं प्रति वा समवायसबन्धेन घटत्वादिमत्त्वेन कारणमिति नातोऽपीश्वरप्रमाया अपेक्षेति न तदाश्रयतयेश्वरसिद्धिः; आर्हतमते तु प्रमां प्रति गुणविधया सम्यग्दर्शनस्यैव हेतुत्वमिति ॥

संख्याविशेषादपि नेश्वरसिद्धिः, लौकिकसन्निकर्षजन्यालौकिकापेक्षाबुद्धेरेव सङ्ख्याहेतुत्वात्; नित्यतयाऽभ्युपगतस्येश्वरज्ञानस्य लौकिकसन्निकर्षाजन्यत्वेन लौकिकापेक्षाबुद्धित्वाभावेन सङ्ख्यां प्रत्यसाधारणकारणत्वाभावात्, नैयायिकेन सङ्ख्याकारणतयाऽभ्युपगताया अपेक्षाबुद्धेरार्हतेन सङ्ख्याव्यवहारनिमित्ततयोपगतत्वेनापेक्षाबुद्धिजन्यातिरिक्तसङ्ख्याऽसिद्धेः; न चापेक्षाबुद्धिजन्यपरमाणुगतद्वित्वद्व्यणुकगतत्रित्वसङ्ख्याया अनभ्युपगमे द्व्यणुकाणुपरिमाणद्व्यणुकमहत्त्वपरिमाणानुत्पत्तिः स्यात्, परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमेन द्व्यणुकपरिमाणस्य परमाणुपरिमाणसमानजातीयत्वेऽप्युत्कृष्टत्वाभावेन त्र्यणुकपरिमाणस्य द्व्यणुकपरिमाणोत्कृष्टत्वेऽपि समानजातीयत्वाभावाभ्यां ताभ्यां तयोरुत्पत्त्यसंभवादिति वाच्यं, द्व्यणुक-त्र्यणुकपरिमाणयोर्द्रव्यपरिमाणविशेषरूपयोः संघातभेदादिकृतत्वेन सङ्ख्याजन्यत्वाभावात्, द्विकपालघटात् त्रिकपालघटपरिमाणोत्कर्षस्य दलोत्कर्षादेवोपपत्तेः, तस्मात्–

"कार्या-ऽऽयोजन-धृत्यादेः, पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् सङ्ख्याविशेषाच्च, साध्यो विश्वविदव्ययः" ॥ १ ॥ [ ]

इति पद्यप्रतिपादितेश्वरसाधनाशेषप्रकाराणामपाकृतत्वात् प्रकारान्तराणां तत्साध-

कानां च नेश्वरः परपरिकल्पितः सिद्धिकोटिमध्यास्ते, परदिशा तस्य क्षित्याद्युपादानमात्रज्ञानसिद्धावप्यतिरिक्तज्ञानासिद्धेः कारणाभावात् मानाभावाच्चेति दिक् ॥

"नैयायिको जैनमताश्रयेण, मनोरथश्चेश्वरकर्तृतायाः।
संप्राप्य मानं नयभेदकान्तं, सयुक्तिकं पूरयितुं समर्थः ॥ १ ॥
यथा पिताऽऽलस्यनिवृत्तये स्वान्, बालान् प्रकुर्वीत हितोपदेशान्।
तथा नयैः स्वस्वसमीहितेऽर्थे, प्रवर्तयत्येव जिनोऽपि मन्दान् ॥ २ ॥
इति प्रवृद्धाशय आप्तवर्यो, यशोऽभिधानो मिति-नीत्यभिज्ञः।
संतुष्टये नैगमनीतितर्कदक्षस्य पद्यद्वयमेतदाह ॥ ३ ॥
"संतुष्य नैयायिकमुख्य ! तस्मादस्माकमेवाश्रय पक्षमग्र्यम्।
तवोच्चकैरीश्वरकर्तृताया, मनोरथं सम्प्रति पूरयामः ॥ १ ॥
नयैः परानप्यनुकूलवृत्तौ, प्रवर्तयत्येव जिनो विनोदे।
उक्तानुवादेन पिता हितात् किं, बालस्य नालस्यमपाकरोति !" ॥ २ ॥
इति, ॥ ९ ॥ २०२ ॥

पातञ्जल-नैयायिकोपदर्शितदिशेश्वरकर्तृत्ववादो न घटत इत्युपपादितं, यथा च लोकप्रसिद्धोऽयं घटते तथा जैनसिद्धान्तावलम्बनेन दर्शयति—

**ततश्चेश्वरकर्तृत्ववादोऽयं युज्यते परम्।**
**सम्यग्न्यायाविरोधेन, यथाहुः शुद्धबुद्धयः ॥१०॥ २०३ ॥**

**ततश्चेति**–पातञ्जल-नैयायिकाभिमतेश्वरकर्तृत्वसाधकयुक्तिकदम्बकापाकरणाच्चेत्यर्थः, **अयं** पातञ्जल-नैयायिकोपदेशश्रद्धैकतानहृदययुक्तायुक्तविवेकशून्यलोकप्रसिद्धः, **ईश्वरकर्तृत्ववादः** ईश्वरो जगतः कर्तेति वादः, **परं** परोपदर्शितप्रकारातिरिक्तप्रकारेण, **सम्यग्न्यायाविरोधेन** विरोधिततर्काप्रधृष्यतर्कानुगमनेन, **युज्यते** घटते, कथं **यथा** येन प्रकारेण, **शुद्धबुद्धयः** जैनराद्धान्तावदातमतयः परमर्षयः, **आहुः** कथयन्ति ॥ १० ॥ २०३ ॥

परमर्षिवचनमेवानुवदति—

**ईश्वरः परमात्मैव, तदुक्तव्रतसेवनात्।**
**यतो मुक्तिस्ततस्तस्याः, कर्ता स्याद् गुणभावतः ॥ ११ ॥ २०४ ॥**

ईश्वर इति । **परमात्मैव** यः कश्चित् सर्वज्ञः स एव ईश्वर इत्यामनन्ति श्रीमन्तो हरिभद्रसूरयः, उपाध्यायास्तु–कायादेर्बहिरात्मनो ध्यातुर्भिन्नत्वेन ज्ञेयादन्तरात्मनश्च तदधिष्ठायकस्य ध्यातुर्ध्येयैकस्वभावत्वेन भिन्नोऽनन्तज्ञान-दर्शनसम्पदुपेतो वीतराग एवेश्वर इत्युशन्ति, तैरेव अन्येषां सूरीणां बाह्यात्म-परमात्माऽन्तरात्मनां त्रिभजनमित्थं प्रकटितम्-"अन्ये तु मिथ्यादर्शनादिभावपरिणतो बाह्यात्मा, सम्यग्दर्शनादिपरिणतस्त्वन्तरात्मा, केवलज्ञानादिपरिणतस्तु परमात्मा, तत्र व्यक्त्या बाह्यात्मा–शक्त्या परमात्मा, अन्तरात्मा च, व्यक्त्याऽन्तरात्मा तु–शक्त्या परमात्मा, भूतपूर्वनयेन च बाह्यात्मा, व्यक्त्या परमात्मा तु–भूतपूर्वनयेनैव बाह्यात्मा, अन्तरात्मा चेत्याहुः" इति, एतन्मते एकस्यैवात्मन एकदैवापेक्षाभेदेन बाह्यात्मत्वं परमात्मत्वमन्तरात्मत्वं च विभिन्नकालीनपरस्परविभिन्नपरिणतिस्वरूपात्मगतमपीति बोध्यम् । **तदुक्तव्रतसेवनात्** निरुक्तपरमात्मस्वरूपेश्वरप्रणीतागमजन्यकर्तव्यत्वप्रकारकज्ञाननिरूपितविशेष्यतात्वं च महाव्रतात्मकसंयमाचरणात्, **यतः** यस्मात् कारणात्, **मुक्तिः** ज्ञानावरणाद्यष्टविधकर्मक्षयलक्षणा, भवतीति शेषः, **ततः** तस्मात् कारणात्, **तस्याः** कर्मक्षयलक्षणाया मुक्तेः, **गुणभावतः** उपचारतः, उपचारनिमित्तं च फलदोपासकत्वम्; यद्यपि यथा राज्ञोऽप्रसादनियतः प्रसादः, तथा नेश्वरस्य, तस्य प्रसादा-ऽप्रसादयोरुभयोरप्यभावात्, तथापि चिन्तामणिर्यथा न प्रसन्नो नाप्यप्रसन्नोऽचेतनत्वात् तथापि स्वसन्निहितपुरुषाय चिन्तानुरूपं फलं प्रयच्छति स्वस्वाभाव्यात्, तथोदासीनस्यापीश्वरस्य स्वस्वाभाव्यादेवोपासना स्वकर्त्रे फलं ददातीति भवति फलदोपासकत्वमीश्वरस्य, **कर्ता स्यात्** कर्ता भवेत्, वस्तुस्वभावबलात् फलदोपासनाकत्वादेव भगवन्तमुद्दिश्यारोग्यादिप्रार्थना सुसङ्गता, हे भगवन्! त्वं मह्यमारोग्यादिकं देहीत्यादिवाक्यस्वरूपप्रार्थनायां सार्थकत्वानर्थकत्वचिन्तायां भाज्यमेतत्, चतुर्थभाषारूपत्वादित्यर्थकं 'भगवन्तमुद्दिश्यारोग्यादिप्रार्थना सार्थकानर्थकचिन्तायां तु भाज्यमेतत्, चतुर्थभाषारूपत्वादिति वचनं ग्रन्थकृतैव ललितविस्तरायामुक्तम्, प्रसादाप्रसादान्यतररहितत्वादप्रार्थनीयेऽकर्तरि भवति प्रार्थनाया विधिपालनबलेन शुभाध्यवसायमात्रफलत्वादित्यभिप्रायं हारिभद्रवचसो वर्णयन्त्युपाध्यायाः, ॥ ११ ॥ २०४ ॥

उक्तरीत्येश्वरस्य मुक्तिकर्तृत्वसिद्धावपि भवकर्तृत्वं न सिद्धमित्याशङ्काशङ्कुसमुद्धरणायाह—

**तदनासेवनादेव, यत् संसारोऽपि तत्त्वतः ।**
**तेन तस्यापि कर्तृत्वं, कल्प्यमानं न दुष्यति ॥ १२ ॥ २०५ ॥**

**तदनासेवनादेवेति**–परमात्मस्वरूपेश्वरप्रणीतागमविहितव्रतानाचरणादेवेत्यर्थः, **यत्** यस्मात् कारणात्, **तत्त्वतः** परमार्थतः, **संसारोऽपि** नरामरादिचतुर्विधगतिगमनलक्षणसंसरणमपि, जीवस्य भवतीति शेषः, अविरतिमूलकस्य संसारस्य हिंसाविरमणादिपञ्चमहाव्रतानाराधके जीवे भावः स्यादेवेत्याशयः, **तेन** तदुक्तव्रतापालनेन कारणेन, **तस्यापि** संसारस्यापि, अपिना मुक्तेराम्रेडनम्, **कर्तृत्वं** वास्तविकं कर्तृत्वमीश्वरे नास्तीत्यतः **कल्प्यमानमिति**–स्वहेतुक्रियाविरुद्धविधिबोधितोपासनाकत्वपरेण कर्तृत्वपदेन बोध्यमानमित्यर्थः, स्वं–संसारः, तद्धेतुः क्रिया–हिंसाकरणादिरूपहिंसाद्यविरतिलक्षणा, तद्विरुद्धो यो विधिबोधितः स हिंसाविरत्यादिः तत्परिपालनमेवोपासनं यस्येश्वरस्य स स्वहेतुक्रियाविरुद्धविधिबोधितोपासनाकस्तद्भावस्तत्त्वं तत्परेण–तत्तात्पर्यकेण कर्तृत्वपदेन बोध्यमानं जगतः कर्तृत्वं संसारकारणक्रियाविरुद्धविधिबोधितोपासनाकत्वलक्षणमीश्वरस्य **न दुष्यति** दोषाऽऽघ्रातं न भवति, यथा "अङ्गुल्यग्रे करिशतम्" इति वाक्यमङ्गुल्यग्रवृत्तिकरिशतरूपयथाश्रुतार्थमादायानुपपन्नमप्यङ्गुल्यग्रोपलक्ष्यमाणदेशविशेषपराङ्गुल्यग्रशब्दबोध्यमानदेशविशेषवृत्तिकरिशतरूपोपचरितार्थघटितार्थमादाय व्यवहारवीथिमवतरति तथेश्वरस्य संसारकर्तृत्वव्यवहारोऽपि कर्तृत्वपदस्य स्वहेतुक्रियाविरुद्धविधिबोधितोपासनाकत्वरूपार्थे उपचारेणोपपद्यत इत्याशयः ॥ १२ ॥ २०५ ॥

उपचारसमाश्रयणेन निरुक्तकर्तृत्वकल्पनायां गुणमुपदर्शयति—

**कर्ताऽयमिति तद्वाक्ये, यतः केषाञ्चिदादरः ।**
**अतस्तदानुगुण्येन, तस्य कर्तृत्वदेशना ॥ १३ ॥ २०६ ॥**

**कर्ताऽयमितीति**–ईश्वरः संसारस्य कर्तेत्यवबोधककर्ताऽयमित्येवंस्वरूप इत्यर्थः, **तद्वाक्ये** परमात्मतीर्थङ्करेश्वरोच्चरितसिद्धान्ते, 'अयं कर्ता' इति प्रसिद्धलौकिकवाक्ये वा, **यतः** यस्मात् कारणात्, **केषाञ्चित्** तथाविधभद्रकविनेयानाम्, **आदरः** स्वरसवाहिश्रद्धानलक्षणः, भवतीति शेषः, **अतः** अस्मात् कार-

णात्, **तदानुगुण्येन** भद्रपरिणामविनेयगतेश्वरकर्तृत्वविषयकस्वरसवाहिश्रद्धा वर्द्धतामेव न तु हीयतामित्याशयतस्तथाविधविनेयश्रद्धाऽभिवृद्धये, **तस्य** परमात्मस्वरूपेश्वरस्य, **कर्तृत्वदेशना** ईश्वरः कर्तेत्युपदेशः, युज्यत इति शेषः, श्रोतृशिष्यादीन् प्रति गुरूणामुपदेशो हि तद्भावाभिवृद्धये भवति, यादृशं वस्तु न वास्तविकं तथाविधमुत्प्रेक्ष्याप्युदाहरणीकृत्य तद्बलात् सा निर्वाह्यते, किं पुनरुपचारेणेत्याशयः ॥ १३ ॥ २०६ ॥

परमात्मन ईश्वरत्वमुपादायोपचारेण कर्तृत्ववादः समर्थितः, यदा च जीवोऽपीश्वरपदबोध्यस्तदा तस्य साक्षादेव कर्तृत्वमिति नोपचाराश्रयणावश्यकतेत्याह—

**परमैश्वर्ययुक्तत्वान्मत आत्मैव वेश्वरः ।**
**स च कर्तेति निर्दोषः, कर्तृवादो व्यवस्थितः ॥ १४ ॥ २०७ ॥**

**परमैश्वर्ययुक्तत्वादिति**–यथा घनावृतस्यापि रवेः प्रकाशस्वभावत्वं व्यवस्थितमेव न त्वपगच्छति तथा कर्मावृतस्याप्यात्मनः शुद्धबुद्धैकस्वभावत्वमवस्थितमेवेति निश्चयनयगोचरीकृतशुद्धबुद्धस्वभावत्वेनोत्कृष्टकेवलज्ञानाद्यतिशयशालित्वादित्यर्थः, **वा** अथवा, **आत्मैव** जीव एव, एवकारेण परमात्मनः प्रकृते व्यवच्छेदः, **ईश्वरः** ईश्वरपदेन संकेतितः, **मतः** इष्टः, **स च** जीवश्च, **कर्ता** साक्षात्कर्ता, आर्हतमतेऽपि, **इति** एतस्मात् कारणात्, **निर्दोषः** उपचाराश्रयणदोषेणापि न कलङ्कितः, **कर्तृवादः** ईश्वरः कर्तेत्युपदेशः, **व्यवस्थितः** विशेषेण–प्रमाणविषयत्वेन, अवस्थितः–सिद्धिशिखरमारूढः, जीवस्योक्तदिशेश्वरत्वमाश्रित्यापि ईश्वरपरपरागमवचसां सङ्गमनमित्थमुपपादयन्त्युपाध्यायाः–अत एव "विश्वतश्चक्षुरुत विश्वतोमुखः" इत्यादिका श्रुतिरुपपद्यते, जीवस्य निश्चयतः सर्वज्ञत्वात्, अन्यथा रागाद्यावरणविलये तदाविर्भावानुपपत्तेः–

"उत्तमः पुरुषस्त्वन्यः, परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य, बिभर्त्यव्यय ईश्वरः" ॥ १ ॥

इत्यादिकमप्युपपद्यते, आवृतस्वरूपादनावृतस्वरूपस्य भिन्नत्वात्, चैतन्यात्मकमहासामान्येन लोकत्रयावेशात्, ग्राह्याकारक्रोडीकृतत्वेन तद्भरणाच्च, इत्यादिरीत्या यथागमं पराभिप्राय उपपादनीयः" इति ॥ १४ ॥ २०७ ॥

उक्तदिशा सर्वत्र लोकायतादिव्यतिरिक्तानां शास्त्रकाराणामभिप्रायो मृग्य इति तत्स्तुतिमाह–

**शास्त्रकारा महात्मानः, प्रायो वीतस्पृहा भवे ।**
**सत्त्वार्थसंप्रवृत्ताश्च, कथं तेऽयुक्तभाषिणः ॥ १५ ॥ २०८ ॥**

**शास्त्रकारा** इति–तत्तद्दर्शनप्रणेतार इत्यर्थः, **महात्मानः** धर्माभिमुखाः, परलोकाभीरूणां लोकायतादीनां धर्माभिमुखत्वाभावान्न महात्मत्वमतः **प्राय** इति–अल्पीयसामल्पमेधसां केषाञ्चिदेव लोकायतप्रभृतीनां न महात्मत्वं तद्व्यतिरिक्तानां शास्त्रकाराणां महात्मत्वमस्त्येवेति, धर्मलक्षणहितसाधनोपदर्शकवचन-सन्दर्भो हि शास्त्रमुच्यते, तत्प्रणेतार एव शास्त्रकारा भवन्ति, न च लोकायत-प्रभृतयो धर्मोपदेशका इति वस्तुतस्ते शास्त्रकारा एव न भवन्तीति तु न वाच्यं, तथा सति एकान्तवादिनामन्येषामपि न तथाविधशास्त्रकारत्वमिति तेषामपि शास्त्राकारा इत्यनेनाग्रहणप्रसङ्गात्, **भवे** संसारे, **वीतस्पृहाः** लोकमानख्याति–धनलिप्सादिरहिताः, **सत्त्वार्थसंप्रवृत्ताश्च** सत्त्वानां-प्राणिनां ,अर्थाय–इष्ट-साधनसम्पत्तये, सं–सम्यक्, स्वस्वबोधानुसारेण, प्रवृत्ताश्च परोपकारनिरताश्चेति यावत्, शास्त्रकाराणां धर्माभिमुखत्व-लोकमान-ख्याति-धनलिप्सादिरहितत्व-स्वस्व-बोधानुसारिपरोपकारप्रवृत्तत्वानामभावे परहितबोधानुकूलशास्त्रप्रणयनप्रवृत्त्यसम्भ-वात्, ततः **कथं** कस्मात्, **ते** निरुक्तगुणविशिष्टाः शास्त्रकाराः, **अयुक्तभाषिणः** इदं श्रोतॄणां हितसाधनमिदमहितसाधनमिति ज्ञात्वाऽपि विरुद्धभाषिणः, प्रसि-द्धश्च जला-ऽनलयोरिव परोपकारित्व-विरुद्धभाषित्वयोर्विरोधः ॥ १५ ॥ २०८ ॥

यतश्च शास्त्रकाराणां नायुक्तभाषित्वं ततस्तेषां वचनेऽवापातप्रतीयमानविरोधा-नुत्पत्तये सम्यगभिप्रायोऽन्वेषणीयो हितैषिणेत्याह—

**अभिप्रायस्ततस्तेषां, सम्यग् मृग्यो हितैषिणा ।**
**न्यायाशास्त्राविरोधेन, यथाह मनुरप्यदः ॥ १६ ॥ २०९ ॥**

**अभिप्राय** इति–वचनतात्पर्यमित्यर्थः, **ततः** अयुक्तभाषित्वाभावात्, **तेषां** परोपकारप्रवृत्तशास्त्रकाराणाम्, **सम्यक्** चित्तैकाग्रीकरणपूर्वकव्यासङ्गादिपरिहारेण, **मृग्यः** अन्वेषणीयः, **हितैषिणा** परमहितमोक्षाभिलाषिणा, **न्यायशास्त्राविरोधेन** न्यायस्य सत्तर्कस्य शास्त्रस्यागमस्य च यथा विरोधः–बाधो न भवेत् तथा,

न तु युक्त्यागमबाधितयथाश्रुतार्थग्रहणमात्रेण तत्रैव मनो निवेशनीयम्, तथा सति "ग्रावाणः प्लवन्ते" "यजमानः प्रस्तरः" इत्यादिश्रुतिश्रवणेन शिलागमन-यजमान-प्रस्तरत्वादिकमवलोकनीयं स्यात्, अत्रार्थे परास्य मनोः सम्मतिमाह-यथेति, **मनुरपि** अपिना अस्मदागमयुक्त्यविरोधिप्रकारेण मोक्षमार्गलक्षणधर्मादिप्रतिपादकजैनागमार्थानुसन्धानकर्तैव धर्मवेत्तेत्युपदेष्टुर्जैनाचार्यस्य परिग्रहः, **अदः** अनन्तरमेवाभिधीयमानम्, **आह** कथयति ॥ १६ ॥ २०९ ॥

मनुवचनमेवोल्लिखति—

**आर्षं च धर्मशास्त्रं च, वेदशास्त्राविरोधिना ।**
**यस्तर्केणानुसंधत्ते, स धर्मं वेद नेतरः ॥ १७ ॥ २१० ॥**

आर्षं चेति-वेदादिकं चेत्यर्थः, **धर्मशास्त्रं च** पुराणादि च धर्मशास्त्रं चेत्यस्य स्थाने धर्मोपदेशं चेत्यपि क्वचित् पाठः, तस्य 'धर्मजनक उपदेशो धर्मोपदेशः, धर्मस्येश्वरस्य वोपदेशो धर्मोपदेशस्तम्' इत्येवं व्याख्यानमन्ये कुर्वन्तीत्युपाध्यायाः, **वेदशास्त्राविरोधिना** परस्परं वेदशास्त्रोभयाविरोधिना, **तर्केण** ऊहेन, **यः** अनिर्दिष्टनामा प्रमाता, **अनुसंधत्ते** तदुक्तानुसन्धानं करोति, **स** प्रमाता, **धर्मं** धर्मस्वरूपं, **वेद** जानाति, यथावदवबुध्यते इति यावत्, **नेतरः** परस्परवेदशास्त्रोभयाविरोधितर्करहितो न जानाति, तथा च ईश्वरकर्तृत्वप्रतिपादकपरागमस्य न्यायशास्त्राविरोधितर्केण "ईश्वरः परमात्मैव" इत्यादिना "मुक्तिकर्तृत्वं तदनासेवनादेव" इत्यादिना संसारकर्तृत्वं परमात्मलक्षणेश्वरस्य, परमैश्वर्ययुक्तत्वादित्यादिना जीवस्यैवेश्वरस्य कर्तृत्वमित्याशयस्य सम्यग्दृष्टिपरिभावितस्य युक्तत्वं, सम्यग्दृष्टिपरिगृहीतत्वेनैव तदागमस्य प्रामाण्यं समर्थनीयम्, ईदृशं च ग्रन्थकारस्य द्रव्यासत्याभिधानं महेशकर्तृत्वाभिधायकवेदप्रामाण्याभ्युपगन्तृश्रोतृपरिबोधार्थमेवमग्रेऽपीत्युपदिशन्ति श्रीमन्तो यशोविजयोपाध्यायाः, इत्थमीश्वरकर्तृत्ववादरहस्यावेदनप्रवणसम्यग्दृष्ट्युद्गीर्यमाणसत्तर्ककलितविचारो वामाशयानामेव न विस्मितं जनयति, स्याद्वादिनां पुनर्देवाधिदेवो जिन एव शरणं, तदुक्तिपरिपालनान्मुक्तिरवश्यंभाविनी यतः, यत्सुखाम्भोधिकणिका एव देवानां सम्पद इत्येतत्प्रतिपादकं पद्यमिदमुपाध्यायस्य—

"इत्येवं पटुरीश्वरव्यतिकरः सत्तर्कसम्पर्कभाग्,
येषां विस्मितमातनोति न मनस्ते नाम वामाशयाः।
अस्माकं तु स एक एव शरणं देवाधिदेवः सुखा-
म्भोधौ यस्य भवन्ति बिन्दव इव स्वःसद्मनां सम्पदः" ॥ १ ॥
॥ १७ ॥ २१० ॥

वार्तान्तरमुपदर्शयति—

**प्रधानोद्भवमन्ये तु, मन्यन्ते सर्वमेव हि।**
**महदादिक्रमेणेह, कार्यजातं विपश्चितः ॥ १८ ॥ २११ ॥**

**प्रधानोद्भवमिति।** अन्ये तु **विपश्चितो मन्यन्ते** ईश्वरकर्तृत्वाभ्युपगन्तृव्यतिरिक्ताः साङ्ख्या अभ्युपगच्छन्ति, **इह** कार्यकारणविचारे, **हि** निश्चितम्, **सर्वमेव कार्यजातं** निखिलमेव—जन्यम्, **महदादिक्रमेण** महतोऽहङ्कारः, तस्मात् षोडशको गणः, षोडशकात् पञ्चतन्मात्रेभ्यः पञ्च भूतानीत्येवं क्रमेण, **प्रधानोद्भवं** सत्त्वरजस्तमस्साम्यावस्थालक्षणप्रकृतिसमुत्थम्। तथाहि—

"पञ्चविंशतितत्त्वज्ञो, यत्र कुत्राश्रमे रतः।
शिखी मुण्डी जटी वापि, मुच्यते नात्र संशयः" ॥

इति वचनात् साङ्ख्यानां मते पञ्चविंशतितत्त्वज्ञानान्मुक्तिरिति पञ्चविंशतिस्तत्त्वानीत्यवधार्यते, तत्र आत्मा न कस्यापि कारणमिति अकारणम्, न कस्यापि कार्यमिति अकार्यम्, अप्रच्युतानुत्पन्नस्थिरैकरूपत्वाच्चैतन्यात्मकत्वाच्च कूटस्थनित्यचैतन्यरूपश्च, प्रधत्ते प्रधीयते वाऽधिकारा अस्मिन्निति प्रधानं सत्त्वादिसामान्यावस्थादिलक्षणं प्रकृतिरित्युच्यते, सा अचेतना महदाद्युत्पादकाशेषशक्तिप्रचिता, न तस्याः कारणमन्यत् किन्तु सा कारणमेवेति आदिकारणं, परिणमते महदादिरूपेणेति परिणामिनी च; तदभावे हि परिमितं महदादि व्यक्तं न भवेत्, तथोत्पादकहेत्वभावात्, न च स्याद् भेदानामन्वयः, अन्वयश्च महदादीनामशेषाणां सत्त्वरज-स्तमोगुणान्वितत्वम्, सत्त्वरजस्तमोमयकारणप्रभवत्वमन्तरेण सत्त्वरजस्तमोजातिमत्कार्यासम्भवात्, कारणविजातीयकार्यानुपलब्ध्या यज्जातीयं कारणं तज्जातिमत्कार्यमित्यवधृतेः; न च बुद्धिरेव कार्यधर्मानुविधायिनी, असाधारणत्वात्, अनित्यत्वाच्च न च महदादिहेतुशक्तिप्रवृत्तिः स्यात्, नहि पटादिजननी शक्तिस्तन्तुवायादिकमाधारं विना प्रवर्तते, तथा कारण-कार्यविभागोऽपि न स्यात्, प्रकृतेः

सद्भावे हि प्रकृतिः कारणं ततो महदादि कार्यमित्येवं कारणकार्यविभागो घटते, महदादौ कार्यत्वव्यवहारस्य सम्बन्धिसापेक्षत्वात्, न च स्यात् क्षीरावस्थायां क्षीरं दध्न इव प्रलये भूतादीनां तन्मात्रादिक्रमेण विवेकरूपो विभाग इति प्रकृतिसिद्धिः, तदुक्तमीश्वरकृष्णेन—

"भेदानां परिमाणात्, समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद् वैश्वरूपस्य ॥" [सांख्यकारिका–१५] इति,

न चोत्पत्तितः प्राग् असदेव महदादिकमुत्पद्यतां किं तत्समन्वयार्थं प्रकृत्यनुसरणेन? इति वाच्यम्, शशशृङ्गादेरिवोत्पत्तितः प्राक् तत्कल्पस्य महादादेरूपत्त्यसम्भवात्, तदुक्तं तेनैव—

"असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम् ॥" [सांख्यकारिका–९] इति,

असतः शशविषाणादेः सत्त्वस्य कर्तुमशक्यत्वात्, सत एव हि सत्कारणं, सत्करणस्वभावत्वात् सतः, दृश्यते च तिलेषु सत एव तैलस्य निष्पीडनेन करणम्, असतस्तु करणे न निदर्शनं किञ्चित्; ननूत्पत्तेः प्राक् कार्यस्यासत्त्वं नाम विद्यमानप्रागभावप्रतियोगित्वं, तच्च अत्यन्तासति शशशृङ्गादौ नास्ति, उत्पत्त्यनन्तरं विद्यमाने घटादौ विद्यमानत्वरूपसत्त्वमप्यस्ति, उत्पत्तितः प्राक् कपालादौ विद्यमानस्य प्रागभावस्य प्रतियोगित्वरूपमसत्त्वमप्यस्तीत्येवं निरुक्तसत्त्वासत्त्वयोर्न विरोध इति वाच्यम्, यथाहि सन्मात्रानुगामित्वाद् विद्यमानत्वमेव सत्त्वं तथाऽसन्मात्रानुगामित्वादविद्यमानत्वमेव लाघवादसत्त्वम्, असद्व्यवहारस्य तत एवासन्मात्रे भावात्, एवं च असदकारणान्नोत्पत्तेः प्राक्कार्यस्यासत्त्वं किन्तु उत्पत्तेः प्राक् सदेव कार्यम्; तथा उपादानग्रहणादपि सत्कार्यम्, शालिफलार्थी शालिबीजमेवोपादत्ते यवफलार्थी यवबीजमेवोपादत्ते इत्येवं प्रतिनियतोपादानस्य कार्यस्य सत्त्व एवोपपत्तेः, असत उत्पत्तौ तु शालिफलं यथा कोद्रवादिबीजेऽसत् तथा शालिबीजेऽपीति तदर्थं कोद्रवादिबीजस्याप्युपादानं स्यात्, फलायोगस्योभयत्राविशेषात्; "उपादानेन ग्रहणं सम्बन्धस्ततोऽसतः सम्बन्धाभावात्" इत्येवमुपादानग्रहणादित्यस्याभिप्रेतमन्ये वर्णयन्ति; तथा सर्वसम्भवाभावात् सत् कार्यम्, असतः करणेऽसत्त्वाविशेषे सर्वं सर्वस्माद् भवेत्, न च सर्वं सर्वस्मादुपजायते, तस्मात् कार्यं प्रागुत्पत्तेः कारणेन सह सम्बद्धमेव तद्व्यापारात् प्रादुर्भवतीति तदाहुः—

"असत्त्वान्नास्ति सम्बन्धः, कारणैः सत्त्वसङ्गिभिः ।
असम्बद्धेषु चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥ १ ॥" इति;

तथाऽसन्न शक्यमिति न तत्र किञ्चिच्छक्तमिति शक्तस्य शक्यकरणात् सत् कार्यम्, तथाहि–अशक्तस्य जनकत्वे कपालादेरिव तन्त्वादेरपि घटादिकार्यं प्रत्यशक्तत्वाविशेषात् कपालादेरिव तन्त्वादेरपि घटादेरुत्पत्तिः प्रसज्यत इति यत् कारणं यत्र शक्तं तत् कारणं तत् कार्यं करोतीत्येवं शक्तस्य जनकत्वं वाच्यम्, अतिप्रसङ्गपरिहाराय प्रतिनियतकार्यनिरूपिता प्रतिनियतकारणगतैव शक्तिरिति कथमसति कार्ये कारणस्य शक्तिर्नियता स्यात्?, असतो विषयत्वायोगात्, तस्मात् कारणात् प्रागपि शक्यं सदेव; तथा कारणभावात् कारणतादात्म्यादपि सत् कार्यम्, अवयवा-ऽवयविनोस्तादात्म्यमेव, अवयवेभ्यो भिन्नतयाऽवयविनः प्रतीत्यभावात्, कपालं घटीभूतम्, तन्तुः पटीभूतः, स्वर्णं कुण्डलीभूतमित्यादितत्तादात्म्यावगाहिप्रतीतेरेव भावात्, तस्माद् महदादिकार्यस्योत्पत्तेः प्रागपि यत्र सत्त्वं सा प्रकृतिः, ततो बुद्ध्यपरनामकं महत्तत्त्वमुत्पद्यते, न हि चैतन्यस्य स्वभावतो विषयावच्छिन्नत्वम्, अनिर्मोक्षापत्तेः, नापि प्रकृत्यधीनं विषयावच्छिन्नत्वं चैतन्यस्य, तस्या अपि नित्यतया तदधीनस्य विषयावच्छिन्नत्वस्य चैतन्ये सर्वदाऽभावेनानिर्मोक्षापत्तितादवस्थ्यात्, नापि प्रकृत्यादिकमस्वीकृत्य साक्षादेव घटादिश्चैतन्यावच्छिन्नः, तथा सति व्यापकचैतन्यावच्छेदस्य विषयमात्रे सर्वदैव भावे सर्वं दृष्टमेव स्यान्नादृष्टमिति दृष्टादृष्टतत्त्वानुपपत्तेः, न चेन्द्रियमात्रापेक्षो घटादिचैतन्यावच्छेदः, इन्द्रियविषयसम्बन्धेऽपि अन्यगतचित्तस्येन्द्रियसम्बद्धविषयकज्ञानाभावलक्षणस्य व्यासङ्गस्यानुपपत्तेः, अतो यत्सम्बद्धेन्द्रियस्य विषयचैतन्यावच्छेदनियामकत्वं, यद्व्यापाराच्च सुषुप्ताविन्द्रियादिव्यापारविरतावपि श्वास-प्रश्वासादि तन्महत्तत्त्वं बुद्धिरित्याख्यायते, तस्य धर्मा ज्ञानाऽज्ञानैश्वर्या-ऽनैश्वर्य-वैराग्या-ऽवैराग्य-धर्मा-ऽधर्मरूपा अष्टौ, बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्ना अपि महत्तत्त्वस्यैव धर्माः, अनुभवस्य स्मृतिपर्यन्तं यत्सूक्ष्मरूपतयाऽवस्थानं तस्यैव भावनात्वेनातिरिक्तायास्तस्यास्तैरनभ्युपगमात्, तस्य महत्तत्त्वस्य ज्ञानरूपपरिणामेन सम्बद्धो विषयः पुरुषस्य स्वरूपतिरोधायकः, एवं च बुद्धितत्त्वनाशादेव पुंसो विषयावच्छेदाभावान्मोक्षः, महत्तत्त्व-पुरुषयोर्भेदाग्रहाच्च 'चेतनोऽहं करोमि' इत्यध्यवसायः, अचेतनप्रकृतिकार्याया बुद्धेरचेतनायाश्चैतन्याभिमानान्यथानुपपत्त्यैव स्वाभाविकचैतन्यरूपस्य पुरुषस्य सिद्धेः । आलोचनं व्यापार इन्द्रियाणाम्, विकल्पस्तु मानसः, अभिमानोऽहङ्कारस्य, कृत्यध्यवसायो

बुद्धेः, सा हि बुद्धिरंशत्रयवती–पुरुषोपरागः, विषयोपरागः, व्यापारावेशश्चेत्यंशाः, भवति हि ममेदं कर्तव्यमिति बुद्धेरध्यवसायः, तत्र ममेति पुरुषोपरागो दर्पणस्येव मुखोपरागो भेदाग्रहादतात्त्विकः, इदमिति विषयोपराग इन्द्रियप्रणालिकया परिणतिभेदो दर्पणस्येव मुखनिश्वासहतस्य मलिनिमोपरागस्तात्त्विकः, तदुभयोपपत्तौ व्यापारावेशोऽपि, तत्र विषयोपरागलक्षणज्ञाने पुरुषोपरागस्यातात्त्विकसम्बन्धो दर्पणप्रतिबिम्बितस्येव मुखस्य तन्मलिनिम्ना, स एवोपलब्धिरित्युच्यते, ततो महत्त्वादहङ्कारोत्पत्तिः, भवति हि स्वप्नावस्थायां व्याघ्रोऽहं वराहोऽहमित्यभिमानः, न तु नरोऽहमित्यभिमानः, अस्ति च तत्र नरत्वं संनिहितमिन्द्रियमनःसम्बन्धश्च, अतो नियतविषयाभिमानव्यापारकाहङ्कारसिद्धिरित्येवं प्रकृति-बुद्ध्यहङ्काराणां सिद्धिः साङ्ख्याभिमता श्रीमद्भिर्यशोविजयोपाध्यायैरुपदर्शिता ।

उदयनाचार्यैरित्थमेवावेदिता, तथा च तद्ग्रन्थः—"एवं हि तद् अकारणमकार्यः कूटस्थचैतन्यस्वरूपः पुरुषः, आदिकारणं प्रकृतिरचेतना परिणामिनी, ततो महदादिसर्गः, न हि चितिरेव विषयबन्धनस्वभावा, अनिर्मोक्षप्रसङ्गात्, नापि प्रकृतिरेव तदीयस्वभावा, तथापि नित्यत्वेनानिर्मोक्षप्रसङ्गात्, नापि घटादिरेवाऽऽहत्य तदीयः, दृष्टादृष्टत्वादुपपत्तेः, नापीन्द्रियमात्रप्रणालिकया, व्यासङ्गायोगात्, नापीन्द्रियमनोद्वारा, स्वप्नदशायां व्याघ्र-वराहाद्यभिमानिनो नरस्यापि नरत्वेनात्मोपधानायोगात्, नाप्यहङ्कारपर्यन्तव्यापारेण, सुषुप्त्यवस्थायां तद्व्यापारविरमेऽपि श्वासप्रयत्नसन्तानावस्थानात्, तद् यदेतास्ववस्थासु सव्यापारमेकमनुवर्तते, यदाश्रया चानुभववासना, तदन्तःकरणमुपारूढोऽर्थः पुरुषस्योपधानीभवति, भेदाग्रहाच्च निष्क्रियेऽपि तस्मिन् पुरुषे कर्तृत्वाभिमानः, तस्मिन्नचेतनेऽपि चेतनाभिमानः, तत्रैव कर्मवासना, पुरुषस्तु पुष्करपलाशवन्निर्लेपः, आलोचनं व्यापार इन्द्रियाणाम्, विकल्पस्तु मनसः, अभिमानोऽहङ्कारस्य, कृत्यध्यवसायो बुद्धेः, सा हि बुद्धिरंशत्रयवती, पुरुषोपरागो विषयोपरागो व्यापारावेशश्चेत्यंशाः, भवति हि मयेदं कर्तव्यमिति, तत्र ममेति चेतनोपरागो दर्पणस्येव मुखोपरागो भेदाग्रहादतात्त्विकः, इदमिति विषयोपराग इन्द्रियप्रणालिकया परिणतिभेदो दर्पणस्येव निःश्वासाभिहतस्य मलिनिमा पारमार्थिकः, एतदुभयायत्तो व्यापारावेशोऽपि, तत्रैवंरूपव्यापारलक्षणाया बुद्धेर्विषयोपरागलक्षणं ज्ञानं, तेन सह यः पुरुषोपरागस्यातात्त्विकस्य सम्बन्धो दर्पणप्रतिबिम्बितस्य मुखस्येव मलिनिमा सोपलब्धिरिति, तदेवमष्टावपि

धर्मादयो भावा बुद्धेरेव, तत्सामानाधिकरण्येनाध्यवसीयमानत्वात्, न च बुद्धिरेव स्वभावतश्चेतनेति युक्तम्, परिणामित्वात्, पुरुषस्य तु कूटस्थनित्यत्वादिति" इति।

एतद्ग्रन्थव्याख्यानं वर्धमानोपाध्यायस्य साङ्ख्याभिमतस्पष्टप्रतिपत्त्यर्थमुपदर्श्यते-"शिष्यहितैषितया तन्मतं प्रपञ्चयति-एवं हीति-अकारणमित्यनेन प्रकृतेर्भेदः, अकार्य इत्यनेन चरमपरिणतिघटादेर्भेदः, ननु बुद्ध्याद्यकारणत्वे तस्य तत्र मानाभाव इत्यत आह-कूटस्थेति-अकारणत्वादेव कूटस्थोऽनित्यधर्मानाश्रयः, कार्यत्वाभावान्न स्वरूपतो नाशः, अकारणत्वाच्च कार्यकारणयोस्तादात्म्यात् तदात्मतयाऽपि न नाशः, अत एव अपूर्वं न तस्य गुणः, चैतन्यस्वरूपत्वमपि धर्मधर्मिणोस्तादात्म्यात् कूटस्थत्वेन चैतन्येन निरूप्यत इति न तत्र मानाभाव इत्यर्थः, बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनादिति भावः, आत्मनोऽकारणत्वेऽपि सर्गमुपपादयति-आदीति-आदिपदात् महदादिव्यवच्छेदः, तस्य प्रकृत्यनन्तरमुत्पादात कारणमिति पुरुषव्यवच्छेदः, पुरुषाद् भेदकमाह-अचेतनेति, तत्र हेतुमाह-परिणामिनीति-अनित्यधर्माश्रयः, ततः कार्यधर्मात्मतया नश्यति, ततो घटादिवदचेतनेत्यर्थः, तत इति प्रकृतेर्महत्तत्त्वमन्तःकरणं बुद्ध्याख्यम्, प्रकृतेर्महान्, महतोऽहङ्कारस्तस्मात् पञ्चमात्राणीति साङ्ख्याः, ननु किमर्थं महदादिसर्गो मन्तव्यो नित्यचैतन्यमेव विषयप्रकाशस्वरूपमस्त्वित्यत आह-न हीति, चितिः पुरुषचैतन्यम्, विषयबन्धनं विषयावच्छेदः, चैतन्यविषयावच्छेदस्येष्टानिष्टोपलब्धिरूपस्य हेतुसापेक्षत्वे हेतोरिन्द्रियादेरङ्गीकारापत्तिः, निरपेक्षत्वे सर्वदा तस्य भावादनिर्मोक्षः, पुंसः स्यादित्यर्थः, तर्हि प्रकृतिरेव साक्षाद्विषयबन्धनस्वभावाऽस्त्वित्यत आह-नापीति प्रकृतेः साक्षाद्विषयप्रकाशकस्वभावत्वे तस्याः सदातनत्वे पुनरप्यनिर्मोक्षः पुंसः स्यादित्यर्थः। ननु विषयस्यैव चैतन्यसम्बन्धित्वं स्वभावः, तथा च विषयनाशे पुंसो मोक्षः स्यादित्यत आह-नापीति, विषयस्य परम्परया चैतन्यसम्बन्धित्वे द्वारीभूतस्येन्द्रियादेरङ्गीकारापत्तिरिति साक्षात् तद्वाच्यम्, तथा चेदं दृष्टमिदमदृष्टमिति न स्यात्, व्यवहितस्यापि विषयस्य यावत्सत्त्वमवभासप्रसङ्गादित्यर्थः, नन्विन्द्रियमात्रद्वारा विषयस्तदीयः स्यात् किं मनःकल्पनयेत्यत आह-नापीति, व्यासङ्गेति-इन्द्रियसम्बन्धेऽपि व्यासङ्गेन दर्शनाभावादित्यर्थः, ननु व्यासङ्गानुरोधात्मनः संयुक्तेन्द्रियसम्बद्धविषयस्य चैतन्यावच्छेदकत्वमस्तु किमहङ्कारेणेत्यत आह-नापीति, यदीन्द्रियमनोभ्यामेव विषयाः सम्बध्यन्ते तदा शयानो नरो यथा वराहोऽहमिदं प्रत्येमीति अभिमन्यते तथा नरोऽहमिदं प्रत्येमीति नरत्वेनाप्यात्मोपधानं स्यात्,

अस्ति हि तत्र नरत्वं सन्निहितम्, अस्ति चेन्द्रियमनसोरपि व्यापारः, अन्यथा आलोचनविकल्पयोरनुत्पादप्रसङ्ग इति तद्भिन्नोऽहङ्कारो नियतविषयाभिमानव्यापारो मन्तव्य इत्यर्थः, बुद्धितत्त्वं साधयति-नापीति-पूर्वेषां व्यापाराभावेऽपि यद्व्यापारादुच्छ्वासादि तद्बुद्धितत्त्वं कल्प्यमित्यर्थः, उपसंहरति-तद्यदिति, अवस्थासु जाग्रत्स्वप्नसुषुप्तिषु अनुभवरूपा वासना संस्कारोऽनुभववासना साङ्ख्यैस्तथाऽङ्गीकारात्, तदन्तःकरणमिति-तस्मिन्नन्तःकरणे बुद्धिरूपे अर्थो घटादिरूपारूढो ज्ञानरूपतत्परिणामविषयतया सम्बद्धः पुरुषस्यात्मन उपधानीभवति, उपधायको व्यवधायकः स्वरूपतिरोधायक इति यावत्, यत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसाराऽपवर्गौ व्यवह्रियेते इत्यर्थः तर्हि कर्ता चेतन इति कृति-चैतन्ययोः कथं सामानाधिकरण्यानुभव इत्यत आह-भेदाग्रहाच्चेति, निष्क्रिये अकर्तरि तस्मिन् बुद्धितत्त्वे, बुद्धि-पुरुषयोर्भेदाग्रहाच्चैतन्यकृत्यभिमानौ, यथा भवतां गौरोऽहं सुखीत्यर्थः, कर्मवासना कर्मजनितमपूर्वम्, ननु पुरुषधर्म एव किं नापूर्वमित्यत आह पुरुषस्त्विति-नापूर्व-तत्फलाभ्यां लिप्यते कौटस्थ्यादिति श्रुतेरित्यर्थः, इन्द्रियादीनां मिथोभेदकमसाधारणं व्यापारमाह-आलोचनमिति-निर्विकल्पकमित्यर्थः। ननु बुद्धेः कृत्यध्यवसायो न व्यापारः, कृतिविषयस्य घटादेर्जडायां बुद्धौ प्रतिभासासम्भवात्, न च कर्तव्येन घटादिना सम्बन्धान्तरमस्ति, न चासम्बन्धे करोमीत्यादिव्यवसायोऽतिप्रसङ्गादित्यत आह-सा हीति चेतनोपरागवशेन जडाया अपि बुद्धेरिन्द्रियप्रणालिकया परिणतिभेद एव ज्ञानरूपः कर्तव्येन घटादिना सम्बन्ध इत्यर्थः, पुरुषेति-बुद्धि-पुरुषयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपरागः, नीलेन्द्रियसन्निकर्षान्नीलाकारज्ञानपरिणतिभेदोत्पादः पारमार्थिको विषयोपरागः, ताभ्यां कर्तव्यविषयस्य प्रतिभासात् तज्जन्यः करोमीत्यध्यवसायो व्यापारावेश इत्यर्थः। दर्पणस्येवेति दर्पणप्राया बुद्धिः, बुद्धितो ज्ञानोपलब्ध्योर्भेदमाह-तत्रैवमिति,-विषयोपरागो विषयेन्द्रियसम्बन्धे बुद्धेर्विषयाकारः परिणतिभेदोऽयं घट इत्यादिः, तेनेति-तेन ज्ञानेन, चेतनोऽहमिदं जानामीत्येवमाकारो बुद्धावारोपितस्य चैतन्यस्य यः सम्बन्धोऽतात्त्विकः सोऽयमुपलब्धिरित्यर्थः। एवं व्यवस्थिते सिद्धमर्थमाह-तदेवमिति-ज्ञानवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेवेत्यर्थः, संस्कारस्य साङ्ख्यैरनभ्युपगमात्, ज्ञानस्यैव स्मृतिहेतोरनभिव्यक्ततयाऽनुवृत्तेरिति स नोक्तः, तत्सामानाधिकरण्येनेति-कृतिसामानाधिकरण्येनेत्यर्थः, यद्यप्यदृष्टस्यायोग्यतया तत्सामानाधिकारण्यं न प्रत्यक्षं, तथापि धार्मिको-

ऽहमित्यनुव्यवसायादुपनीतस्य प्रत्यक्षत्वमिति भावः । परिणामित्वादिति अनित्यधर्माश्रयत्वादित्यर्थः" इति ।

अहङ्कारात् पञ्चतन्मात्राणि एकादशेन्द्रियाणि चेति षोडशको गणः, पञ्चतन्मात्राणि—शब्द-रूप-रस-गन्ध-स्पर्शाः सूक्ष्मा उदात्तादिविशेषरहिताः, एकादशेन्द्रियाणि च चक्षुः श्रोत्रं घ्राणं रसनं त्वगिति पञ्च बुद्धीन्द्रियाणि, वाक्-पाणि-पाद-पायूपस्थाः पञ्च कर्मेन्द्रियाणि, मनश्चेति, पञ्चतन्मात्रेभ्यः पञ्च महाभूतान्युत्पद्यन्ते, तथाहि-शब्दतन्मात्रादाकाशं शब्दगुणम्, शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद् वायुः शब्दस्पर्शगुणः, शब्दस्पर्श-तन्मात्रसहिताद् रूपतन्मात्रात् तेजः शब्द स्पर्श-रूपगुणम्, शब्द-स्पर्श-रूप-तन्मात्रसहितात् रसतन्मात्रादापः शब्द-स्पर्श-रूप-रसगुणाः, शब्द-स्पर्श-रूप-रसतन्मात्रसहिताद् गन्धतन्मात्रात् शब्द-स्पर्श-रूप-रस-गन्धगुणा पृथिवीति, तदुक्तमीश्वरकृष्णेन—

"प्रकृतेर्महाँस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात्, पञ्चभ्यः पञ्च भूतानि ॥" [साङ्ख्यकारिका—२२]
मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो, न प्रकृतिर्न विकृतिः पुरुषः ॥" [साङ्ख्यकारिका—३]

इति, तस्माद् गणश्च षोडशक इति पूर्वकारिकागतषोडशकपदेन पञ्चतन्मात्रैकादशेन्द्रियग्रहणम्, षोडशकस्तु विकार इति द्वितीयकारिकागतषोडशकपदेन पञ्चमहाभूतैकादशेन्द्रियग्रहणम्, मूलप्रकृतिपदेन आदिकारणप्रधानं बोध्यते, तस्य कस्यापि कार्यत्वाभावादविकृतित्वम्, महदाद्या इत्यनेन महदहङ्कार-तन्मात्राणां बोधनम्, महतोऽहङ्कारं प्रति कारणत्वेन प्रकृतित्वं प्रधानकार्यत्वेन विकृतित्वम्, अहङ्कारस्य पञ्चतन्मात्रैकादशेन्द्रियकारणत्वेन प्रकृतित्वं महत्कार्यत्वेन विकृतित्वम्, पञ्चतन्मात्राणां पञ्चमहाभूतकारणत्वेन प्रकृतित्वम्, अहङ्कारकार्यत्वेन विकृतित्वम्, पञ्चमहाभूतैकादशेन्द्रियाणां न किमपि तत्त्वान्तरं प्रति कारणत्वमिति न प्रकृतित्वम्, किन्तु पञ्चमहाभूतस्य पञ्चतन्मात्रकार्यत्वेन विकृतित्वम्, एकादशेन्द्रियाणामहङ्कारकार्यत्वेन विकृतित्वमिति विवेकः ॥ १८ ॥ २११ ॥

प्रदर्शितप्रधानमहदहङ्कारादिक्रममेव दर्शयति—

**प्रधानान्महतो भावोऽहङ्कारस्य ततोऽपि च ।**
**अक्षतन्मात्रवर्गस्य, तन्मात्राद् भूतसंहतेः ॥ १९ ॥ २१२ ॥**

**प्रधानादिति**-प्रकृतितत्त्वादित्यर्थः, **महतः** बुद्धितत्त्वस्य, **भावः** स्वाधिकरणक्षणध्वंसानधिकरणस्वाधिकरणक्षणवृत्तित्वरूपाद्यक्षणसम्बन्धलक्षणोत्पत्तिः सत्कार्यवादे न सम्भवतीति आविर्भावः, **ततोऽपि** च महतोऽपि च, **अहङ्कारस्य** वैकारिकाहङ्कारादेः, भाव इत्युत्तरत्राप्यनुषञ्जनीयम्, 'ततोऽपि' इत्युत्तरत्राप्यनुवर्तते, तथा च ततोऽपि-अहङ्कारादपि, **अक्षतन्मात्रवर्गस्य** एकादशेन्द्रिय-पञ्चतन्मात्रेति षोडशगणस्य, भावः-आविर्भाव इति सम्बन्धनीयम्, **तन्मात्राद्** तन्मात्राणां बहुत्वेऽपि जात्यपेक्षयैकवचनमिति पञ्चतन्मात्रेभ्यः, **भूतसंहतेः** आकाशादिपञ्चभूतस्य भावः-प्रादुर्भावः ॥ १९ ॥ २१२ ॥

स्थूलकार्यमधिकृत्याह-

**घटाद्यपि पृथिव्यादिपरिणामसमुद्भवम् ।**
**नात्मव्यापारजं किञ्चित्, तेषां लोकेऽपि विद्यते ॥२०॥२१३॥**

**घटाद्यपीति**-घट-पट-मठादिस्थूलकार्यजातमपीत्यर्थः, **पृथिव्यादिपरिणामसमुद्भवं** पृथिव्यादीनां मृदाद्यात्मकानां परिणामाद् विलक्षणसंयोगादितः, समुद्भवः-आविर्भावो यस्य तत्, परिणामात् परिणामान्तरमित्येवं साङ्ख्यैरुपगमात्, **तेषां** साङ्ख्यानां मते, **लोकेऽपि** जगत्यपि, **आत्मव्यापारजं** चैतन्यस्वरूपात्मव्यापारप्रभवं, **किञ्चित्** किमपि कार्यम्, **न** विद्यते नास्ति, साङ्ख्यमते कर्तुरात्मनो व्यापारस्यैवाभावात् तत्कार्यं न समस्तीति ॥ २० ॥ २१३ ॥

सत्कार्यवादिप्रतिपक्षासत्कार्यवाद्यभ्युपगतविषयिणीं वार्तामाह—

**अन्ये तु ब्रुवते ह्येतत्, प्रक्रियामात्रवर्णनम् ।**
**अविचार्यैव तद् युक्त्या, श्रद्धया गम्यते परम् ॥२१॥२१४॥**

**अन्ये त्विति**-असत्कार्यवादिनः सौगतादय इत्यर्थः, **ब्रुवते** कथयन्ति, हि यतः, **एतत्** अनन्तरोदितम्, **प्रक्रियामात्रवर्णनं**, साङ्ख्याचार्ययदृच्छाकल्पितपरिभाषामात्रोपवर्णनम्, मात्रपदेन तात्त्विकव्यवच्छेदः, **तत्** तस्मात् कारणात्, **युक्त्या** सत्तर्कादिना, **अविचार्यैव** विचारमकृत्वैव, **परं** केवलं, **श्रद्धया** आचार्यपरम्परोपदर्शितार्थभक्त्या-यद् यद् यथा साङ्ख्याचार्यैरभिहितं तत् तत् तथैवेत्येवंरूपया, **गम्यते** अध्ययनाध्यापनादिविषयतयोपादीयते ॥ २१ ॥ २१४ ॥

कथं श्रद्धामात्रगम्यमेतन्न तु तात्त्विकमित्यपेक्षायामाह—

**युक्त्या तु बाध्यते यस्मात्, प्रधानं नित्यमिष्यते ।**
**तथात्वाप्रच्युतौ चास्य, महदादि कथं भवेत् ॥ २२ ॥ २१५ ॥**

**युक्त्या** त्विति–सत्तर्कादिसध्रीचीनविचारेण तु पुनरित्यर्थः, **बाध्यते** बाधितं भवति, युक्तिबाधितत्वमेव भावयति–**यस्मा**दिति, **प्रधानं** प्रकृत्यपरनामकम्, **नित्यं** अप्रच्युतानुत्पन्नस्थिरैकस्वभावम्, **इष्यते** सत्कार्यवादिभिः साङ्ख्याचार्यैरभ्युपगम्यते, **अस्य** प्रधानस्य, **तथात्वाप्रच्युतौ च** प्रधानत्वाविनाशे पुनः, **महदादि** महदहङ्कारादिकम्, **कथं भवेत्** कस्मात् प्रकृतितो जायेत, पूर्वस्वभावपरित्यागाऽपूर्वस्वभावोपादानाभ्यामेव कार्यकारणभावनियमात्, स्वर्णस्याङ्गदादिपरिणामनाशेनैव कुण्डलादिपरिणामोत्पाददर्शनात् प्रधानस्य प्रधानत्वप्रच्युतौ तद्रूपेणैव सर्वदा व्यवस्थितस्य बुद्ध्यादिरूपेण परिणमनासम्भवादित्याशयः ॥२२॥२१५॥

नन्वपूर्वस्वभावोत्पत्त्या कार्यकारणभावो न साङ्ख्यैरुपेयते येन पूर्वस्वरूपनाशे सत्येवापूर्वस्वभावोत्पत्तिरिति पूर्वापररूपभेदादनित्यता प्रधानस्य प्रसज्येत, किन्तु यथाऽपरित्यक्तसर्पभावस्य सर्पस्य कुण्डलावस्था भवति तथाऽपरित्यक्तप्रधानभावस्यैव प्रधानस्य महदादिपरिणामो भवतीत्येवमभ्युपगमे को दोषः ? अवस्थित एव नरे धर्मिणि युवत्ववृद्धत्वादिपरिणामयोः पूर्वोत्तरभावनियमेनाऽवस्था सांकर्यादित्यभिप्रायं परस्योट्टङ्क्य निराकुरुते—

**तस्यैव तत्स्वभावत्वादिति चेत् किं न सर्वदा ? ।**
**अत एवेति चेत् तस्य, तथात्वे ननु तत् कुतः ? ॥२३॥२१६॥**

**तस्यैवे**त्यवतारयन्ति उपाध्यायाः; हरिभद्रसूरयस्तु पराभिप्रायमाहेत्येवावतरणिकां दर्शितवन्तः, पराभिप्रायस्त्ववतारितपद्यगतोऽस्त्येव, तस्य पराभिप्रायत्वेन सामान्यतोऽभिधानं विशिष्य स्वरूपप्रकटनं वेत्यत्र न कश्चिद् विशेष इति बोध्यम्, **तस्यैव** प्रधानस्यैव, एवकारेणान्यस्य तथास्वभावव्यवच्छेदः, एवकारेण स्वभावान्तरव्यवच्छेद इत्युपाध्यायोक्तौ प्रधानाद् भिन्नस्वभावं वस्तु स्वभावान्तरं, तस्य व्यवच्छेदः–स्वभावान्तरवतो व्यवच्छेद इति यावत्, **तत्स्वभावत्वात्** सन्निधानमात्रेण महदादिजननस्वभावत्वात्, अथवा एवकारेण स्वभावान्तरव्यवच्छेद इत्युपाध्यायोक्तेरयमभिप्रायः–प्रधानस्य प्रधानत्वं सन्निधानमात्रेण

महदादिजननस्वभावत्वमेव नान्यदिति महदादिजननस्वभावत्वलक्षणप्रधानत्वव्यतिरिक्तस्वभावव्यवच्छेद इति, तथा च महदादिजननस्वभावत्वलक्षणप्रधानत्वाप्रच्युतावपि महदाद्युत्पत्तिः, **इति चेत्?** एवं परो मन्यते चेत्, तदा **सर्वदा किं न** महदादिकं सर्वदा किं न भवति, सन्निधानमात्रेण महदादिजननस्वभावस्य प्रधानस्य सर्वदा सत्त्वात्, जगज्जननस्वभावस्य प्रधानस्य सन्निधानेनैकदैव जगत् स्यात्, समर्थस्य कार्यकरणविलम्बायोगादित्याशयः, पर आह–**अत एवेति**–सर्वदा प्रधानं महदादिकं न जनयतीति कदाचित्तज्जननस्वभावादर्थतः प्राप्तादेवेत्यर्थः, तथा च न सर्वदोत्पत्तिप्रसङ्गः, तथा स्वभावाभावादित्याशयः, वाद्याह–**इति चेदिति**–एवं त्वं मन्यसे यदीत्यर्थः, **ननु** इत्याक्षेपे, **तस्य** प्रधानस्य **तथात्वे** नियतस्वरूपाविकृतत्वे, **तत्** कदाचिज्जननस्वभावत्वं, **कुतः** कस्माद् भवेत्? न कुतश्चिदपीत्यर्थः, एकरूपा हि प्रकृतिर्यदि महदादिजननस्वभावा तदा सदैव महदादि जनयेत्, यदि न महदादिजननस्वभावा कदापि महदादि न जनयेत्, यत्काले महदादिजननं तत्कालावच्छिन्नजनननिरूपितत्वं, यत्काले जननं न भवति तत्कालावच्छिन्नाजनननिरूपितत्वमेकस्मिन् स्वभावे उपगम्य तत्तत्कालावच्छिन्नजननाजननोभयनिरूपितैकस्वभावत्वं प्रधानस्येति ततः कदाचिन्महदादिजननं कदाचित् तदजननमित्युभयमपि सम्भवतीति चेत्? जननाजननयोस्तत्तत्कालावच्छिन्नत्वे सिद्धे सति प्रधानस्य तत्तत्कालावच्छिन्नजननाजननोभयनिरूपितैकस्वभावत्वं सिध्यति, निरुक्तस्वभावत्वसिद्धौ च जननाजननयोस्तत्तत्कालावच्छिन्नत्वसिद्धिरित्यन्योऽन्याश्रयः, जननाजननयोः स्वस्वभावादेव तत्तत्कालावच्छिन्नत्वे च किमिति प्रकृत्यादिप्रक्रियाकल्पनाक्लेशेन? कारणमन्तरेणैव तत्तत्काले प्रतिनियततत्तत्कार्यसम्भवेन स्वभाववादस्यैव साम्राज्यादित्याशयः ॥ २३ ॥ २१६ ॥

एकान्तनित्यप्रधानाकरणे युक्त्यन्तरमुपढौकते—

**नानुपादानमन्यस्य, भावेऽन्यज्जातुचिद् भवेत् ।**
**तदुपादानतायां च, न तस्यैकान्तनित्यता ॥ २४ ॥ २१७ ॥**

**नानुपादानमिति**–नञो भवेदिति क्रियया सम्बन्धः, **अनुपादानं** उपादानकारणरहितम्, **अन्यस्य** सर्वथोपादेयमहदादिव्यतिरिक्तस्य प्रधानस्य, **भावे** सन्निधाने, **अन्यत्** प्रधानाद् भिन्नमेकान्ताविद्यमानं महदादि, **जातुचित्** कदाचिदपि, **न** नैव, **भवेत्** जायेत, सर्वथाऽसतः सत्त्वासम्भवात्, **च** पुनः,

**तदुपादानतायां** महदादेः प्रधानात्मकोपादानसहिततायामभ्युपगम्यमानायां, **न** नैव, **तस्य** प्रधानस्य, **एकान्तनित्यता** अप्रच्युतानुत्पन्नस्थिरैकरूपता, अनित्य-महदाद्युपादेयाभिन्नत्वेन महदादिनाशे तन्नाशभावात्; ननु महदादेरनित्यत्वे तद-भिन्नत्वात् प्रधानस्यानित्यत्वं भवेत्, तदेव तु न महदादेरपि नित्यतयैवाभ्युपगमा-दिति चेत्? तर्हि प्रकृति-महदाद्योर्नित्ययोः परस्परानपेक्षसत्त्वतः प्रकृतिविकृतिभाव एव न भवेदिति प्रकृतिविकृतिप्रक्रिया भग्ना, नित्यत्वेन महदादेर्मुक्तावपि सत्त्वे तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गावित्यस्तमुपगच्छेत्; महदादेः प्रकृतिपरिणा-मत्वेन प्रकृत्यभिन्नत्वेऽप्यनित्यत्वादिना भेद एवेति चेत्? तर्हि भेदाभेदलक्षणा-नेकान्तवादाभ्युपगन्तृत्वेनैकान्तवादित्वभङ्गः प्रसज्येतेति ॥ २४ ॥ २१७ ॥

स्थूलमपि सकर्तृकं न तूपादानैककारणकमिति प्रतिपादयति—

**घटाद्यपि कुलालादिसापेक्षं दृश्यते भवत् ।**
**अतो न तत् पृथिव्यादिपरिणामैकहेतुकम् ॥ २५ ॥ २१८ ॥**

**घटाद्यपीति**—आदिपदात् पटादिस्थूलकार्याणामुपग्रहः, **कुलालादिसापेक्ष-मिति**—अत्रादिपदात् तन्तुवायाद्युपग्रहः, तथा च स्थूलकार्यजातं कर्तृसापेक्षमित्यर्थः, **भवत्** जायमानं, **दृश्यते** प्रत्यक्षप्रमाणेनोपलभ्यते, तथा च कुलालादिसत्त्वे घटादि-सत्त्वम्, कुलालाद्यभावे घटाद्यभाव इत्यन्वयव्यतिरेकानुविधानदर्शनेन घटादीनां कुलालादिकर्तृकत्वावधारणात्, **अतः** अस्मात् कारणात्, **तत्** स्थूलकार्यजातम्, **पृथिव्यादिपरिणामैकहेतुकं** पृथिव्यादिपरिणामिमात्रकारणप्रभवम्, **न** न भवति, पृथिव्यादिपरिणामिकारणानामपि घटादीन् प्रति नियतान्वयव्यतिरेकौ विना न कारणत्वग्रहः, नियतान्वयव्यतिरेकौ च घटादीन् प्रति कुलालादीनामपि स्त इति तेषामपि कारणत्वावधारणात्; कार्यगतयावद्धर्मानुविधायित्वं परिणामि-कारणस्यैवेति तदेव कारणं, कुलालादीनां घटादिगतयावद्धर्मानुविधायित्वाभावान्न कारणत्वमिति चेत्?, तर्हि महत्तत्त्वगता रागादयोऽपि प्रकृतौ स्वीकर्तव्याः, अन्यथा तस्या अपि महत्तत्त्वलक्षणकार्यगतयावद्धर्मानुविधायित्वाभावात् कारणत्वं न स्यात्, तथा च भावाष्टकवत्त्वात् प्रकृतिरेव बुद्धिः, न तु प्रकृतिः, ननु प्रकृतौ रागादयः सूक्ष्मरूपतया सन्ति, बुद्धौ तु स्थूलरूपतया ते सन्तीत्येवं प्रकृति-बुद्ध्योर्भेद इति चेत्?, तर्हि लयाद्यवस्थायां बुद्धेः सूक्ष्मरूपतयाऽवस्थानात् तदानीं तत्र रागा-दयोऽपि सूक्ष्मरूपतयाऽवस्थिता इति बुद्धिरेव प्रकृतिस्तथाऽप्यनुषज्यते, यथा च

बुद्धिगतधर्माणां रागादीनां सूक्ष्मरूपतयाऽवस्थानं प्रकृतावभ्युपगम्य तस्मात् कारणत्वमुपपाद्यते, तथा घटादिगतधर्माणामपि सूक्ष्मरूपतया कुलालादाववस्थानं स्वीकृत्य तस्य घटादिकारणत्वमिति न कल्प्यते बाधकाभावात् ॥ २५ ॥ २१८ ॥

चेतने पुरुषेऽचेतनधर्मस्य कर्तृत्वस्य सङ्क्रमाभ्युपगमे परिणामित्वमापद्यते, कुलालादिदेहस्तु घटादिकर्ताऽतोऽभ्युपगम्यत इत्याशङ्क्याह—

**तत्रापि देहकर्ता चेन्नैवासावात्मनः पृथक् ।**
**पृथगेवेति चेद्? भोग, आत्मनो युज्यते कथम्? ॥२६॥२१९॥**

**तत्रापीति**–घटादावपीत्यर्थः, **देहकर्तेति** स्थाने देहः कर्तेति हारिभद्र पाठो युक्तः, देहः कुलालादिदेहः, **कर्ता** घटादेः कर्ता, स्थूलरूपावच्छिन्नस्य घटादेः कुलालादिशरीरगतचेष्टयोत्पादात्, **इति चेत्?** इत्थमुपेयते इति पराशङ्का, तत्रोत्तरं–**नैवेति**–अस्य **पृथगित्यनेनान्वयः**, **असौ** देहः, **आत्मनः** पुरुषात्, **पृथक्** भिन्नो नैवेत्यर्थः, उत्तरमिदं लोकायतिकमतमाश्रित्य, पर आह-**पृथगेवेति चेदिति**–आत्मा सर्वगतो निष्क्रियश्च, देहस्त्वसर्वगतः सक्रियश्चेत्येव विरुद्धधर्माध्यासादात्मा देहाद् भिन्न इति यदि त्वं मन्यसे तत्रोत्तरं–**भोग आत्मनो युज्यते कथमिति**–य एव यस्य कर्ता स एव तस्य भोक्ता, देहाद् भिन्नस्यात्मनो मुक्तकल्पस्य भोगः कथं युज्यते?–न कथञ्चिदित्यर्थः, क्षीरनीरन्यायेन देहाभिन्नस्यैवात्मनो देहोपनीतभोगसम्भवादित्याशयः ॥ २६ ॥ २१९ ॥

परमार्थतो नास्त्येवात्मनो भोग इति भोगाभावापत्तिरिष्टापत्तिरूपत्वान्न दोष इति स्वाभिप्रायं परः प्रकटयति—

**देहभोगेन नैवास्य, भवतो भोग इष्यते ।**
**प्रतिबिम्बोदयात् किन्तु, यथोक्तं पूर्वसूरिभिः ॥२७॥२२०॥**

**देहभोगेनेति**–देहेन भोगो देहभोगस्तेन देहभोगेन, अस्य भोग इत्यनेन सम्बन्धः, धान्येन धनमितिवदभेदे तृतीया, अथवा देहभोगेनेत्यस्य देहभोगद्वारेणेत्यर्थः, तथा च देहजन्यभोगाभिन्नभोगो देहद्वारा वा भोगः, **अस्य** आत्मनः, **भावतः** परमार्थतः, **नैव इष्यते** साङ्ख्याचार्यैर्नैवाभ्युपगम्यते, यदि परमार्थतो नात्मनो भोगस्तर्हि कथं तस्य स इति पृच्छति-**किन्त्विति**, उत्तरयति-**प्रतिबिम्बोदयन्यायादिति**–यथा जलं न सूर्यस्वरूपमिति सूर्यप्रकाशो जले परमार्थतो

नास्त्येव, अथापि सूर्यप्रतिबिम्बो जले भवति तद्ग्रहणशीलं जलं तत्प्रकाशवदिव भवति तथा स्वच्छत्वाद् दर्पणकल्पबुद्धिगतचैतन्यप्रतिबिम्बतो बुद्धिश्चेतनावदिव भवति, स्वप्रतिबिम्बाकलितभोक्तृबुद्धिसान्निध्यात् पुरुषो भोक्तेव भवतीत्यर्थः, अत्र श्रीमन्तो यशोविजयोपाध्यायाः–"यद्यप्येवमपि सुखदुःखाद्यन्तःकरणधर्मानुविद्धस्य महत एव स्वतोऽचेतनस्य चेतनोपरागेण 'चेतनोऽहं सुखी' इत्याद्यभिमानरूपश्चैतन्यांशेऽतात्त्विको भोगः, न तु पुरुषस्य, तथापि भोक्तृबुद्धिसंविधानात् तत्र भोक्तृत्वव्यवहारः, तदाह पतञ्जलिः–"शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति, तदनुपश्यन्न तदात्माऽपि तदात्मक इव प्रतिभासते" इति, केचित् तु बुद्धौ पुरुषोपरागवत् पुरुषेऽपि बुद्ध्युपरागं वर्णयन्ति, न चैवं विकृतत्वापत्तिः, अतात्त्विकोपरागेण तदयोगात्, तथा चाह वादमहार्णवः-"बुद्धिदर्पणसंक्रान्तमर्थप्रतिबिम्बकं द्वितीयदर्पणकल्पे पुंस्याध्यारोहति तदेव भोक्तृत्वमस्य, न तु विकारोपपत्तिः" इति, बुद्धिगतप्रतिबिम्बात्मन्येव बुद्धिगतभोगोपसंक्रमः, बिम्बात्मनि तु न किञ्चिदित्यपरे" इति, ग्रन्थकारः स्वोक्तार्थे साङ्ख्याभिमते तदभियुक्तसम्मतिमुपदर्शयति–**यथोक्तमिति**, **पूर्वसूरिभिः** विन्ध्यवास्यादिभिः साङ्ख्याचार्यैः ॥ २७ ॥ २२० ॥

तदुक्तमेवोल्लिखति—

**पुरुषोऽविकृतात्मैव, स्वनिर्भासमचेतनम् ।**
**मनः करोति सान्निध्यादुपाधिः स्फटिकं यथा ॥२८॥ २२१॥**

**पुरुष** इति–आत्मेत्यर्थः, **अविकृतात्मैव** नित्य एव, अप्रच्युतानुत्पन्नस्थिरैकस्वभाव एवेति यावत्, **अचेतनं** चैतन्यशून्यम्, **मनः** अन्तःकरणम्, **सान्निध्यात्** सामीप्यात्, **स्वनिर्भासं** स्वाकारं, स्वोपरक्तमिति यावत्, **करोति** कुरुते, अत्र निदर्शनमाह–**यथेति**, **उपाधिः** पद्मरागमण्यादिः, **स्फटिकं** उपलविशेषं, यथा स्वधर्मसंक्रमेण स्वोपरक्तं करोति, न च स्वधर्मसंक्रमेण पद्मरागादिर्विकरोति, किन्तु स्फटिक एव विक्रियते, तथाऽऽत्माऽपि बुद्ध्युपरागं जनयन् न स्वयं विकरोति, किन्तु बुद्धिरेव विक्रियत इति ॥ २८ ॥ २२१ ॥

यदि नामैवं ततः किमित्यत आह—

**विभक्तेदृक्परिणतौ, बुद्धौ भोगोऽस्य कथ्यते ।**
**प्रतिबिम्बादयः स्वच्छे, यथा चन्द्रमसोऽम्भसि ॥ २९ ॥ २२२॥**

**विभक्तेदृक्परिणताविति**–विभक्ता आत्मभिन्ना चासावीदृक्परिणतिश्चाभिहितपुरुषोपरागपरिणामा च विभक्तेदृक्परिणतिरिति कर्मधारयः, तस्यां विभक्तेदृक्परिणतौ, **बुद्धौ** अन्तःकरणरूपायाम्, **अस्य** आत्मनः, **भोगः** सुखदुःखानुभवलक्षणः, **कथ्यते** आसूरिप्रभृतिभिः साङ्ख्याचार्यैरुच्यते, किंवदित्याह–**यथेति**, **चन्द्रमसः** वास्तवस्य चन्द्रस्य, **प्रतिबिम्बोदयः** प्रतिबिम्बपरिणामः, **स्वच्छे** निर्मले, **अम्भसि**, यथा भवति तथेत्यर्थः ॥ २९ ॥ २२२ ॥

तदिदमखिलं साङ्ख्यसम्मतमपाकुर्वन्नाह—

**प्रतिबिम्बोदयोऽप्यस्य, नामूर्तत्वेन युज्यते ।**
**मुक्तेरतिप्रसङ्गाच्च, न वै भोगः कदाचन ॥ ३० ॥ २२३ ॥**

**प्रतिबिम्बोदयोऽपीति**–प्रतिबिम्बपरिणामोऽपीत्यर्थः, **अस्य** आत्मनः, **अमूर्तत्वेन** रूपादिमत्त्वलक्षणमूर्तत्वशून्यत्वेन, **न युज्यते** न घटते, अत्रोपाध्यायैः—"छायावन्मूर्तद्रव्येणैव हि प्रतिबिम्बाख्यं स्वाकारं भास्वरद्रव्योपादानं द्रव्यमारभ्यते; तथा चार्षम्–

"सामा उदिया छाया, अभासुरगया णिसिं तु कालाभा ।
स च्चेह भासुरगया सदेहवण्णा मुणेयव्वा" ॥ १ ॥ इति,

"श्यामोदिता छायाऽभास्वरगता निशि कालाभा ।
सा चेह भास्वरगता, स्वदेहवर्णा ज्ञातव्या" इति संस्कृतम् ।

युक्तं चैतत्, अन्यथेदन्त्वावच्छेदेन मुखभेदग्रहाभावात् 'इदं मुखम्' इति प्रतीतेः कथञ्चिदुपपादनेऽपि 'इदं मुखप्रतिबिम्बम्' इति प्रतीतेः कथमप्युपपादयितुमशक्यत्वात्, मुखभ्रमाधिष्ठानत्वरूपमुखप्रतिबिम्बत्वस्य प्रागेवाग्रहात्, 'आदर्शे मुखप्रतिबिम्बम्' इत्याधाराधेयभावाध्यवसायानुपपत्तेश्च, एतेन मुखे बिम्बत्वमिवादर्श एव प्रतिबिम्बत्वं मुखसान्निध्यदोषाभावादिसामग्र्याभिव्यज्यते, इति निरस्तम्, बिम्बोत्कर्षेण प्रतिबिम्बोत्कर्षानुपपत्तेः, प्रतिबिम्बत्वाग्राहकसामग्र्या एवादर्शभेदभ्रमहेतुत्वेन 'अयं नादर्शः किन्तु मुखप्रतिबिम्बम्' इति सार्वजनीनानुभवानुपपत्तेश्च; न च प्रतिबिम्बस्य द्रव्यत्वे सावधिकत्वानुपपत्तिः, प्रतिबिम्बधर्मस्यैव महत्त्ववत् सावधिकत्वात्; न चाश्रयनाशे तन्नाशानुपपत्तिः, बिम्बसन्निधाननिमित्तजनितस्य तस्य तन्नाशेनैव नाशसम्भवात्, न चैवमनन्तप्रतिबिम्बोत्पत्तिनाशादिकल्पने गौरवम्, सादृश्यातिरिक्तानन्तदोषादिकल्पने तवैव गौरवात्, अनुभवापलापाच्चेति अधिकमाकरे । स्फटिकादौ लौहित्यादिकमपि

पद्मरागादिमूर्तसन्निधिजन्य एव परिणामविशेषः, साक्षात्सम्बन्धेन तत्प्रतीतौ परम्परासम्बन्धस्यातिप्रसक्तत्वात् ,स्फटिकादिनिष्ठतया लौहित्याश्रयसंसर्गस्य साक्षात्सम्बन्धेन लौहित्यभ्रमजनकत्वे तत्र विशेषदर्शनादेरुत्तेजकत्वे परम्परासम्बन्धेन लौहित्यप्रमानियामकत्वादिकल्पने चातिगौरवात्, लौहित्यमात्रजनकत्वकल्पनाया एव न्याय्यत्वात्; अभिभूतानभिभूतरूपयोः समावेशस्यानुभवसिद्धत्वेनाविरुद्धत्वात्, नियतारम्भनिरासाच्चेति अन्यत्र विस्तरः ।

तस्मादात्मनो बुद्धौ बिम्बतया उपाधितया वाऽमूर्तत्वान्न स्वोपरागजनकत्वम्, तत्त्वे वा कथमात्मनोऽकारणत्वं, कथं वा तदुपरागस्यानिर्वचनीयस्यासतो वा स्वीकारे नोपनिषद्बौद्धमतप्रवेशः; एतेन "नामूर्तस्य प्रतिबिम्बाभावः शक्यो वक्तुम्, अमूर्तानां रूपपरिणामादीनां प्रतिबिम्बदर्शनात्, द्रव्यस्याप्यमूर्तस्य साभ्रनक्षत्रस्याकाशादेर्जानुमात्रे जले दूरविशालस्वरूपेण प्रतिबिम्बदर्शनाच्च" इत्युक्तावपि न निस्तारः । अथ न पुरुषजन्यः पुरुषोपरागः, किन्तु पुरुषभेदाग्रहादसत एव तस्योत्पत्तिः, सदुपरागेण भानाच्च नासत्ख्यातिरिति चेत्? गतं तर्हि सत्कार्यवादेन, बुद्धौ सन्नेव पुरुषोपरागः कदाचिदाविर्भवतीति चेत्? तर्हि बुद्ध्युत्पत्तेः पूर्वं पुरुषस्यानुपरक्ततया मोक्षः स्यात्, प्रकृतेः साधारणत्वेनानुपरञ्जकत्वात्, पूर्वबुद्धिवासनानुवृत्तेः साधारण्येऽप्यसाधारणी प्रकृतिरिति चेत्? न–'बुद्धिनिवृत्तावपि तद्धर्मवासनानुवृत्तिः' इत्यपदर्शनम्, सौक्ष्म्यान्न दोष इति चेत्? मुक्तावपि तत्प्रसङ्गः, निरधिकारित्वान्नैवमिति चेत्? तर्हि साधिकारा प्रसुप्तप्रस्वभावा बुद्धिरेव प्रकृतिरस्तु कृतमन्तरा प्रकृत्यहङ्कारमनश्शब्दानामर्थान्तरकल्पनया, सैव हि तत्तद्व्यापारायोगात् तेन तेन शब्देन व्यपदिश्यते, शरीरवायुवत्, इत्यागमस्यापि न विरोध इति" इति । आत्मनोऽतात्त्विकभोगाभ्युपगमे दूषणान्तरमाह—**मुक्तेरतिप्रसङ्गाच्चेति**–तेषां प्रतिबिम्बाभावात्, संसारिणामपि मुक्तैकस्वभावत्वात्, **वै** निश्चितम्, **कदाचन** कदाचिदपि, **न भोगः** भोगो न भवेत् ॥ ३० ॥ २२३ ॥

दोषान्तरोपदर्शनायाह—

**न च पूर्वस्वभावत्वात्, स मुक्तानामसङ्गतः ।**
**स्वभावान्तरभावे च, परिणामोऽनिवारितः ॥ ३१ ॥ २२४ ॥**

**न चेति**, अथवा संसारिणां प्रतिबिम्बोदयस्वभावो न मुक्तानामिति मुक्तानां प्रतिबिम्बाभावान्मुक्तत्वं संसारिणां तु प्रतिबिम्बभावान्न मुक्तत्वमिति न मुक्तेरतिप्रसङ्ग इत्यत आह–**न चेति**—न वेत्यर्थः, अस्य असङ्गत इत्यनेनान्वयः, **स**

प्रतिबिम्बोदयस्वभावः, **पूर्वस्वभावत्वात्** संसार्यवस्थैकस्वभावत्वात्, कारणात्, **मुक्तानां** मुक्तिमतामात्मनाम्, **असङ्गतः** असमञ्जसः, निषेधद्वयबलात् सङ्गत एव, पूर्वसंसार्यवस्थस्यैव जीवस्योत्तरकालं मुक्तत्वमिति मुक्त्यवस्थायां प्रतिबिम्बोदयस्वभावाभावे तद्वत आत्मनोऽप्यभाव इति नित्यत्वं व्याहन्येत, तथा च नित्यत्वपरिरक्षणार्थं प्रतिबिम्बोदयस्वभावस्य सर्वदा सत्त्वमिति सर्वदैव भोगस्यापि प्रसक्त्या न कदाचन भोग इति दोषस्तदवस्थ एव, सार्वदिकस्य कादाचित्कत्वाभावात्, **स्वभावान्तरभावे च** नहि पूर्वस्वभावपरित्यागमन्तरेणोत्तरस्वभावग्रहणमिति प्रतिबिम्बोदयस्वभावलक्षणामुक्तस्वभावपरित्यागेन मुक्तस्वभावोत्पादे मुक्तानामिष्यमाणे च, **परिणामोऽनिवारितः** स्वभावान्यथात्वलक्षणकः परिणामो निवारयितुमशक्य एव, यथा घटनाशे घटावच्छिन्नस्याकाशस्य घटावच्छिन्नत्वेऽपि स्वभावापरित्यागः, तथा सवासनबुद्धिनाशे विषयावच्छिन्नस्य चैतन्यस्य विषयानवच्छिन्नत्वेऽपि स्वभावापरित्याग एवेति चेत्? न–दृष्टान्तासम्प्रतिपत्तेः, घटनाशे आकाशे घटाकाश इति व्यवहाराभावेन घटावच्छिन्नत्वस्वभावपरित्यागस्यावश्यकत्वात्, तदपरित्यागे तन्निबन्धनस्य घटाकाशव्यवहारस्याऽऽपत्तेः, अपि चासङ्गस्य पुरुषस्य प्रतिनियतस्य प्रतिनियततया बुद्ध्या समं कस्यचित् सम्बन्धस्याभावे सा बुद्धिस्तमेवात्मानं विषयेणावच्छिनत्तीत्यत्र किमपि नियामकं नास्तीति यैव बुद्धिर्न नश्यति सैवैका सर्वानपि पुरुषान् विषयेणावच्छिन्द्यादित्येकबुद्धिसद्भावेऽपि न कस्यचिन्मोक्षः स्यात्, तस्मात् बुद्धिरेव रागादिपरिणतात्मस्थानेऽभिषिक्ताऽस्तु, तस्या लयस्तु रागादिलय एव इति तत्रैव मुक्तिरिति युक्तम् ॥ ३१ ॥ २२४ ॥

आत्मनो देहादेकान्ततः पृथक्त्वे बन्धकारणानां हिंसादीनामघटनाच्छुभाशुभबन्धभावापत्तिदोषोऽपि साङ्ख्यस्येत्याह—

**देहात् पृथक्त्व एवास्य, न च हिंसादयः क्वचित् ।**
**तदभावेऽनिमित्तत्वात्, कथं बन्धः शुभाशुभः ॥ ३२ ॥ २२५ ॥**

**देहात् पृथक्त्व एवे**ति–देहादेकान्ततः पृथक्त्व इत्यर्थः, **अस्य** आत्मनः, स्वीक्रियमाणे इति शेषः, **न च हिंसादयः क्वचित्** कस्मिन्नप्यात्मनि हिंसादयो न स्युः; न च ब्राह्मणशरीरहत्यैव ब्रह्महत्येति वाच्यम्, मृतब्राह्मणशरीरदाहेऽपि ब्रह्महत्यायाः प्रसङ्गात्; न च मरणोद्देशाभावान्न ब्राह्मणशरीरदाहे ब्रह्महत्यापत्तिरिति वाच्यम्, मरणोद्देशेनापि कृताया ब्राह्मणशरीरहत्याया ब्राह्मणात्मनो नाशस्यासम्भवेन तदननुकूलाया मृतब्राह्मणशरीरदाहकल्पाया ब्राह्मणहत्या-

रूपत्वाभावात्, ब्राह्मणं घ्नतोऽप्यशक्यब्राह्मणात्मनाशकर्तृत्वाभावेन ब्रह्महन्तृत्वासम्भवात्; ब्राह्मणशरीरावच्छिन्नज्ञानजनकमनःसंयोगविशेषनाशानुकूलो व्यापार एव ब्रह्महत्येति तादृशव्यापारकर्तुर्ब्रह्महन्तृत्वमुपपद्यत इति चेत्? न–मनसोऽतिचञ्चलत्वेनानवरतमनःक्रियात एव जायमाननाशप्रतियोगिनस्तादृशमनस्संयोगस्य स्वत एव नश्वरत्वात्, परम्परया तथाघातसम्भवेऽपि साक्षाद्घातानुपपत्तेश्च; ब्राह्मणशरीरावच्छिन्नदुःखविशेषानुकूलव्यापार एव ब्रह्महत्येति चेत्? शरीराच्छरीरिणः सर्वथा भेदे शरीरच्छेदादिनाऽऽत्मनो दुःखमपि कथं भवेत्?; शरीरच्छेदस्य स्वप्रतियोगिशरीरावच्छिन्नलक्षणपरम्परासम्बन्धेनात्मसम्बद्धत्वात् तादृशदुःखविशेषानुकूलव्यापारत्वमिति चेत्? शरीरावयवच्छेदादात्मावयवच्छेद एव शरीरात् पृथग्भूतावयवस्य कम्पोपलब्धेः साक्षादेव कथं न च्छेदसम्बन्ध आत्मनः, आत्मप्रदेशस्य च्छिन्नस्य छिन्नशरीरावयवगतत्वाभावे छिन्नशरीरावयवकम्प एव न भवेत प्राणक्रियाया अपि तन्मात्रोपग्रहं विनाऽभावात्; नन्वेवं शरीरच्छिन्नावयवानुप्रविष्टस्यात्मप्रदेशस्य पृथगात्मत्वप्रसङ्गः स्यादिति चेत्? न–यस्माच्छरीराच्छिन्नावयवः पृथग्भूतस्तस्मिन्नवयवेऽनुप्रविष्टानामात्मप्रदेशानां पश्चाच्छरीर एवानुप्रवेशात् कियत्कालं छिन्ने शरीरावयवे हस्तादौ कम्पादितल्लिङ्गदर्शनेन च्छिन्नात्मप्रदेशानां सद्भावसिद्धावपि पश्चात् तत्र तल्लिङ्गकम्पाद्यदर्शनेन तच्छरीरानुप्रवेशस्य कल्पनात्; न चैकत्वे आत्मनो विभागाभावाच्छेदो न सम्भवतीति वाच्यं, शरीरद्वारेणात्मनोऽपि सविभागत्वात्, सविभागत्वाभावे आत्मनः सावयवशरीरव्यापित्वं न स्यात्, तथा च शरीरच्छेदनान्तरीयकच्छेद आत्मनः किं न स्यात्?; न चात्मनश्छिन्नाछिन्नप्रदेशयोः पश्चात् कथं सङ्घटनमिति चेत्? न–एकान्तेन छिन्नत्वाभावात्, पद्मनालतन्तुवदच्छेदेऽपि छेदाभ्युपगमात्, सङ्घटनमपि तथाभूतादृष्टवशादविरुद्धमेव, हन्त! एवं शरीरदाहेऽप्यात्मात्मदाहः स्यादिति चेत्? न–क्षीर-नीरयोरिवाभिन्नत्वेऽपि भिन्नलक्षणत्वेन शरीरदाहेऽप्यात्मदाहाभावात्, तस्माद् देहादात्मन एकान्तपृथक्त्वे हिंसाद्यभावः, **तदभावे** हिंसाद्यभावे, **अनिमित्तत्वात्**, निमित्तसंनिधानाभावात्, **कथं शुभाशुभो बन्धः** शुभाशुभयोर्भिन्नत्वेन द्विवचनस्यैव प्राप्तौ यदेकवचनं तदुपपत्तये इत्थमत्र विमर्शः–अत्र शुभश्चाशुभश्चेति विग्रहे द्विवचनापत्तिरतो न द्वन्द्वः, शुभश्चासावशुभश्चेति विग्रहे शुभत्वाशुभत्वरूपविरुद्धधर्माध्यासात् तयोरभेदेन विशेषणविशेष्यभावो न सम्भवतीति न कर्मधारयः किन्तु शुभेन सहितोऽशुभ इति व्याख्येयम् ॥ ३२ ॥ २२५ ॥"

भवत्वात्मनः सर्वथा शरीरात् पृथक्त्व उक्तदिशा बन्धाभावः, ततः को दोष? इत्यत आह—

**बन्धादृते न संसारो, मुक्तिर्वाऽस्योपपद्यते ।**
**यमादि तदभावे च, सर्वमेव ह्यपार्थकम् ॥ ३३ ॥ २२६ ॥**

**बन्धादृते** इति–बन्धं विनेत्यर्थः, **न संसारः** देव-नरकादिचतुर्गतिलक्षण-संसारो न, नञः **उपपद्यते** इत्यनेन सम्बन्धः, **वा** अथवा, **अस्य** आत्मनः, **मुक्तिः** मोक्षः, नोपपद्यते इति सम्बन्धः, यतो बद्धानां कर्मणां क्षय एव मुक्तिरिति, **तदभावे** मुक्तिरूपफलस्याभावे, **च** पुनः, **तदर्थं सर्वमेव यमादि** निखिलमेव यम-नियमाद्यनुष्ठानम्, **हि** निश्चितम्, **अपार्थकं** गतप्रयोजनकम्, इष्टप्रयोजनविपरीतकष्टैकमात्रप्रयोजनकमिति यावत्, न खलु स्वाभीष्टप्रयोजनं किमप्यनभिलषन्नेव प्रेक्षावान् स्वात्मानं दुष्करक्लेशैरवसादयतीति ॥ ३३ ॥ २२६ ॥

साङ्ख्याभिप्रायं प्रतिक्षेप्तुमुपदर्शयति–

**आत्मा न बध्यते नापि, मुच्यतेऽसौ कदाचन ।**
**बध्यते मुच्यते चापि, प्रकृतिः स्वात्मनेति चेत् ॥३४॥२२७॥**

**आत्मेति**–चैतन्यस्वरूपपुरुष इत्यर्थः, **अस्यासा**विति विशेषणं बन्धमुक्त्यभावेऽपि प्रत्यक्षसिद्धत्वान्नायमपलपितुं शक्य इत्यस्याधिगतये, **न बध्यते** न प्राकृतिक-वैकृतिकादिबन्धपरिणतो भवति, सवासनक्लेशकर्माशयानां बन्धत्वेन समाम्नातां पुरुषेऽपरिणामिन्यसम्भवात्, **नापि कदाचन मुच्यते** मुचिधातोर्बन्धनविश्लेषार्थत्वेन बन्धनविश्लेषरूपा मुक्तिर्बन्धनपूर्विका सर्वदाऽबद्धे आत्मनि न सम्भवतीत्यतोऽसावात्मा कस्मिन्नपि काले मुक्तिभाग् न भवतीति, यद्यात्मनो न बन्ध-मोक्षौ तर्हि कस्य तावित्यपेक्षायामाह–**बध्यत** इति–अस्य **प्रकृति**रित्यनेन सम्बन्धः, तथा च **स्वात्मना** स्वस्वरूपाभिन्नेन स्वपरिणामलक्षणेन बन्धेन प्रकृतिर्बध्यते बन्धभागिनी भवति, **च** पुनः, **मुच्यतेऽपि** स्वात्मनेत्यस्यात्रापि सम्बन्धात् स्वपरिणामलक्षणेन बन्धनेन प्रकृतिरेव बद्धा भवति, बन्धविश्लेषस्य प्रतियोगिविधया बन्धजन्यस्य यत्रैव बन्धस्तत्रैव तद्विश्लेष इति नियमेन बन्धसमानाधिकरणस्य च प्रकृतावेव सम्भवात्, यथा च जय-पराजयौ भृत्यगतौ स्वामिन्युपचर्येते तथा प्रकृतिगतावपि बन्ध-मोक्षौ भेदाग्रहात् पुरुषे उपचर्येते, नातोऽयमात्मा बद्धो वामदेवादिश्च मुक्त इति व्यवहारस्योपपत्तिः, तदुक्तमीश्वरकृष्णेन—

"तस्मान्न बध्यते नापि, मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः" ॥ १ ॥
[ साङ्ख्यका० ६२ ] इति,

**इति चेत्** एवं साङ्ख्योऽभिमन्यते यदि ॥ ३४ ॥ २२७ ॥

अनन्तराभिहितपराभिप्रायशङ्कायामुत्तरमाह—

**एकान्तेनैकरूपाया, नित्यायाश्च न सर्वथा ।**
**तस्याः क्रियान्तराभावाद्, बन्ध-मोक्षौ सुयुक्तितः॥३५॥२२८॥**

**एकान्तेनेति**–सर्वथेत्यर्थः, **एकरूपायाः** एकस्वभावायाः, **च** पुनः, **सर्वथा** सर्वैः प्रकारैः, **नित्यायाः** नित्यस्वरूपायाः, स्वरूपं च तस्याः प्रवृत्तिरूपैकक्रियावत्त्वमिति सर्वप्रकारैर्नित्यप्रवृत्तिरूपैकक्रियावत्या इति यावत्, **तस्याः** प्रकृतेः, **क्रियान्तराभावात्** प्रवृत्तेरन्या क्रिया क्रियान्तरनिवृत्तिः, तस्या अभावात्, **सुयुक्तितः** सन्न्यायात्, **बन्ध-मोक्षौ न** सम्भवतः, प्रकृति-पुरुषान्यताख्यातित एव मोक्षः साङ्ख्यस्याभिमतः, प्रकृतिपुरुषान्यताख्यातिश्च व्यापारः पुरुषस्यैव, चेतनत्वात्, इति तस्यैव मोक्षः सन्न्यायानुगतः, न तु प्रवृत्त्येकरूपायाः प्रकृतेः, अचेतनायाश्च तस्याः पुरुषार्थं व्यापारासम्भवात्, किञ्च सर्वपुरुषान् प्रति साधारणस्वरूपाया एकस्याः प्रकृतेर्मुक्तौ सर्वेषामपि पुरुषाणामविशेषेण स्वरूपावस्थानादेकमुक्तौ सर्वपुरुषमुक्तितः संसारोच्छेदः प्रसज्येत, यथा च प्रकृतिः सर्वगता तथा प्रत्येकं सर्वेऽप्यात्मानः साङ्ख्यमते सर्वगता इति यदवच्छेदेनैकं पुरुषमाश्रित्य सा मुक्ता तदवच्छेदेनान्येषामपि पुरुषाणां सद्भावात् तान् पुरुषानाश्रित्यापि सा मुक्तै, वेति "एकावच्छेदेन तस्या मुक्तिर्नान्यावच्छेदेन" इत्यस्यापि वक्तुमशक्यत्वात्-बुद्धीनां महत्तत्त्वाभिधानानां प्रति पुरुषं भिन्नानां स्वीकारात् तद्बुद्ध्यवच्छेदेन मुक्तत्वं नान्यावच्छेदेनेत्यपि क्षीणाया बुद्धेरनवच्छेदकत्वादनुद्घोष्यम्, किञ्चैवमुपगमे यद्बुद्धियोगेन यस्य पुरुषस्य संसारस्तद्बुद्ध्युपगमे तस्य मोक्ष इत्यस्यागतत्वात् पुरुषस्यैव मोक्षप्रसङ्गाच्च ॥ ३५ ॥ २२८ ॥

परमते दोषान्तरमपि दर्शयति—

**मोक्षः प्रकृत्ययोगो, यदतोऽस्याः स कथं भवेत् ? ।**
**स्वरूपविगमापत्तेस्तथा तन्त्रविरोधतः ॥ ३६ ॥ २२९ ॥**

**मोक्ष** इति। **यत्** यस्माद्धेतोः, साङ्ख्यमते **प्रकृत्ययोगः** प्रकृतिसम्बन्धाभावः, **मोक्षः** सम्मतः "प्रकृतिवियोगो मोक्षः" इति वचनात्, **अतः** अस्मात् कारणात्, **अस्याः** प्रकृतेः, **स** मोक्षः, **कथं भवेत्**? कथमपि न स्यात्, निरुक्तलक्षणमोक्षः प्रकृतेर्न सम्भवतीत्यत्र हेतुमुपदर्शयति-**स्वरूपविगमापत्तेरिति**-प्रकृतिस्वरूपनिवृत्तिप्रसङ्गात्, प्रकृतेर्नित्यायाः सर्वदा भावे स्वतादात्म्यलक्षणस्य स्वसम्बन्धस्यापि भावेन तदभावलक्षणवियोगो न स्यादेवेति तदुपपत्तये यद्रूपेण प्रकृतिः पूर्वमासीत् तद्रूपं विहाय रूपान्तरेण सा तदानीं जातेति यदि स्वीक्रियेत एवं सति स्वरूपविगमापत्तिरवश्यम्भाविनीति, पुरुषस्य मोक्षाभ्युपगमे तु तत्र प्रकृतिव्यापारनिवृत्तिद्वारा प्रकृतिसम्बन्धनिवृत्तिर्युज्येतापि, स्वस्मिन् स्वनिवृत्तिस्तु घटादावपि न दृश्यते, स्वतादात्म्यमेव स्वस्मिन् सम्बन्धः, तदभावः स्वभावे सत्येव स्यादिति न तस्य तत्र सम्भवः, स्वस्मिन् स्वस्य सम्बन्धान्तरं तु प्रसक्तमेवेति न तस्य निषेधोऽप्रसक्तस्याप्रतिषेधात्, **तथा** एवं, **तन्त्रविरोधतः** स्वदर्शनविरोधतः प्रकृतेर्मोक्षो न संभवतीति ॥ ३६ ॥ २२९ ॥

तन्त्रविरोधमेवोपदर्शयन्नाह—

**पञ्चविंशतितत्त्वज्ञो, यत्र कुत्राश्रमे रतः।**
**जटी मुण्डी शिखी वाऽपि, मुच्यते नात्र संशयः ॥३७॥२३०॥**

**पञ्चविंशतितत्त्वज्ञ** इति-साङ्ख्यदर्शनाभिमतप्रकृतिमहदादिपञ्चविंशतितत्त्वरहस्यवेत्तेत्यर्थः, **यत्र तत्र** यस्मिन् कस्मिन्नपि, **आश्रमे** ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाश्रमे, **रतः** तत्त्वज्ञानैकाभ्यसनशीलः, **जटी** जटावान्, ब्रह्मचारीति यावत्, अनेन ब्रह्मचर्याश्रमस्थितो दर्शितः, **मुण्डी** मुण्डितशिराः, अनेन संन्यासाश्रमस्थितो दर्शितः, **शिखी वाऽपि** अनेन वानप्रस्थ-गार्हस्थ्याश्रमिणोरुपदर्शनम्, **मुच्यते** प्रकृति-विकारोपधानविलयेन केवलचैतन्यस्वरूपावस्थितो भवति, जटीत्यादिना बाह्यलिङ्गं न मुक्तौ कारणमिति भावितम्, **नात्र संशयः** यत्र तत्राश्रमरतोऽपि पञ्चविंशतितत्त्वज्ञो मुक्तो भवत्येव वचनप्रामाण्यात् ॥ ३७ ॥ २३० ॥

एतावता कथं स्वसिद्धान्तविरोधः साङ्ख्यस्येत्यपेक्षायां निगमयति—

**पुरुषस्योदिता मुक्तिरिति तन्त्रे चिरन्तनैः।**
**इत्थं न घटते चेयमिति सर्वमयुक्तिमत् ॥ ३८ ॥ २३१ ॥**

**पुरुषस्येति**, **इति** उक्तस्वरूपे, **तन्त्रे** साङ्ख्यदर्शने, **चिरन्तनैः** प्राचीनैः,

साङ्ख्याचार्यैः, **पुरुषस्य** आत्मनः, **मुक्तिः** बन्धनिवृत्तिलक्षणा, **उदिता** कथिता, **न च** नैव, **इयं** मुक्तिः, **इत्थम्**, उपदर्शितप्रकारेण विचार्यमाणा सती, **घटते** युज्यते, **इति** एतस्मात् कारणात्, **सर्वं** साङ्ख्योक्तमखिलम्, **अयुक्तिमत्** युक्तिविकलम् ;

उदयनाचार्यैस्तु साङ्ख्यप्रक्रियेत्थमपाकृता-तथाहि —

"कर्तृधर्मा नियन्तारश्चेतिता च स एव नः ।
अन्यथाऽनपवर्गः स्यादसंसारोऽथवा ध्रुवः" ॥ १ ॥

कृतिसामानाधिकरण्यव्यवस्थितास्तावद्धर्मादयो नियामका इति व्यवस्थितम्, चेतनोऽपि कर्तैव, कृति-चैतन्ययोः सामानाधिकरण्येनानुभवात्, नायं भ्रमो बाधकाभावात्; परिणामित्वाद् घटवदिति बाधकमिति चेत्? न कर्तृत्वेऽपि समानत्वात्, तथा च कृतिरपि स्वाभाविकी महतो न स्यात्, दृष्टत्वादयमदोष इति चेत्? तुल्यम्; अचेतनकार्यत्वं बाधकं, कार्य-कारणयोस्तादात्म्यादिति चेत्?, न–असिद्धेः, नहि कर्तुः कार्यत्वे प्रमाणमस्ति, प्रत्युत "वीतरागजन्मादर्शनात्" इति न्यायादनादितैव सिद्ध्यति, यद्यच्च कार्ये रूपं दृश्यते तस्य तस्य कारणात्मकत्वे रागादयोऽपि प्रकृतौ स्वीकर्तव्याः स्युः, तथा च सैव बुद्धिर्न प्रकृतिः, भावाष्टकसम्पन्नत्वात्, स्थूलतामपहाय सूक्ष्मतया ते तत्र सन्तीति चेत्? चैतन्यमपि तथा भविष्यति, तथाप्यसिद्धो हेतुः, तथा सति घटादीनामपि चैतन्यप्रसङ्गस्तादात्म्यादिति चेत्? रागादिमत्त्वप्रसङ्गोऽपि दुर्वारः, सौक्ष्म्यं च समानमिति, तस्मात् यज्जातीयात् कारणाद् यज्जातीयं कार्यं दृश्यते तथाभूतात् तथाभूतमात्रमनुमातव्यं, न तु यावद्धर्मकं कारणं तावद्धर्मकं कार्यं, व्यभिचारादिति किमनेनाप्रस्तुतेन?; यदि च बुद्धिर्नित्या, [तदा] अनिर्मोक्षप्रसङ्गः, पुंसः सर्वदा सोपाधित्वे स्वरूपेणानवस्थानात्; अथ विलीयते ततो नावादेर्विलय इत्यादिमत्त्वे तदनुत्पत्तिदशायां को नियन्ता?, प्रकृतेः साधारण्यात्, तथा चासंसारः, पूर्वपूर्ववासनानुवृत्तेः, साधारण्येऽप्यसाधारणीति चेत्? बुद्धिनिवृत्तावपि तद्धर्मवासनानुवृत्तिरित्यपदर्शनम्, सौक्ष्म्यान्न दोष इति चेत्? मुक्तावपि पुनः प्रवृत्तिप्रसङ्गः निरधिकारत्वान्नैवमिति चेत्? तर्हि साधिकारा प्रसुप्तस्वभावा बुद्धिरेव प्रकृतिरस्तु, कृतमन्तरा प्रकृत्यहङ्कारमनःशब्दानामर्थान्तरकल्पनया, सैव हि तत्तद्व्यवहारगोचरा तेन तेन शब्देन व्यपदिश्यते शरीरवायुवदित्यागमोऽपि सङ्गच्छते इत्यतोऽपि हेतुरसिद्धः, अधिकारनिवृत्त्या बुद्धेरप्रवृत्तिरपवर्गः, वासनायोगाच्चाधिकारः, ततः संसारः धर्म-धर्मिणोरत्यन्तभेदे च कौटस्थ्याविरोधः, भेदश्च

विरुद्धधर्माध्यासलक्षणः, घटपटादिवत् प्रत्यक्षसिद्धः, न च सामानाधिकरण्यादभेदः तद्धि समानशब्दवाच्यत्वम्, एकज्ञानगोचरत्वम्, एकाधिकरणक आधाराधेयभावः, विशेष्यत्वं सम्बन्धमात्रं वा, भेद एव भेदेऽपि चोपपद्यमानं नाभेदं स्पृशतीति सर्वमवदातम्" इति ॥ ३८ ॥ २३१ ॥

प्रकृतिः कर्म सुखदुःखादिकारणत्वात्, तेन बद्ध आत्मा सुखदुःखादिकं भुङ्क्ते, तद्वियुतस्तु मुक्तो भवतीत्येवं यावदुपपन्नं साङ्ख्यवादे तावतस्तत्त्ववार्तामाह—

**अत्रापि पुरुषस्यान्ये, मुक्तिमिच्छन्ति वादिनः ।**
**प्रकृतिं चापि सन्न्यायात्, कर्मप्रकृतिमेव हि ॥ ३९ ॥२३२॥**

**अत्राऽपीति**—साङ्ख्यवादेऽपीत्यर्थः, **अन्ये वादिनः** जैनाः, **पुरुषस्य** आत्मनः, **मुक्तिं** प्रकृतिवियोगस्वरूपां मुक्तिं, **इच्छन्ति** स्वीकुर्वन्ति, **प्रकृतिं चापि** न केवलं पुरुषस्य मुक्तिमेव किन्तु प्रकृतिमपि, **सन्न्यायात्** सत्तर्कात्, **हि** निश्चितम्, **कर्मप्रकृतिमेव** कर्मस्वरूपां प्रकृतिमेव, इच्छन्तीति सम्बन्धः, बुद्ध्यहङ्कारादीनां सर्वेषां कर्मण एव निमित्तकारणत्वात्, उक्तप्रकारेण प्रकृति-पुरुषादिवादः साङ्ख्यस्य कथञ्चिद्वाद एव घटते, सर्वथा सत्कार्यवादे तु न किञ्चिदुपपद्यते, यच्च सदेव कार्यं नासदित्यत्र असदकरणादिकं हेतुपञ्चकं, तदपि विपरीतम्, यतः सतः सिद्धत्वेन कारणासम्भवात्, असदकरणादित्यस्य विपरीतं सदकरणादित्येव भद्रम्, साध्यार्थितयैवोपादानग्रहणं न सिद्धार्थितयेत्युपादानग्रहणात् सत्कार्यमित्यस्य विपरीतम्—उपादानग्रहणादसत्कार्यमित्येव युक्तम्; नियतादेव क्षीरादेः सामग्र्या दध्यादिदर्शनात् सर्वसम्भवाभावादप्यसत्कार्यमेव युज्यते, सर्वथा सच्च सिद्धत्वात् कर्तुमशक्यत्वेन शक्तिव्यापाराविषयत्वादसत एव कर्तुं शक्यत्वे शक्तिव्यापारविषयत्वमिति शक्तस्य शक्यकरणादित्यप्यसत एव कार्यत्वं व्यवस्थापयति, कार्य-कारणयोः सर्वथा तादात्म्ये नहि स्वमेव स्वस्मात् पूर्वमपरं च सम्भवतीति पौर्वापर्याभावात् तन्नियतकार्यकारणभावोऽपि न सम्भवतीति कार्य-कारणयोः कथञ्चिद् भेद एव कार्य-कारणभाव इति कारणभावादप्यसत्कार्यमेव; यदि कारणव्यापारात् प्रागपि पटस्तन्तुषु सन्नेव तदा किमित्युपलब्धिकारणेषु सत्सु सत्यामपि जिज्ञासायां नोपलभ्यते?; अनाविर्भावादिति चेत्? कोऽयमनाविर्भावः? उपलब्धेरभावश्चेत्? उपलब्ध्यभावादुपलब्ध्यभावं इति कथं स्वस्थो ब्रूयात्; अथोपलब्धियोग्यस्यार्थक्रियाकारिरूपस्याभावोऽनाविर्भाव इति चेत्? तथा सति सिद्धोऽसत्कार्यवादः, अर्थक्रियाकारिरूपस्य प्रागसत एव पश्चाद्भावात्; विजातीयसंयोगस्य तदवच्छेदेन

सन्निकर्षस्य वा व्यञ्जकस्याभावान्न प्रागुलब्धिरिति चेत्? तथा सति प्रागसतो विजातीयसंयोगस्येन्द्रियसन्निकर्षस्य वोत्तरकालं भावादसत्कार्यवाद आपतत्येव प्राक् सन्नेव व्यञ्जक आविर्भूत इति चेत्? न-आविर्भावस्य पूर्वं सत्त्वे आविर्भूतस्य संयोगस्य संनिकर्षस्य वा व्यञ्जकस्य सद्भावादुपलब्धिप्रसङ्गस्य तादवस्थ्यात्, आविर्भावस्य प्रागसत्त्वे च तस्यैव प्रागसतः उत्तरकाले भावादसत्कार्यवादोऽनिवार्य इति; स्थूलरूपावच्छिन्नस्य प्रागसत्त्वान्नोपलब्धिः, धर्म-धर्मिणोश्च सौक्ष्म्य-स्थौल्ययोश्चैकत्वान्नानवस्थेति चेत्? तर्हि सूक्ष्मरूपावच्छिन्नस्याहेतुकत्वेऽतिप्रसङ्गः, प्रकृतिमात्रहेतुकत्वे च स्थूलतादशायामपि तदापत्तिः, तत्सम्बन्धाच्चात्मनो मोक्षो न कदापि भवेत्, तस्मादनन्तधर्मात्मकस्यैव वस्तुनः कथञ्चित् सत्त्वमसत्त्वं चोपपत्तिमत्, तथा च बुद्धि-सुख-दुःखादीनामहन्त्वसामानाधिकरण्येनानुव्यवसीयमानत्वात् तद्धर्मतया तत्रैव समन्वयः कर्मप्रकृतिस्तु तत्र निमित्तमात्रमिति प्रतिपत्तव्यमित्येत्रमुपाध्याया व्यावर्णयाञ्चक्रुः ॥ ३९ ॥ २३२ ॥

एवमनेकान्तवाद्यभ्युपगतायां कर्मप्रकृतौ न साङ्ख्यपक्षोक्त दोष इत्याह—

**तस्याश्चानेकरूपत्वात्, परिणामित्वयोगतः ।**
**आत्मनो बन्धनत्वाच्च, नोक्तदोषसमुद्भवः ॥ ४० ॥ २३३ ॥**

**तस्याश्चेति**—कर्मप्रकृतेः पुनरित्यर्थः, **अनेकरूपत्वात्** एकानेकस्वरूपत्वात्, चित्रत्वादिति यावत्, **परिणामित्वयोगतः** ज्ञानावरणादिविपाकपरिणामशालित्वात्, ततश्चानेककार्यजनकत्वसम्भवात्, सर्वथैकस्वरूपत्व एव विचित्रकार्यजनकत्वानुपपत्तिः, **आत्मनः** पुरुषस्य, **बन्धनत्वाच्च** च-पुनः, अन्योऽन्यानुप्रवेशेन स्वरूपतिरोधायकत्वात्, कर्मणो बन्धनरूपेण आत्मनो बध्यस्वरूपेण परिणमनतः कर्मण आत्मस्वरूपतिरोधायकत्वोपपत्तेः, **नोक्तदोषसमुद्भवः** साङ्ख्यपक्षोपदर्शितानिर्मोक्षापत्त्यादिदोषस्य न समुद्भवोऽवकाशः, मोक्षदशायां कर्मणः पूर्वबन्धनपरिणतिभिन्नपरिणतिरूपत्वात्, आत्मनश्च पूर्वबध्यपरिणतिभिन्नपरिणतिरूपत्वादित्येवं भेदात् ॥ ४० ॥ २३३ ॥

आत्मनो बन्धादि न सङ्गतमित्यस्य व्यवस्थापनपरं परमतमुपदर्शयति—

**नामूर्तं मूर्ततां याति, मूर्तं नायात्यमूर्तताम् ।**
**यतो बन्धाद् यतो न्यायादात्मनोऽसङ्गतं तया ॥४१॥२३४॥**

**नामूर्तमिति**—अमूर्तं रूपादिमत्त्वरहितम्, **मूर्ततां** रूपादिमत्परिणतिं,

**न याति** नैवाश्रयति, आकाशादेरमूर्तस्य रूपादिमत्परिणतेः कदाप्यदर्शनात्, **एवं मूर्तं** रूपादिमत्, **अमूर्ततां** रूपादिरहितपरिणतिरूपताम्, **न** नैव, **आयाति** प्राप्नोति, अत्र न यातीति पाठो हरिभद्रसूरिसम्मतः, परमाण्वादिषु मूर्तेषु अमूर्तपरिणतिभावासिद्धेः, **यतः** यस्मात् कारणादेवंस्वरूपविपरिणामो न भवति, **अतः** अस्मात्, **न्यायात्** नियमात्, **आत्मनः** पुरुषस्य रूपादिरहितस्वरूपस्य, **बन्धादि** ज्ञानावरणादिपरिपाकलक्षणकर्मपरिणतिसम्बन्धादि, **तया** कर्मलक्षणप्रकृत्या, **असङ्गतं** अघटमानम् ॥ ४१ ॥ २३४ ॥

अत्रोत्तरमुपदर्शयति—

**देहस्पर्शादिसंवित्त्या, न यात्येवेत्ययुक्तिमत् ।**
**अन्योऽन्यव्याप्तिजा चेयमिति बन्धादि सङ्गतम् ॥४२॥२३५॥**

**देहस्पर्शादिसंवित्त्येति**—देहे स्पर्शः—कण्टकादिसंयोगः, अनेन उपघातहेतूपनिपातान्युपलक्षितानि, आदिपदेनानुग्रहहेतूपनिपातपरिग्रहः, तेषां संवित्त्या—तज्जनितसुखदुःखाद्यनुभवेनेत्यर्थः, अमूर्तं मूर्ततां यातीति प्राक्तनानुषङ्गः, यतश्चामूर्तमपि मूर्ततां याति ततः, **न यात्येव** "अमूर्तं मूर्तताम्" इत्यनुषङ्गप्राप्तस्यात्रापि सम्बन्धः, तथा च देहस्य सुखदुःखादिमत्त्वं तदनुभवश्च नास्ति, भवति च तथाऽनुभवोऽतोऽन्योऽन्यानुप्रवेशलक्षणसम्बन्धात् कथञ्चिद् देहादिरूप आत्मा देहस्पर्शादिना सुखदुःखादिमान् भवति तदनुभववांश्च भवति, अनयैव चामूर्तस्यात्मनः कथञ्चिन्मूर्तत्वप्राप्तिसङ्गतत्वसाधिकयाऽमूर्तं मूर्ततां न यात्येव, **इति** एतत्, **अयुक्तिमत्** अनुभवबाधितम्, यथा च घटादिसंवित्तिरात्मनो घटादिमयत्वाभावेऽप्युपपद्यते तथा देहस्पर्शादिसंवित्तिर्देहादिमयत्वाभावेऽप्युपपत्स्यते, नातोऽमूर्तस्यात्मनो रूपादिमत्परिणत्याश्रयणेन कृत्यमित्यत आह—**अन्योऽन्यव्याप्तिजेति**—शरीरात्मनोरन्योऽन्यानुप्रवेशजन्यजात्यन्तरतापत्तिप्रभवेत्यर्थः, **इयं च** देहस्पर्शादिसंवित्तिश्च, यथा च गुड-शुण्ठीद्रव्ययोरन्योऽन्यविलक्षणसंसर्गलक्षणान्योऽन्यव्याप्तिप्रयुक्तजात्यन्तरतापत्तिप्रभवा, कफ-पित्तविकारापहारकत्वं प्रत्येकमेकैकस्य कफ-पित्तविकारकारकत्वेऽपि तथा केवलस्य शरीरस्य, केवलस्य चात्मनः सुख-दुःखानुभूत्यभावेऽपि अन्योऽन्यानुप्रवेशप्रभवजात्यन्तरतामापन्नयोः शरीरात्मनोर्मूर्तामूर्तस्वभावसंवलितयोः सुख-दुःखानुभूतिर्युज्यत इति यत एव क्षीर-नीरयोरिव प्रत्यवयवं शरीरस्यात्मनः प्रदेशानामनुस्यूतत्वेन सुख-दुःखानुभवस्यानुग्रहहेतूपनिपातोपघातहेतूपनिपाततो दर्शनात्, अन्योऽन्यानुप्रवेशतो जात्यन्तरतामापन्नस्यैव

सुखदुःखानुभवितृत्वमिति युज्यतेऽपि शरीरावयवात्मप्रदेशानामन्योऽन्यानुप्रवेशतो जात्यन्तरत्वादेव तयोरविभागोऽनुभूयते, जात्यन्तरमापन्न एव नरत्वादिकं वर्तते, नरत्वादेः शरीरात्मकभूतमात्रवृत्तित्वे केवलात्मवृत्तित्वे वाऽतिप्रसङ्गात्, जातीनां व्यासज्यवृत्तित्वस्य परसिद्धान्तविषयीभूतस्याभ्युपगमोऽपसिद्धान्तभयादेव कर्तुं न शक्यते यावदाश्रयप्रत्यक्षे सत्येव व्यासज्यवृत्तिप्रत्यक्षमिति नरत्वादेर्व्यासज्यवृत्तित्वे एकाश्रयत्वेन तदनुभवो न भवेत्, शरीराप्रत्यक्षेऽप्यन्धकारे नरत्वप्रतीतिरनुपपन्ना स्यात्, तदिदमुक्तं सम्मतिकृता—

"अण्णोण्णाणुगयाणं, इमं च तं वत्ति विभयणमजुत्तं।
जह दुद्ध-पाणियाणं, जावंता विसेसपज्जाय" ॥ १ ॥

इति [ सम्मति गाथा-४७ ]

[ "अन्योऽन्यानुगतयोरिदं वा तद्वेति विभजनमयुक्तम्।
तथा दुग्धपानीययोर्यावन्तो विशेषपर्यायाः ॥" इति संस्कृतम् ]

अन्योऽन्यानुगतयोरात्मकर्मणोर्दुग्ध-पानीययोरिव यावन्तो विशेषपर्यायास्तावत्सु इदं वा तद् वा इति विभजनमयुक्तं, प्रमाणाभावात्, एवं तर्हि ज्ञानादयोऽपि देहे स्युः, रूपादयोऽप्यात्मनीति चेत्, इष्टापत्तिः, तदिदमुक्तं सम्मतिकृता-

"रूपाइपज्जवा जे, देहे जीवदवियम्मि सुद्धम्मि।
ते अण्णोण्णाणुगया, पण्णवणिज्जा भवत्थम्मि" ॥ १ ॥

इति [ सम्मतिगाथा- ४८ ]

[ "रूपादिपर्यवा ये देहे जीवद्रव्ये शुद्धे।
तेऽन्योऽन्यानुगताः प्रज्ञापनीया भवस्थे" ॥ इति संस्कृतम् ]

गौरोऽहं जानामीत्यादिधियस्तथैवोपपत्तेः, रूपादिज्ञानादीनामन्योऽन्यानुप्रवेशेन कथञ्चिदेकत्वा-ऽनेकत्व-मूर्तत्वा-ऽमूर्तत्वादिसमावेशात् अत एव दण्डात्मादीनामेकत्वम्, अनेकत्वं च स्थानाङ्गे व्यवस्थितम्, तदाह-

"एवं एगे आया, एगे दण्डे य होइ किरियाए।
करणविसेसेण य तिविह, जोगसिद्धी वि अविरुद्धा"॥ [सम्मतिगाथा-४९]

[ "एवमेक आत्मैको दण्डश्च भवति क्रियया।
करणविशेषेण च त्रिविधयोगसिद्ध्यप्यरविरुद्धा" ॥ इति संस्कृतम् ]

नन्वेवमन्तर्हर्ष-विषादाद्यनेकविवर्तमेकं चैतन्यम्, बहिर्बालकुमारयौवनाद्यने-

कावस्थात्मकमेकं शरीरमध्यक्षतः संवेद्यत इत्यस्य विरोधः, बाह्याभ्यन्तरविभागाभावादिति चेत्? सत्यम्–आत्मभिन्नत्वाऽभिन्नत्वाभ्यां तदभावेऽपि मानसत्वाऽमानसत्वाभ्यां तद्व्यपदेशात्, तदाह—

"न च बाहिरओ भावो, अब्भंतरओ अ अत्थि समयम्मि।
णोइंदियं पुण पडुच्च, होइ अब्भंतरविसेसो॥" [ सम्मतिगाथा–५० ]

[ "न च बाह्यको भावोऽभ्यन्तरकश्चास्ति समये।
नोइन्द्रियं पुनः प्रतीत्य भवत्यन्तरविशेषः" ॥ १ ॥ इति संस्कृतम् ]

सर्वस्यैव मूर्तऽमूर्तादिरूपतयाऽनेकान्तात्मकत्वात्, अयं बाह्योऽयं चाभ्यन्तर इति समये न वास्तवो विभागः, अभ्यन्तर इति व्यपदेशस्तु नोइन्द्रियं-मनः प्रतीत्य, तस्यात्मपरिणतिरूपस्य पराप्रत्यक्षत्वात्, शरीर-वाचोरिव, न च तद्वदेव तस्य परप्रत्यक्षत्वापत्तिः, इन्द्रियज्ञानस्याशेषपदार्थस्वरूपग्राहकत्वायोगात्, एवं च स्याद्वादोक्तिरेव युक्ता, न तु परस्परनिरपेक्षनयोक्तिर्विना श्रोतृधीपरिकर्मणा निमित्तम्, वस्तुनोऽनेकान्तात्मकत्वात्, तदाह—

"दव्वट्ठियस्स आया, बंधइ कम्मं फलं च वेएइ।
बिइयस्स भावमेत्तं, ण कुणइ ण य कोइ वेएइ॥
दव्वट्ठियस्स जो चेव, कुणइ सो चेव वेयए नियमा।
अण्णो करेइ अण्णो, परिभुंजइ पज्जवणयस्स॥
जे वयणिज्जविअप्पा, संजुज्जंतेसु होंति एएसु।
सा ससमयपण्णवणा, तित्थयरासायणा अण्णा॥
पुरिसज्जायं तु पडुच्च, जाणओ पण्णविज्ज अण्णयरं।
परिकम्मणानिमित्तं दाएही सो विसेसंपि" ॥
[ सम्मतिगाथा–५१, ५२, ५३, ५४. ]

["द्रव्यास्तिकस्यात्मा बध्नाति कर्मफलं च वेदयति।
द्वितीयस्य भावमात्रं न करोति न च कोऽपि वेदयति॥
द्रव्यास्तिकस्य य एव करोति स एव वेदयति नियमात्।
अन्यः करोति अन्यः परिभुङ्क्ते पर्यवनयस्य॥
ये वचनीयविकल्पाः संयुज्यमानयोर्भवन्त्येतयोः।
सा स्वसमयज्ञापना तीर्थकराशातनाऽन्या॥
पुरुषजातं तु प्रतीत्य ज्ञापकः प्रज्ञापयेदन्यतरत्।
परिकर्मणानिमित्तं दर्शयेत् सविशेषमपि" ॥ ४ ॥ इति संस्कृतम् ]

तस्माद् देहात्मनोरन्योऽन्यव्याप्तिजैव देहस्पर्शादिसंवित्तिरिति सिद्धम्, इत्येवं स्वमनीषाप्रकाशं कृतवन्त उपाध्यायाः । **इति** एतस्मात् कारणात्, **बन्धादि** बन्ध-मोक्षादिकम्, **सङ्गतम्** प्रमाणोपपन्नं कर्मप्रकृत्यात्मनोः कथञ्चिदितरेतररूपापत्तिमन्तरेण देहस्पर्शादिप्रभवसुखदुःखसंवेदनादिकार्यानुपपत्तेः ॥ ४२ ॥ २३५ ॥

मूर्तया कर्मप्रकृत्याऽमूर्तस्यात्मनः संयोगस्ततोऽनुग्रहोपघातौ चेति निदर्शनबलतो व्यवस्थापयति—

**मूर्तयाऽप्यात्मनो योगो, घटेन नभसो यथा ।**
**उपघातादिभावश्च, ज्ञानस्येव सुरादिना ॥ ४३ ॥ २३६ ॥**

**मूर्तयाऽपीति**–मूर्तयाऽपि कर्मप्रकृत्येत्यर्थः, **आत्मनो योगः** अमूर्तस्यात्मनः सम्बन्धः, सम्भवतीति शेषः, अत्र निदर्शनमाह—**घटेन नभसो यथेति**–यथा मूर्तेन घटेन सहामूर्तस्याकाशस्य संयोगो भवतीति, सर्वमूर्तगतस्याकाशस्य घटेन संयोगेऽपि न घटस्वभावताऽऽकाशस्य भवति तथा मूर्तेन कर्मणाऽऽत्मनः संयोगेऽपि न कर्मस्वभावताऽऽत्मन इति चेत्? घटा-ऽऽकाशयोर्यः संयोगः स किं घटस्वभावः, उताऽऽकाशस्वभावः? आहोस्विद् घटाकाशोभयस्वभावः? अथवाऽनुभयस्वभावः स्यात्? प्रथमपक्षे–घटस्वभावस्य तस्याकाशनिरूपितत्वं न स्यात्, द्वितीयपक्षे–आकाशस्वभावस्य तस्य घटनिरूपितत्वं न भवेत्, तृतीये–तदभिन्नाभिन्नस्य तदभिन्नत्वमिति नियमेन घटाभिन्नसंयोगाभिन्नस्याकाशस्य घटाभिन्नत्वमुररीकृतमेवेत्याकाशो घटस्वभावतां न यातीति वदतो व्याघातः स्यात्, चतुर्थे–वस्तुमात्रस्य परस्परविरुद्धस्वभावद्वयमध्यादेकस्वभावत्वाभावेऽपरस्वभावत्वमित्यस्य परस्परविरोधे हि न प्रकारान्तरास्थितिरिति वचनादावश्यकत्वेन तदभावे निःस्वभावत्वलक्षणानुपाख्यत्वापत्तिः, ततो नभसोऽपि घटसंयुक्तस्य घटस्वभावत्वं कथञ्चिदिति तद्दृष्टान्तेनात्मनोऽपि मूर्तकर्मप्रकृतिसंयुक्तस्य कथञ्चिन्मूर्तस्वभावत्वमिति । ननु घटसंयुक्तस्यापि नभसो न घटादनुग्रहोपघातौ यथा तथा कर्मप्रकृतिसंयुक्तस्यात्मनः कर्मप्रकृतितोऽनुग्रहोपघातौ नेत्यत आह—**उपघातादिभावश्चेति**–कर्मप्रकृतेः सकाशादात्मन उपघातानुग्रहसद्भावोऽपीत्यर्थः, अत्र निदर्शनं—**ज्ञानस्येव सुरादिनेति**–यथा ज्ञानस्य सुरया मादनशक्तिमत्त्योपघातो भवति ब्राह्मीघृतादिना चानुग्रहो भवति तथा कर्मप्रकृत्याऽऽत्मनोऽप्युपघाता-ऽनुग्रहौ युक्तौ, अङ्गाङ्गिभावलक्षणसम्बन्धस्य तत्प्रयोजकस्य तत्र सत्त्वात्, तदभावादेव

चाकाशे न घटेनानुग्रहोपघाताविति; न चात्मनः शरीरसमानमानत्वतोऽविभुत्वे सर्वमिदमुपपद्यते, शरीरसमानमानत्वमेव तु तस्य नाद्यापि सिद्धमिति चेत्? न–'आत्मा शरीरनियतपरिणामवान्, शरीरमात्रावच्छेदेनोपलभ्यमानज्ञानादिगुणवत्त्वात्, यो यत्र दृष्टगुणः स तन्मानकः, यथा कपालद्वयोपलभ्यमानगुणको घटः कपालद्वयमानसमानमानकः' इत्यनुमानसिद्धेन शरीरपरिमाणसमानपरिमाणवत्त्वेनात्मनोऽविभुत्वस्य सिद्धेः; नन्वपकृष्टपरिमाणवत्त्वलक्षणमूर्तत्वस्योक्तानुमानतः सिद्धौ तत्र मूर्तत्वसंशयः स स्यादिति चेत्? न–अप्रामाण्यज्ञानानास्कन्दितस्यैव तद्विशेष्यकतत्प्रकारकनिश्चयस्य तद्विशेष्यकतत्प्रकारकसंशयविरोधित्वेन निरुक्तात्मविशेष्यकमूर्तत्वप्रकारकग्रहेऽप्रामाण्यज्ञाने सति अप्रामाण्यज्ञानानास्कन्दितस्य मूर्तत्वनिश्चयस्य प्रतिबन्धकस्याभावात् तत्र मूर्तत्वसंशयस्योपपत्तेः, न च आत्मनस्तावत् महत्परिमाणवत्त्वमवश्यमभ्युपेयम्, प्रत्यक्षत्वावच्छिन्नं प्रति क्लृप्तकारणभावस्य महत्त्वस्य द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति समवायसम्बन्धेन महत्त्वं कारणमिति विशिष्य द्रव्यप्रत्यक्षत्वावच्छिन्नकारणभावस्याहं सुख्यहं दुःखीत्यादिलौकिकप्रत्यक्षविषय आत्मनि सिद्धाववयवमहत्त्वाऽवयवबहुत्वाऽवयवप्रचयान्यतमाजन्यत्वेन नित्यतया आत्मा विभुर्नित्यमहत्त्वादाकाशवदित्यनुमानात् तस्य विभुत्वमेव युक्तमिति वाच्यम्, नित्यमहत्त्वेऽप्यपकृष्टपरिमाणवत्त्वे बाधकाभावेनात्मनि नित्यमहत्त्वमस्तु विभुत्वं माऽस्त्विति व्यभिचारशङ्कानिवर्तकतर्काभावेनाप्रयोजकत्वात्; ननु गगनमहत्त्वावधिकापकर्षस्य बहुत्वजन्यतावच्छेदकतयाऽऽत्ममहत्त्वस्यापकृष्टत्वे तदाक्रान्तत्वेन जन्यत्वापत्तिरेव बाधिकेति चेत्? न–गगनमहत्त्वावधिकापकर्षस्य नित्ये परमाणुपरिणामे बहुत्वाजन्येऽपि सत्तयाऽतिप्रसक्तत्वेन बहुत्वजन्यताया अनवच्छेदकत्वात्; न च गगनमहत्त्वावधिकाऽपकर्षोऽणुपरिणामावृत्तिरेव त्र्यणुकादिपरिमाणवृत्तिर्जातिविशेषो बहुत्वजन्यताया अनतिप्रसक्तत्वादवच्छेदक इति वाच्यम्, तथाऽभ्युपगमे विनिगमनाविरहेण त्रुटिमहत्त्वावधिकोत्कर्षस्यापि गगनपरिमाणपर्यन्तमहत्त्ववृत्तितयाऽभ्युपगन्तुं शक्यत्वेन तदभाववति त्रुटिमहत्त्वे गगनमहत्त्वावधिकापकर्षस्य सत्त्वं, गगनमहत्त्वावधिकापकर्षाभाववति गगनमहत्त्वादौ त्रुटिमहत्त्वावधिकोत्कर्षस्य सत्त्वमित्येवं परस्परात्यन्ताभावसामानाधिकरण्यं, घटत्व-महत्त्वादौ च गगनमहत्त्वावधिकापकर्ष-त्रुटिमहत्त्वावधिकोत्कर्षयोरुभयोरपि सत्त्वमित्येकाधिकरण्यं चेति गगनमहत्त्वावधिकापकर्षस्य त्रुटिमहत्त्वावधिकोत्कर्षेण समं साङ्कर्येण जातिरूपस्य तस्यासिद्ध्या बहुत्वजन्यतावच्छेद-

कत्वासम्भवात्, किञ्चात्मनो महत्त्वं न सर्वथा नित्यं, प्रदीपप्रभाया इवात्मनः सङ्कोच-विकाशाभ्यां परिमाणभेदस्याभ्युपगन्तव्यत्वादिति विभुत्वसाधकतयोपन्यस्तं नित्यमहत्त्वलक्षणं लिङ्गमेवासिद्धम्; किञ्चात्मनो विभुत्वे आकाशादिवन्निष्क्रियत्वमपि तस्य, तथा च कथं तस्य स्वस्मिन् क्रियाप्रतीतिः?, क्रियायास्तत्राभावे श्रूयमाणं तत्र तीर्थगमनादिहेतुकमदृष्टं कथमुपपत्तिपद्धतिमेति? सर्वगतस्यात्मनः स्वीयत्वेनाभिमतशरीरावच्छिन्नत्वस्येवान्यशरीरावच्छिन्नत्वस्यापि सद्भावाद् घटाद्यवच्छेदेनात्मनि ज्ञानाद्युत्पत्तिवारणायावच्छेदकतासम्बन्धेन ज्ञानादिकं प्रति तादात्म्यसम्बन्धेन शरीरत्वेन शरीरस्य कारणत्वेऽपि स्वशरीर इव कारणतावच्छेदकशरीरत्वधर्माक्रान्तत्वेन शरीरान्तरेऽपि कथं न तदात्मीयज्ञानाद्युत्पत्तिः?, अवच्छेदकतया तदात्मीयज्ञानादिकं प्रति तादात्म्येन तदीयशरीरत्वेन कारणत्वेऽपि शरीरे तदीयत्वं यदि तदात्मसंयुक्तत्वं तदा विभोस्तदात्मनः संयोगो यथाऽभिमतशरीरे तथा शरीरान्तरेऽपीति तस्यापि तदात्मीयशरीरत्वरूपकारणतावच्छेदकधर्माक्रान्तत्वं स्यात्, अथ तदात्मगतादृष्टोपगृहीतत्वं तदा शरीरस्य कारणत्वं तददृष्टकारणत्वमन्तरेण न संभवतीत्युपजीव्यत्वात् तददृष्टस्यैव तज्ज्ञानादिकं प्रति कारणत्वमिति तददृष्टस्य तच्छरीरव्यापित्वेन तदात्मनोऽपि तच्छरीरव्यापित्वसिद्धौ न विभुत्वम्, तदुक्तं—"यत्रैव यो दृष्टगुणः स तत्र" [ अन्ययोगव्यवच्छेदद्वात्रिंशिका श्लो० ९ ] इत्यादि, आत्मनो विभुत्वे ज्ञानादीनामव्याप्यवृत्तित्वादिकल्पने गौरवमपीति ।

अत्र स्याद्वाद्यभ्युपगतात्माऽविभुत्ववादे श्रोतॄणां विवेकावधारणपरायणानामविचलितश्रद्धोत्पत्तये श्रीमद्भिर्यशोविजयोपाध्यायैः स्वोपज्ञन्यायखण्डखाद्यव्याख्यासनाथीकृतमहावीरस्तवप्रकरणे न्यायमतखण्डनप्रवणा युक्तय उपदर्शिता एव तद्ग्रन्थोल्लेखतः प्रकटीक्रियन्ते—

"स्वाहाभुजो ज्वलनमूर्ध्वमपि स्वभावात्,
सम्बन्धभेदकलितादथवाऽस्त्वदृष्टात् ।
दिग्देशवर्तिपरमाणुसमागमोऽपि,
तच्छक्तितो न खलु बाधकमत्र विघ्नः" ॥ ७१ ॥

आत्मनो विभुत्वाभावे नानादिग्वर्तिदहनादिषु ज्वलनादिक्रियाणां युगपददृष्टवदात्मसंयोगाभावाद् युगपदनुत्पत्तिप्रसङ्गः, आत्मगुणस्य साक्षात्क्रियाद्वारकस्वाश्रयसंयुक्तसंयोगेनैव क्रियाजनकत्वस्य प्रयत्नस्थले दृष्टत्वादिति प्राचीननैयायिकैर्यद्

बाधकमुक्तं तत् तु शिरोमणिनैव दूषितं–"जनयतु प्रयत्नो यथा तथा, अदृष्टं तु यथा कथञ्चित् परम्परया स्वाश्रयसंयोगादेव जनयति, अतिप्रसङ्गस्तु वैभवेऽपि तुल्यः" इति ग्रन्थेन; यत् तु लाघवेन स्वाश्रयसंयोगेन तज्जनकताया एव कल्पनादात्मविभुत्वसिद्धिरिति तेनोक्तं, तत् तुच्छम्–अतिप्रसङ्गवारणे लाघवसहस्रस्याप्यकिञ्चित्करत्वात्, समवायेनोर्ध्वज्वलनत्वावच्छिन्ने तादात्म्येन वह्नित्वेन हेतुत्वं कल्पयित्वाऽतिप्रसङ्गवारणे तु वृथा विशिष्यादृष्टहेतुत्वप्रत्याशा, अस्तु वा दहनत्वस्येवोर्ध्वज्वलनस्यापि स्वभावादेव देशप्रतिनियमः, तदुक्तं मल्लिषेणाचार्येण—"अथास्त्येव प्रमाणं वह्नेरूर्ध्वज्वलनं वायोस्तिर्यक् पवनं चादृष्टकारितमिति चेत्? न–तयोस्तत्स्वभावत्वादेव तत्सिद्धेः, दहनस्य दहनशक्तिवदिति, पूर्वकल्पे स्वभावादित्यस्य स्वो भावः स्वभावस्तस्माद्धेतोरित्यर्थः, द्वितीयकल्पे च स्वस्वभावः सादिपरिणामस्तस्मादित्यर्थः; न च नोदनादीनां गुणानां गुणत्वव्याप्यैकजात्या क्रियात्वावच्छिन्ने हेतुत्वादूर्ध्वज्वलनमवश्यं वह्नेरदृष्टकारितम्, अत एव तस्य गुणत्वसिद्धिरपीति वाच्यम्, गुणसाक्षात्कारजनकतावच्छेदिकया साङ्कर्येण तथाहेतुत्वासिद्धेः; यदि च तत्रादृष्टहेतुत्व एवाग्रहस्तदाऽस्तु कार्यसामान्यजनकतावच्छेदकसम्बन्धेन तत्, नहि सोऽपि स्वाश्रयसंयोग एव, आकाशगतशब्दाव्याप्तेः, अजसंयोगनिषेधेन परैरात्माकाशसंयोगस्यानभ्युपगमात्, कालाकाशदिशामिवादृष्टस्यापि कार्यसामान्यजनकतावच्छेदकसम्बन्धस्यातिरिक्तस्यैव सिद्धेः, तदिदमाह–सम्बन्धभेदकलितात्–सम्बन्धान्तरेण सम्बद्धात्, अथवाऽदृष्टादस्तु स्वाहाभुज ऊर्ध्वज्वलनमिति, एतेन —

"न ज्वलत्यनलस्तिर्यग्-यदूर्ध्वं याति नानलः ।
अचिन्त्यमहिमा तत्र, धर्म एव निबन्धनम्" ॥ १ ॥

इति हेमसूरिवचनं व्याख्यातम्; वस्तुतोऽनिला-ऽनलयोर्गतित्रसनामकर्मोदयरूपादृष्टविशेषेण साक्षादेव क्रियाजननमिति न काऽप्यनुपपत्तिः; अत एव तयोरनन्यप्रेरितगतिमत्त्वेन सचित्तत्वं गन्धहस्तिभाष्यादौ प्रसिद्धम्; न च जीवविप्रमुक्तयोस्तयोर्व्यभिचारो, यदा कदाचिज्जीववत्त्वस्य साध्यस्य विवक्षितत्वेन तदभावात्, तद्दशायां च क्रियावत्त्वं च तयोः पूर्वप्रयोगाहितवेगवशादिति दिक् ।

यदपि बाधकमुक्तं केनचित्–"आत्मनो व्यापकत्वाभावे दिग्देशान्तरवर्तिपरमाणुभिर्युगपत्संयोगाभावादाद्यकर्माभावस्तदभावादत्यन्तसंयोगस्य तन्निमित्तशरीरस्य

तेन सम्बन्धस्य चाभावादनुपायसिद्धः सर्वदा सर्वेषां मोक्षः स्यात्" इति, तदपि न युक्तम्–नहि यद् येन युक्तं तदेव तं प्रत्युपसर्पतीति नियमः संभवी, अयस्कान्तं प्रत्ययसस्तेनासंयुक्तस्याप्युपसर्पणोपलब्धेः; अथासंयुक्तस्याप्याकर्षणे तच्छरीरारम्भं प्रत्येकमुखीभूतानां त्रिभुवनोदरविवरवर्तिपरमाणूनामुपसर्पणप्रसङ्गान्न जाने तच्छरीरं कियत्प्रमाणं स्यादिति चेत् ?, संयुक्तस्याप्याकर्षणे कथं स एव दोषो न भवेत् ?, आत्मनो व्यापकत्वेन सकलपरमाणूनां तेन संयोगात्; अथ तद्भावाविशेषेऽप्यदृष्टवशाद् विवक्षितशरीरोत्पादनानुगुणा नियता एव परमाणव उपसर्पन्ति, तदितरत्रापि तुल्यम्, तदाह–दिग्देशवर्तिनामर्थानां–नानादिग्देशवर्तिनां परमाणूनां समागमोऽपि, तच्छक्तितः–अदृष्टशक्तिमहिम्नोपपद्यत इत्यत्र न खलु बाधकं विद्म इति, तावत्परिमाणतच्छरीरव्यक्तौ तथाभव्यत्वस्य दृष्टकारणानां चादृष्टजन्यतावच्छेदकजातिव्याप्यजात्यवच्छिन्न एव हेतुत्वान्नातिप्रसङ्ग इति निष्कर्षः ॥ बाधकान्तरनिराचिकीर्षयाऽऽह—

"मूर्तत्व-सावयवता-निजकार्यभाव-
च्छेद-प्ररोह-पृथगात्मकताप्रसङ्गाः ।
सर्पा इवातिविकरालदृशोऽपि हि त्व-
त्स्याद्वादगारुडसुमन्त्रभृतां न भीत्यै" ॥ ७२ ॥

आत्मनोऽव्यापकत्वे मूर्तत्वं स्यात्, तथा च सावयवं शरीरं प्रत्यवयमनुप्रविशन्नात्मा सावयवः स्यात्, एवं च निजकार्यभावः–आत्मनः कार्यता स्यात्, पटादिवत्; किञ्चात्मनः कायप्रमाणत्वे तच्छेदाच्छेदस्तत्प्ररोहाच्च प्ररोहः स्यात्, तथा खण्डितावयवानुप्रविष्टस्य पृथगात्मता स्यादित्यादयः प्रसङ्गाः, सर्पा इवातिविकरालदृशोऽपि हि तव यः स्याद्वादरूपो गारुडसुमन्त्रस्तं बिभ्रति ये तेषां भीत्यै न भवन्ति, एकान्तवादिनस्तु ततो भीताः पलायन्त एवेति गरीयान् भवतः प्रवचनमहिमेति भावः, तत्र यत् तावदुक्तं–मूर्तत्वं स्यादिति तदिष्यत एव; न चैवं मूर्तस्य मूर्तशरीरानुप्रवेशविरोधस्ततो निरात्मकमेवाखिलं शरीरं स्यादिति वाच्यम्, असर्वगतस्यापि मनसः शरीरानुप्रवेशस्य त्वयाऽभ्युपगमात्, तद्वदेवासर्वगतत्वेनात्मनो रूपादिमत्त्वलक्षणस्य मूर्तत्वस्य चापादयितुमशक्यत्वात्, तादृशमूर्तत्वोपेतस्य जलादेर्वालुकादावनुप्रवेशो न निषिध्यते, आत्मनस्तु तद्रहितस्यापि शरीरेऽसौ निषिध्यते, इति महत् साहसम्, सावयवत्व-कार्यत्वे अप्यात्मनः कथञ्चिदिष्टे एव, असङ्ख्येयप्रदेशात्मकत्वेन सावयवत्वात्, प्रदेशेष्वप्यवयवव्यवहारात्, दृशाद्य-

वच्छेदेन पटोत्पत्तिवारणायावच्छेदकतासम्बन्धेन द्रव्यत्वावच्छिन्नं प्रति तादात्म्येन हेतुतया देशत्वस्य विलक्षणस्य सिद्धेः, इत एवात्मादीनां देशितया कार्यत्वसिद्धौ तद्व्यावृत्तकार्यत्वस्य देशकार्यतावच्छेदककोटौ प्रवेशेऽप्रामणिकगौरवापत्तेः, न चात्मनः कार्यत्वे घटादिवत् प्राक्प्रसिद्धसमानजातीयावयवारभ्यत्वप्रसिद्धिः, अवयवा ह्यवयविनमारभन्ते, यथा तन्तवः पटमिति चेत्?, न—न खलु घटादावपि कार्ये प्राक्प्रसिद्धसमानजातीयकपालसंयोगारभ्यत्वं दृष्टं, कुम्भकारादिव्यापारान्वितान्मृत्पिण्डात् प्रथममेव तदुत्पत्तिप्रतीतेः, द्रव्यस्य हि पूर्वाकारपरित्यागेनोत्तराकारपरिणामः कार्यत्वं, तच्च बहिरिवान्तरप्यनुभूयत एवेत्यतोऽपि स्यात् कार्य एव; न च पटादौ स्वावयवसंयोगपूर्वककार्यत्वोपलम्भात् सर्वत्र तथाभावो युक्तः, काष्ठे लोहलेख्यत्वोपलम्भाद् वज्रेऽपि तथाभावापत्तेः, स्याद् वा स्वप्रदेशसङ्कोचविकासात्मकसंयोगनिष्ठैव तत्तच्छरीरानुप्रवेशनियामिका तत्तदात्मजनकतावच्छेदिका जातिः, पुद्गलजनकतावच्छेदिका तु द्विगुणस्निग्धरूक्षत्वनियतेति कार्यत्वेऽप्यवान्तरवैजात्यम्; न चात्मनः कार्यत्वे प्रतिसन्धानानुपपत्तिः, तत्र नित्यानित्यत्वप्रतिबन्धस्य बहुशो दर्शितत्वात्; एतेनैव 'बाल्यादिभेदेन शरीरस्येव तत्परिमाणस्यात्मनोऽपि भेदात् शरीरध्वंसे तद्ध्वंसात् परलोकाभावः' इत्यप्यपास्तम्, तच्छरीरसन्तानोपहितपर्यायसमनियतत्वाभावात् तदात्मपर्यायमहासन्तानस्य; न च तद्द्रव्यत्वेनानित्यत्वसाधकमपि तस्य किञ्चिदस्ति, छेदप्ररोहावप्यात्मनः कायच्छेद-प्ररोहयोः कथञ्चिदिष्टावेव, अन्योऽन्यानुस्यूतप्रदेशत्वात्, इयाँस्तु विशेषः-छिन्नशरीरावयवप्ररोहस्तज्जातीयोत्पत्तिः, आत्मप्रदेशप्ररोहश्च तत्रानुप्रवेशः, एवं छेदोऽपि शरीरस्य छिन्नावयवत्वेनोत्पत्तिः, कथञ्चिदात्मच्छेदश्च शरीरसम्बद्धात्मप्रदेशानां कतिपयानां छिन्नावयवानुप्रवेश इति, यदि च नैवं स्वीक्रियते तदा शरीरात् पृथग्भूतावयवस्य कम्पोपलब्धिर्न स्यात्, पद्मनालतन्तुवदवच्छेदस्यापि स्वीकारात्, एकान्तेन छेदानभ्युपगमात्, उभयावयववृत्त्यात्मप्रदेशानां पश्चात् सङ्घटनोपपत्तिः, आकृष्यमाणप्रदेशत्वाच्चास्य मूर्तत्वं स्पष्टमेव, अत एव न छिन्नावयानामात्मप्रदेशानुप्रवेशेन पृथगात्मकताप्रसङ्गः, प्रविभक्तप्रदेशत्वस्यैव पृथक्त्वलक्षणत्वात्; न चात्रात्मप्रदेशाः प्रविभक्ताः, शृङ्खलावयवन्यायेन परस्पराजहद्वृत्तित्वात्, अवस्थाभेदेनावस्थावद् भेदस्तु नात्यन्तभेदनियतः, उत्फणविफणावस्थसर्पवदिति न किञ्चिदेतत्।

तस्मान्नोक्तदोषोपनिपातोऽव्यापकत्ववादे, प्रत्युत व्यापकत्ववाद एव तद्दुर्वारतेत्यभिप्रायवान् आह—

"स्युर्वैभवे जननमृत्युशतानि जन्म-
न्येकत्र पाटितशतावयवप्रसङ्गात् ।
चित्तान्तरोपगमतो बहुकार्यहेतु-
भावोपलोपजनितं च भयं परेषाम् ॥ ७३ ॥
प्रत्यंशमेव बहुभोगसमर्थने तु,
स्यात् सङ्करः पृथगदृष्टगवृत्तिलाभे ।
मानं तु मृग्यमियतैव हृतश्च काय-
व्यूहोऽपि योगिषु तवागमिकैः परेषाम् ॥ ७४ ॥
नात्मा क्रियामुपगतो यदि काययोगः,
प्रागेव को न खलु हेतुरदृष्टमेव ।
आद्ये क्षणेऽभ्यवहृतिः किल कार्मणेन,
मिश्रात् ततोऽनु तनुसर्गमिति त्वमोघम् ॥ ७५ ॥
वीर्यं त्वया सकरणं गदितं किलात्म-
न्यालम्बनग्रहणसत्परिणामशालि ।
तेनास्य सक्रियतया निखिलोपपत्ति-
स्त्वद्द्वेषिणामवितथौ न तु बन्ध-मोक्षौ ॥ ७६ ॥

वैभवे—आत्मनो विभुत्वेऽभ्युपगम्यमाने, एकत्र जन्मनि—एकजन्ममध्ये, पाटितानां—शतधा छिन्नानां गृहगोधिकादीनां, शतावयवेषु युगपत्कम्पोपलम्भेन तदनुमेयदुःखोपभोगार्थं चित्तान्तरप्रवेशोपगमतो भोगायतनत्वस्य प्रसङ्गात्, भोगायतनशतसम्बन्धाच्छतं जन्मनि तावदवच्छिन्नस्मृत्यजनकमनःसंयोगविगमात् तावन्ति मरणानि च स्युः, एवं च तद्वदेव क्रमिकनानाजन्ममरणोपभोग्यकर्मणामेकजन्मपरिसमाप्यत्वसम्भावनया वैराग्यव्याघातः शास्त्रानाश्वासप्रसङ्गश्च । किञ्चैवं बहुकार्यहेतुभावोपलोपजनितमपि भयं परेषामुपतिष्ठत एव, तथाहि—तज्जन्मोपभोग्यतदात्मवृत्तिभोगत्वावच्छिन्ने तच्छरीरत्वेन हेतुताऽपि न व्यवस्थिता, छिन्नावयवानां द्रव्यान्तरत्वात्, एवं तच्छरीरप्राणमनोयोगत्वादिनाऽपि, उक्तस्थले व्यभिचारात्; न च तच्छरीरारम्भकपरमाण्वारब्धत्वादिना हेतुत्वान्न व्यभिचार इति वाच्यम्, मनसि तथा वक्तुमशक्यत्वात्, तस्य परैर्नित्याणुत्वाभ्युपगमात्; न च छिन्नाच्छिन्नावयवानुप्रविष्टेषु मनस्स्वेकं वैजात्यमस्ति, छिन्नावयवविनिर्गतनानामनोयोगादच्छिन्नावयवे भूतावेशप्रवेशप्रसङ्गात्; न च भिन्नभिन्नभोगायतनावच्छेदेनैव

विजातीयमनसां भोगविशेषहेतुत्वान्नानुपपत्तिरिति वाच्यम्, विशिष्य गुरुतरकार्यकारणभावकल्पनं विना तथास्वाभाव्यानिर्वाहात्, तत्कल्पने च महागौरवमिति ॥

अथ प्रत्यंशं–प्रत्यवयवं, छिन्नाच्छिन्ननानावयवस्थलेऽवच्छेदकान्तरसंवलितावच्छेदकसमाजमहिम्ना नानारूपवदवयवारब्धेऽवयविनि नानारूपवन्नानाभोगा आत्मनि समर्थ्यन्ते, अवच्छेदकभेदेन विरोधपरिहारात्; अवच्छेदकान्तरसंवलनं च स्वविजातीयत्वे सति सम्बन्धविशेषेण स्वाश्रयाश्रिताश्रयत्वप्रत्यासत्त्या सामानाधिकरण्यं, तेन नैकावच्छेदेन नानाभोगापत्तिरिति चेत्?, न–अहं शरीरी मयि शरीरमिति प्रतीत्याऽऽत्मनः शरीराश्रयत्वेऽपि तव मते शरीरस्य तदनाश्रयत्वात्, स्वाश्रयाश्रितत्वस्थाने स्वसम्बद्धसम्बन्धित्वदाने चैकत्र प्रत्यवयवं नानाभोगसङ्करस्य दुर्वारत्वात्, मिथोविजातीयानां करचरणादीनां मिथःसंवलितत्वात्, संवलघटकस्य वैजात्यस्य शरीरतदवयवान्यतरत्वव्याप्यजात्यपेक्षयैव ग्रहणात्, अन्यथाऽसम्भवात्; अथ नानाविषयावच्छिन्नसमूहालम्बनज्ञानमिवैकत्र शरीरे नानावयवावच्छेदेनोत्पद्यमानोऽपि भोगोऽविरोधादेक एव, एकादृष्टजन्यत्वात्, पृथग्भोगायतनजन्याः पुनर्नानैव भोगाः, एकत्र समावेशस्तेषामवच्छेदभेदाच्चित्रावयविनीव नीलादीनाम्; न च सद्व्यापारदानादिसत्त्वेऽपि मनुष्यशरीरसत्त्वे देवशरीरानुत्पादानुत्पादादेकभोगायतनस्य भोगायतनान्तरप्रतिबन्धकत्वान्नैवमिति वाच्यम्, तद्वृत्तिलाभकालापेक्षतददृष्टस्य देवादिशरीरहेतुत्वेनोक्तप्रतिबन्धकत्वकल्पने मानाभावादिति चेत्?, न–तथाऽपि विपक्षोदयप्रकृतीनां विरुद्धवृत्तिलाभकालत्वेन युगपन्नानाभोगायतनजन्यभोगासम्भवात्, अन्यथा मनुष्यशरीरसत्त्व एव कुतो न देवशरीरजनकादृष्टवृत्तिलाभ इत्यस्य प्रष्टव्यत्वापत्तेः; मनुष्यस्यापि सत इष्टेन पूर्तेनेत्यादिवचनाद् दिव्योपभोग इष्यत एवेति चेत्?, न–तद्वचनस्यौपचारिकत्वात्, नानादानादिक्रियोत्पन्नकालिकापूर्वजनितपरमापूर्वफलोपभोगस्य देवशरीरं विनाऽसम्भवात्; अथ भवधारणीयशरीरैक्ये आन्तरालिकभोगायतनभेदेऽपि छिन्नावयवस्थले न भोगभेदानुपपत्तिर्न वा भवभेदापत्तिः, भवतामौदारिकशरीरवतां वैक्रियलब्धिमतां वैक्रियोत्पादकाल इवेति चेत्?, न–विरुद्धभोगजनकानां तावददृष्टानां युगपल्लब्धवृत्तिकत्वे प्रमाणस्य मृग्यत्वात्, भवधारणीयैक्ये भवैक्यं तदैक्ये च तदैक्यमित्यन्योन्याश्रयाच्च, अस्माकं तु गतिजात्यादिनिधत्तायुःकर्मविपाकोदयजनितमनुष्यादिपर्यायात्मकभेदस्य स्वाविष्वग्भूतभोगायतनतया भोगावच्छेदासाङ्कर्यस्य च नानुपपत्तिरात्मनोऽव्यापकत्ववादे, इयतैव तवागमिकैः–त्वत्सिद्धान्तवेदिभिः, परेषां–

नैयायिकानां, योगिषु कायव्यूहोऽपि–कायव्यूहाभ्युपगमोऽपि निरस्तः, नहि परिच्छिन्नस्यात्मनो देहान्तरसञ्चारो जन्मपदार्थः, परैरिष्यते, किन्त्ववस्थितस्यैव देहान्तरसम्बन्धः, तथा च योगिनामेकदा नानाकर्मफलोपभोगाय तुरङ्ग-कुरङ्ग-विहङ्ग-मतङ्गज-शम्बर-घूक-किरात-शृगाल-बिडालादिशरीरपरिग्रहाभ्युपगमे एकत्र भवे भवसहस्रसङ्करस्य दुर्वारत्वात्, किञ्चैवं नरकादिदुःखजनकब्रह्महत्यादिप्रयोजकादृष्टसत्त्वे योगिनां नारकब्रह्मघातकशरीरपरिग्रहोऽपि स्यादिति महद् वैशसम्; तादृशादृष्टविरह एव तत्त्वज्ञानोत्पत्तिरिति चेत्?, शूकरादिशरीरोत्पादकादृष्टासत्त्व एव तत्त्वज्ञानोत्पत्तिरित्यपि किमिति न रोचयेः। तत्त्वज्ञानजन्यशूकरादिवैलक्षण्यान्नायं दोष इति चेत्?, तर्हि तत्त्वज्ञानादृष्टजन्यतावच्छेदिकयोः साङ्कर्यम्, कथं च तत्त्वज्ञानेन कायव्यूहजननेऽप्यनन्तकालपरिसमाप्यक्रमिकशूकरादिशरीरोपभोग्यनानाफलजननम्, कथं च तद् विना शूकरादिशरीरोपभोग्यचरमफलं विनाऽदृष्टनाशः? कथं च तमन्तरेण मोक्षोत्पत्तिरिति विचारणीयमायुष्मता; शूकरादिशरीररोपभोगमप्यदृष्टफलं योगिनां स्वायुर्निमित्तमेव तत् कल्प्यत इति चेत्?, तर्हि लाघवात् तदनुपभोग्यमेव, तच्च भवोपग्राह्यादृष्टचतुष्टयाख्यम्, तत्राप्यनुभवः कर्मत्रयस्याधिकस्थितिकत्वे तत्समीकरणार्थं भगवतः केवलिसमुद्घातारम्भः, आयुस्तु कर्मत्रयादधिकस्थितिकं स्वभावादेव न भवति, केवलिसमुद्घात एव च परेषां कायव्यूहभ्रमः, तदालम्बनेनैव चेश्वरस्य सर्वावेशप्रतिपादिका श्रुतिरिति युक्तं पश्यामः॥

तथा आत्मा यदि न क्रियामुपगतोऽक्रिय एवेत्यर्थः, तदा प्रागेव–शरीरोत्पत्तेरादावेव, काययोगः–कायोत्पत्त्यनुकूलः प्रयत्नः, को न–कश्चिदेव, तच्छरीरजन्यस्य तदात्मविशेषगुणस्य तदभावेऽभावात्, तथा चादृष्टाकृष्टानामपि परमाणूनामाहारतया ग्रहणस्य शरीरतया परिणमनस्य चाभावे आदित एव शरीरानुत्पत्तौ संसारोच्छेदः, न च शरीरोत्पत्तावदृष्टमेव हेतुर्न तु यत्न इति वाच्यम्, शरीरोत्पत्त्यनन्तरमप्याहारादिपरिणामस्य श्वासप्रश्वासादिसन्तानस्य च तत एवोत्पत्तौ जीवनयोनियत्नोच्छेदापत्तेः, तथा च स्वापादौ शरीरेऽपि प्रयत्नासमवायिकारणकक्रियाऽभावान्निश्चेष्टत्वं स्यात्, अदृष्टजन्यक्रिया च वह्न्यूर्ध्वज्वलनादिनाऽतिप्रसङ्गिनी, सम्बन्धविशेषस्त्वदृष्टस्य कायेन सहान्योऽन्यानुगमाख्यः पुद्गलात्मकत्व एव घटते, बन्धननामकर्मप्रयुक्तत्वात्; प्रवृत्तिरूपोऽपि प्रयत्न आत्मप्रदेशपरिस्पन्दान्नातिरिच्यते, सविषयकत्वं च तस्य ज्ञानोपाधिकमन्यथा वेत्यन्यदेतत्, आकाशादिव्यावृत्तोऽन्योऽन्यानुप्रवेशरूपः शरीरसंयोग एव चात्मनि क्रियामनुमापयति, तस्योभयकर्मजत्वात्, विशिष्ट-

त्वादेव च तस्याद्दष्टाद्यप्रवेशेन क्रियाफलसामानाधिकरण्यनियामकत्वम्, तेन तदनुरुद्धबहुतरकार्यकारणान्तरकल्पनागौरवं परिहृतं भवति, तस्मादाद्ये क्षणे कार्मणकाययोगाख्येनात्मपरिस्पन्देनाभ्यवहृतिराहारग्रहणं, तच्छक्तेरेकक्षण एव निष्पन्नत्वेनाह्रियमाणस्याहृतत्वात्, ततोऽनु तनुसर्गं शरीरपर्याप्तिनिष्पत्तिं यावत्, मिश्राद्–औदारिकमिश्रात् काययोगादभ्यवहृतिः, ततश्च निष्पन्नायां शरीरपर्याप्तौ तेन तमालम्ब्यौदारिककाययोगेन लोमाहार-कवलाहारान्यतरग्रहणमिति तु भवतो वचोऽमोघम्, शरीरनिष्पत्तेः पूर्वं पश्चादपि चात्मनः सक्रियत्व एव चाहारित्वोपपत्तेः, तदनुपपत्तौ च परेषां संसाराभाव इति, तदिदमुक्तं पारमर्षे—

"जोगेण कम्मएणं, आहारेइ अणंतरं जीवो ।
तेण परं मीसेणं, जायसरीरस्स णिप्फत्ति ॥" [ ] इति ।

निष्पन्ने च शरीरे औदारिकादिकाययोगेनाहारग्रहणं प्रतीतमेव ॥

नन्वेकस्मादेव वीर्यात् कथं ग्रहणादिवैचित्र्यमत आह–त्वया सकरणं वीर्यमात्मनि, आलम्बनं च ग्रहणं च सतः परिणामश्च तैः शालत इत्येवंशीलं गदितं, तेनैव सक्रियतया निखिलस्य प्रागुक्तस्योपपत्तिः, एकस्यापि वीर्यस्यासङ्ख्ययोगस्पर्द्धकनिष्पन्नस्य पृथगनन्तपर्यायावगुण्ठितस्य ग्रहणादिकार्यभेदेन नामभेदेऽपि तत्त्वतोऽभेदात्, कार्याभ्यासादिवशेन क्वचित् क्वचित् प्रदेशे तीव्रमन्दादिभावस्य चादुष्टत्वादिति भावः । तदुक्तं श्रीशिवशर्मसूरिभिः—

"परिणामालंबणगहणसाहणं तेण लद्धूणामतिगं ।
कज्जब्भासण्णुण्णप्पवेसविसमीकयपये संति ॥"

त्वद्द्वेषिणां तु नैयायिकानां 'भगवन्! बन्ध-मोक्षौ नावितथौ, अभिनवकर्मादानरूपस्य बन्धस्य पूर्वदेशविभागपूर्वकोत्तरसिद्धिक्षेत्रप्राप्तिरूपस्य च मोक्षस्य च निष्क्रियात्मन्यसंभवात्, उपचरितौ च बन्ध-मोक्षौ न पुरुषार्थाविति; एतेन आत्मा निष्क्रियो नित्यत्वे सत्यस्मदादिप्रत्यक्षत्वात्' इत्यादिकमपास्तम्, अप्रयोजकत्वात्, अन्यथा ततो बाह्यत्वस्यापि सिद्ध्यापत्तेः, आभोगवीर्यात्मकक्रियावत्त्वस्य प्रत्यक्षसिद्धत्वेन कालात्ययापदिष्टत्वात्, आत्मा सक्रियः क्रियाजनकसंयोगाजन्यसंयोगाश्रयत्वाच्छरीरवदित्यादिना प्रतिरोधाच्चेति दिक्" इति ॥ ४३ ॥ २३६ ॥

उपसंहरति-**एवमिति**–उक्तेन प्रकारेणेत्यर्थः, **प्रकृतिवादोऽपि** प्रकृतेर्महान् महतोऽहङ्कार इत्यादिसाङ्ख्याभिमतपञ्चविंशतितत्त्ववादोऽपि, **हि** निश्चितम्, **सत्य**

एव यथार्थ एव, एवकारेणानृतत्वव्यवच्छेदः, विज्ञेयः ज्ञातव्यः, तत्सत्यत्वे युक्त्यन्तरमुपपादकमाह—कपिलोक्तत्वं चैवेति—द्रव्यार्थिकनयावलम्बिकपिलमुनिप्रणीतत्वादेवेत्यर्थः, प्रकृतिवादः सत्य एव कपिलमुनिप्रणीतत्वादित्यनुमानमत्र पर्यवसितं, तत्र कपिलोऽसत्यभाषी भविष्यतीत्यतस्तत्प्रणीतत्वं न सत्यत्वनियतमिति कपिलप्रणीतत्वमस्तु सत्यत्वं मास्त्विति व्यभिचारशङ्कानिवृत्तये तर्कमुपदर्शयति—दिव्यो हि स महामुनिरिति। हि यतः, स कपिलनामा, महामुनिः मुनीनां प्रवरः, दिव्यः अद्भुतशीलाद्याचरणशीलः, तथा चाद्भुतशीलाद्याचरणशीलत्वान्यथानुपपत्त्या सत्यभाषित्वं सत्यभाषिप्रणीतत्वाच्च प्रकृतिवादस्य सत्यत्वम्, सत्यता चेश्वरकृष्णोपदर्शितदिशा न सम्भवति किन्त्वनेकान्तवादाश्रयणेनेत्याशयः॥ ४४॥ २३०॥

एकान्ताभिनिवेशमात्रदलनात् साङ्ख्येऽपि सङ्ख्यावतां,
सख्यं भावितमिष्टयुक्तिघटनादक्षेण यत्सूरिणा।
तेनास्था जिनवाचि यस्य भविता मूढस्य नो वादिन—
स्तस्मिन् कर्मप्रचारभारघटना जीवे भवानन्यदा॥ १॥

इति श्रीतपोगच्छाधिपति-शासनसम्राट्-सर्वतन्त्रस्वतन्त्र-जगद्गुरुश्रीविजयनेमिसूरीश्वरपट्टालङ्कारेण व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्नेतिपदालङ्कृतेन विजयलावण्यसूरिणा विरचितायां स्याद्वादवाटिकाभिधानायां शास्त्रवार्तासमुच्चयटीकायां तृतीयः स्तबकः समाप्तः॥

ॐ

॥ पुण्यपत्तनमण्डनश्रीऋषभदेवस्वामिने नमः ॥

ચૌદશોને ચુમ્માલીશ ગ્રંથના પ્રણેતા—યાકિની મહત્તરા-ધર્મસૂનુસૂરિપુરન્દર—**શ્રીહરિભદ્રસૂરીશ્વર** વિરચિત '**શાસ્ત્રવાર્તા સમુચ્ચય**'ના દ્વિતીય-સ્તબકનો **સંક્ષિપ્ત ભાવાર્થઃ**—

કર્ત્તાઃ—પન્યાસજી મહારાજ **શ્રીસુશીલવિજયજી** ગણિવર્ય.

**हिंसादिभ्योऽशुभं कर्म, तदन्येभ्यश्च तच्छुभम् ।**
**जायते नियमो मानात्, कुतोऽयमिति चापरे ॥ १ ॥ ११३ ॥**

શુભાશુભકર્મનું કારણ—

અવિરતિના કારણ એવા જે હિંસાદિક (હિંસા, અનૃત, સ્તેય, અબ્રહ્મ, અને પરિગ્રહ) તેનાથી અશુભ કર્મ બંધાય છે, અને વિરતિના કારણ એવા જે અહિંસાદિક (અહિંસા, સત્ય, અસ્તેય, બ્રહ્મચર્ય, અને અપરિગ્રહ) તેનાથી શુભ કર્મ બંધાય છે. આવા પ્રકારનો નિયમ વ્યવસ્થિત છે, આમ છતાં પણ કેટલાએક પરવાદીઓ શંકા કરે છે કે—આવી જ જાતનો નિયમ કયા પ્રમાણથી કહો છો? અર્થાત્ હિંસાથી પુણ્યબંધ અને અહિંસાથી પાપબંધ કેમ નહીં? એનો જવાબ નીચેના શ્લોકથી જણાવે છે. (૧)

**आगमाख्यात् तदन्ये तु, तच्च दृष्टाद्यबाधितम् ।**
**सर्वार्थविषयं नित्यं, व्यक्तार्थं परमात्मना ॥ २ ॥ ११४ ॥**

પૂર્વોક્ત શંકાકારથી ભિન્ન જે તત્ત્વવાદી તે જણાવે છે કે—આગમ નામના પ્રમાણથી હિંસાદિકથી પાપ અને અહિંસાદિકથી પુણ્ય થાય છે એમ સમજવું. તે (આગમ પ્રમાણ) દષ્ટ અને ઇષ્ટથી અવિરુદ્ધ છે, સર્વ અભિલાપ્યભાવને જણાવનારું છે, પ્રવાહની અપેક્ષાએ નિત્ય છે, અને સર્વજ્ઞદેવે પ્રકાશિત કરેલ છે; માટે એ આગમ પ્રમાણ ખરેખર સત્ય છે. (૨)

પ્રત્યક્ષ વસ્તુમાં ભલે આગમનું પ્રામાણ્ય માનો, પરંતુ અત્યંત અદૃષ્ટ એવા જે પુણ્ય-પાપમાં આગમનું પ્રામાણ્ય કઈ રીતે હોઈ શકે? આવી શંકા કરનારને નીચેના શ્લોકથી જવાબ આપે છે—

**चन्द्रसूर्योपरागादे-स्ततः संवाददर्शनात् ।**
**तस्याप्रत्यक्षेऽपि पापादौ, न प्रामाण्यं न युज्यते ॥ ३ ॥ ११५ ॥**

ચંદ્રગ્રહણ અને સૂર્યગ્રહણ વગેરેનો આગમથી વાસ્તવિક નિર્ણય થાય છે, માટે અપ્રત્યક્ષ એવા પાપાદિકમાં પણ આગમ વચનનું પ્રામાણ્ય નથી એમ નહીં? અર્થાત્ અવશ્ય પ્રામાણ્ય છે. (૩)

વાદીની શંકા—

**यदि नाम क्वचिद् दृष्टः, संवादोऽन्यत्र वस्तुनि ।**
**तद्भावस्तस्य तत्त्वं वा, कथं समवसीयते ? ॥ ४ ॥ ११६ ॥**

દેખાતા એવા ચંદ્રગ્રહણ અને સૂર્યગ્રહણ વગેરે કોઈ સ્થળમાં આગમ-વચનનો સંવાદ[1] દેખેલ હોય, તેથી પાપાદિકને પ્રતિપાદન કરનાર જે આગમવચન તેનો સંવાદ ભાવ અને પ્રામાણ્ય કઈ રીતે માની શકાય? (૪)

ઉક્ત શંકાનો જવાબ—

**आगमैकत्वतस्तच्च, वाक्यादेस्तुल्यतादिना ।**
**सुवृद्धसम्प्रदायेन, तथा पापक्षयेण च ॥ ५ ॥ ११७ ॥**

ગ્રહણને પ્રતિપાદન કરનાર જે વચન અને પાપાદિકને પ્રતિપાદન કરનાર જે વચન, તે બન્ને એક જ આગમના હોવાથી ગ્રહણ પ્રતિપાદન કરનાર વચનને પ્રમાણ માનો છો, તો પાપાદિકને પ્રતિપાદન કરનાર વચનને પણ પ્રમાણભૂત માનવું જોઇએ. બન્ને વચનો એક આગમના છે એમ શાથી માની શકાય? એના જવાબમાં જણાવે છે કે—બન્નેમાં વાક્ય અને પદગામ્ભીર્યાદિકની સમાનતા વગેરે હોવાથી એકાગમપણું છે. અર્થાત્ એક જ આગમના બન્ને વચનો છે. કદાચ આગમના જેવી શબ્દ રચના કરીને કોઈ કહેવા માગે કે-અમારા વચનમાં પણ તુલ્યા-સમાન્તા છે, માટે એને પણ પ્રમાણ માનવાં જોઈએ, તો તેના જવાબમાં જણાવે છે કે-જ્ઞાન અને ચરણ

૧—જેનાથી વાસ્તવિક પ્રાપ્તિ થાય એવી પ્રવૃત્તિનું જે જનકપણું તે **સંવાદ** કહેવાય છે.

ગુણથી સંપન્ન જે ગુરુપરંપરા તે રૂપ સુવૃદ્ધ સંપ્રદાય દ્વારા આગમનું એકપણું સમજવાનું છે. વળી કદાચ કોઈ એમ કહે કે–અમારી વૃદ્ધ પરંપરા તેજ સુવૃદ્ધ સંપ્રદાય છે, તો તેના જવાબમાં જણાવે છે કે–સમ્યક્ત્વના પ્રતિબંધક જે કર્મ તેના ક્ષયોપશમથી એટલે શુદ્ધ શ્રદ્ધાનરૂપ સમ્યક્ત્વ ગુણથી સુવૃદ્ધ સમ્પ્રદાય દ્વારા આગમનું એકત્વ સમજવું. અર્થાત્ જેને મિથ્યાભાવ નથી એવી જે ગુરુપરંપરા તે સુવૃદ્ધ સંપ્રદાય કહેવાય, અને તેનાથી આગમનું એકપણું સમજવું. ( ૫ )

ઉપર જણાવેલ યુક્તિયુક્ત વાતને પણ જે ન માને, તેને દોષ બતાવે છે.–

**अन्यथा वस्तुतत्त्वस्य, परीक्षैव न युज्यते ।**
**आशङ्का सर्वगा यस्माच्छद्मस्थस्योपजायते ॥ ६ ॥ ११८ ॥**

ઉપર જણાવ્યા પ્રમાણે જો માનવામાં ન આવે તો આ વસ્તુ અમુક રીતે માનીએ તો સત્–સાચી છે, અને અન્યરીતે વિચારવામાં આવે તો તે અસત્ છે. આ રીતે વસ્તુતત્ત્વની સદસદ્ વિચારણારૂપ જે પરીક્ષા તે કોઈ રીતે ઘટી શકશે નહીં; કારણ કે–છદ્મસ્થજીવને અસદ્ આગ્રહથી સર્વવસ્તુમાં શંકા સંભવે છે. ( ૬ )

કદાચ એમ કહેવામાં આવે કે ભલે પરીક્ષા ન થાઓ, અપરીક્ષા જ રહો? એના જવાબમાં જણાવે છે કે—

**अपरीक्षापि नो युक्ता, गुणदोषाविवेकतः ।**
**महत् सङ्कटमायातमाशङ्के न्यायवादिनः ॥ ७ ॥ ११९ ॥**

[ હે વાદી !– ] તારી જણાવેલી અપરીક્ષા પણ ઘટી શકે તેમ નથી' કારણ કે–અપરીક્ષામાં ગુણ છે અને પરીક્ષામાં દોષ છે એ વાત તું નિશ્ચિત કરી શકતો હો, તો અપરીક્ષા તારી વ્યાજબી ગણાય, પરંતુ તું નિશ્ચિત કરી શકે તેમ નથી; કારણ કે–તારી જ વાતમાં એવી પણ શંકા થઈ શકે છે કે–પરીક્ષા ગુણવાળી અને અપરીક્ષા દોષવાળી કેમ ન હોય? ખરેખર નિષ્કંપ પ્રવૃત્તિનું પ્રયોજક જે ગુણ અને નિષ્કંપ નિવૃત્તિનો પ્રયોજક જે દોષ, તેનો અનિશ્ચય થવાથી તારે તો મોટું શંકટ આવ્યું કે–પરીક્ષા કે અપરીક્ષા એ એમાંથી એક પણ તું કહી શકે તેમ નથી. આમાંથી બચવાને માટે આગમ એજ તારા માટે શરણ છે. ( ૭ )

પ્રસ્તુત વાતનો ઉપસંહાર—

**तस्माद् यथोदितात् सम्यगागमाख्यात् प्रमाणतः ।**

**हिंसादिभ्योऽशुभादीनि, नियमोऽयं व्यवस्थितः ॥ ८ ॥ १२० ॥**

ઉપર જણાવેલ યુક્તિથી અને અન્ય પ્રમાણથી સમર્થિત જે આગમ રૂપ ઉત્તમ પ્રમાણ, તેનાથી એવો નિયમ નિશ્ચિત થાય છે કે–હિંસાદિકથી અશુભ કર્મ અને અહિંસાદિકથી શુભ કર્મનો બંધ થાય છે. ( ૮ )

આજ વાતને વિશેષે કરીને જણાવે છે—

**क्लिष्टाद्धिंसाद्यनुष्ठानात्, प्राप्तिः क्लिष्टस्य कर्मणः ।**

**यथाऽपथ्यभुजी व्याधेरक्लिष्टस्य विपर्ययात् ॥ ९ ॥ १२१ ॥**

ઘણા જ સંકલેશવાળા હિંસાદિકના આચરણથી જ્ઞાનાવરણીય વગેરે કિલષ્ટ કર્મની પ્રાપ્તિ થાય છે. અર્થાત્ બંધાય છે. જેમ વ્યાધિને વૃદ્ધિ કરનાર આહાર લેવામાં લંપટ રોગિને વ્યાધિની પ્રાપ્તિ થાય છે તેવી રીતે. વળી કલેશ રહિત એવા અહિંસાદિકના આચરણથી સાતાવેદનીયાદિ શુભ કર્મનો બંધ થાય છે. જેમ વ્યાધિની વૃદ્ધિના હેતુભૂત આહારને ત્યાગ કરવાથી વ્યાધિ શમી જાય છે અને સુખની પ્રાપ્તિ થાય છે તે રીતે. ( ૯ )

આગમ પ્રમાણથી પુણ્યપાપના બન્ધનો નિયમ વ્યવસ્થિત કરીને હવે સ્વભાવથી તેની વ્યવસ્થા જણાવે છે—

**स्वभाव एव जीवस्य, यत् यथापरिणामभाक् ।**

**बध्यते पुण्य-पापाभ्यां, माध्यस्थ्यात् तु विमुच्यते ॥ १० ॥ १२२ ॥**

જીવનો એવો સ્વભાવ જ છે કે અહિંસાદિ પરિણામવાળો અને હિંસાદિ પરિણામવાળો ક્રમશઃ પુણ્ય અને પાપથી બંધાય છે. અને માધ્યસ્થ્યગુણથી એટલે વૈરાગ્યદ્વારા પુણ્યકર્મ અને પાપકર્મથી છૂટો થાય છે. ( ૧૦ )

સર્વવાદિઓ પોતાના પક્ષને સાધવાને માટે સર્વથી બલવત્તર સ્વભાવ અને આગમનું અંતે શરણું લે છે. એ જ વાત અહીં જણાવે છે—

**सुदूरमपि गत्वेह, विहितासूपपत्तिषु ।**

**कः स्वभावा ऽऽगमावन्ते, शरणं न प्रपद्यते ? ॥ ११ ॥ १२३ ॥**

શાસ્ત્રને વિષે ઘણે દૂર જઇને પણ સૂક્ષ્મબુદ્ધિથી અનેક યુક્તિઓને સ્થાપન કર્યાબાદ, પ્રાંતે બાધકતર્ક ઉપસ્થિત થાય ત્યારે, ક્યો વાદી સ્વભાવ

અને આગમનું શરણું લેતો નથી ? અર્થાત્ પ્રાંતે સ્વભાવ અને આગમ એ બન્ને સૌ કોઇને પ્રમાણરૂપ માનવાં પડે છે. આથી એ ફલિત થાય છે કે—

સ્વભાવથી પુણ્ય-પાપના બંધનનો વ્યવસ્થિત નિયમ થઈ શકે છે. (૧૧)

વાદીની શંકા—

**प्रतिपक्षस्वभावेन, प्रतिपक्षागमेन च ।**

**बाधितत्वात् कथं ह्येतौ, शरणं युक्तिवादिनाम् ? ॥ १२ ॥ १२४ ॥**

સ્વભાવની સામે પ્રતિપક્ષી (વિરોધી) સ્વભાવ અને આગમની સામે પ્રતિપક્ષી આગમ હોવાથી, બાધિત થયેલા એવા સ્વભાવ અને આગમ, યુક્તિવાદિઓને કઈ રીતે શરણરૂપ હોઈ શકે ? (૧૨)

ઉક્ત શંકાનો જવાબ—

**प्रतीत्या बाधते यो यत्, स्वभावो न स युज्यते ।**

**वस्तुनः कल्प्यमानोऽपि, वह्न्यादेः शीततादिवत् ॥ १३ ॥ १२५ ॥**

વસ્તુનો કલ્પના કરાતો જે સ્વભાવ, તે જો અનુભવ અને પ્રમાણથી બાધિત હોય, તો તે સ્વભાવ વ્યાજબી નથી. જેમ વહ્નિ વગેરેનો શીતતાદિ સ્વભાવ, અર્થાત્ જે સ્વભાવ અનુભવ કે પ્રમાણથી બાધિત ન હોય તે માન્ય રાખી શકાય છે, નહીં કે કલ્પના માત્રથી કલ્પેલ. (૧૩)

પ્રશ્નોત્તરરૂપે વાદીની શંકા—

**वह्नेः शीतत्वमस्त्येव, तत्कार्यं किं न दृश्यते ? ।**

**दृश्यते हि हिमासन्ने, कथमित्थं स्वभावतः ॥ १४ ॥ १२६ ॥**

જેમ મૃગતૃષ્ણિકામાં-ઝાંઝવામાં જળની ભ્રાંતિ થાય છે અને અન્ય-જળમાં જળની ભ્રાંતિ થતી નથી, એ વસ્તુ જેમ સ્વભાવથી છે તેમ વહ્નિનું શીતપણું પણ સ્વાભાવિક છે.

**પ્રશ્ન**-વહ્નિનો જો શીતળતા સ્વભાવ છે તો શિતળતાનું કાર્ય રોમાંચાદિ કેમ દશ્યમાન થતા નથી ?

**જવાબ**-હિમની નજીકમાં વહ્નિના શીતળ સ્વભાવથી રોમાંચાદિ દેખાય છે.

**પ્રશ્ન**-આમ શાથી ? અર્થાત્ હિમની પાસે વહ્નિ હોય તો શીતકાર્ય કરે છે, અન્યથા નહીં એમ શાથી ?

જવાબ—એવા પ્રકારનો સ્વભાવ હોવાથી. જેમ ચક્રાદિ સહિત દંડાદિકને ઘટાદિ કાર્ય ઉત્પન્ન કરવાનો સ્વભાવ છે, તેમ હિમની પાસે રહેલા જ વહ્નિને શીતકાર્ય રોમાંચાદિ કરવાનો સ્વભાવ છે; તે સિવાય નહીં જ. (૧૪)

આજ વાતને વાદી પુષ્ટ કરે છે—

**हिमस्यापि स्वभावोऽयं, नियमाद् वह्निसंनिधौ ।**

**करोति दाहमित्येवं, वह्न्यादेः शीतता न किम् ? ॥ १५ ॥ १२७ ॥**

જેમ અયસ્કાન્તમણિ (લોહચુંબકમણિ) નજીકમાં જ લોહનું (લોઢાનું) આકર્ષણ કરે છે, નાગદમની ઔષધિ નજીકમાં જ નાગનું દમન કરે છે, તેમ હિમનો પણ એવો સ્વભાવ છે કે વહ્નિની નજીકમાં જ દાહ કરે છે.

આ રીતે વહ્નિ વગેરેનો શીતળતા સ્વભાવ અને હિમ વગેરેનો દાહકતા સ્વભાવ કેમ ન માનવો ? અર્થાત્ અવશ્ય માનવો જોઇએ. (૧૫)

વાદીની ઉક્ત શંકાનું નિરસન—

**व्यवस्थाभावतो ह्येवं, या त्वद्बुद्धिरिहेदृशी ।**

**सा लोष्टादस्य यत् कार्यं, तत्त्वत्तस्तत्स्वभावतः ॥ १६ ॥ १२८ ॥**

હે વાદી ? 'હિમમાં શીતળતા અને વહ્નિમાં દાહકતા છે' આ વસ્તુ આ-આબાલગોપાલ અનુભવ સિદ્ધ છે, છતાં તારી માન્યતાને સ્થિર કરવા માટે તું કલ્પના કરે છે કે-હિમની પાસે રહેલા અગ્નિમાં શીતળતા છે અને અગ્નિની પાસે રહેલા હિમમાં દાહકતા છે. એ રીતે કલ્પનાના જ તરંગો દોડાવવામાં આવે તો, તું જે પ્રસ્તુત વિચાર ચલાવી રહ્યો છો, તે વિચારણા તારી નથી, પણ તારી પાસે પડેલા પાષાણની છે. અને પાષાણથી થતા જે અભિઘાતાદિ તે પાષાણનો સ્વભાવ નથી પણ તારો પોતાનો જ છે. અને એને માટે એવો અનુગમ કરશું કે-તારી સન્નિહિતમાં (નજીકમાં) રહેલ પાષાણમાં તાદૃશ વિચારણા સ્વભાવ છે, અને પાષાણની સન્નિહિતમાં રહેલ જે તું, તેનો અભિઘાતાદિ સ્વભાવ છે. આ રીતે તારું ચૈતન્ય પાષાણમાં જશે અને પાષાણમાં રહેલી જડતા તારામાં આવશે. (૧૬)

કદાચવાદી એમ કહે કે-ભલે, એમ હો ? એથી શું ? આના જવાબવામાં જણાવે છે કે—

**एवं सुबुद्धिशून्यत्वं, भवतोऽपि प्रसज्यते ।**

**अस्तु चेत् को विवादो नो, बुद्धिशून्येन सर्वथा ॥ १७ ॥ १२९ ॥**

હે વાદી ? ઉપર જણાવ્યા પ્રમાણે તારામાં જો પાષાણ સ્વભાવપણું આવી જશે, તો બુદ્ધિની શૂન્યતા પણ આવશે. અર્થાત્ તું બુદ્ધિ શૂન્ય ગણઈશ. કદાચ તું એમ કહે કે-ભલે બુદ્ધિશૂન્યત્વ મારામાં હો, એથી શું ? આના જવાબમાં જણાવે છે કે-બુદ્ધિશૂન્ય વ્યક્તિની સાથે વિવાદ જ હોઈ શકતો નથી, માટે તારી સાથે ચર્ચા કરવી તે નકામી છે. ( ૧૭ )

અપરવાદીની શંકા—

**अन्यस्त्वाहेह सिद्धेऽपि, हिंसादिभ्योऽशुभादिके ।**
**शुभादेरेव सौख्यादि, केन मानेन गम्यते ? ॥ १८ ॥ १३० ॥**

હિંસાથી અશુભકર્મ અને અહિંસાથી શુભકર્મ ભલે સિદ્ધ હો, પરંતુ શુભ કર્મથી સુખાદિ થાય અને અશુભ કર્મથી દુ:ખાદિ થાય, એ વસ્તુ ક્યા પ્રમાણથી માન્ય કરી શકાય ? ( ૧૮ )

આના જવાબમાં અમુક આચાર્યનો અભિપ્રાય જણાવે છે—

**अत्रापि ब्रुवते केचित्, सर्वथा युक्तिवादिनः ।**
**प्रतीतिगर्भया युक्त्या, किलैतदवसीयते ॥ १९ ॥ १३१ ॥**

આ બાબતમાં આગમ નિરપેક્ષ યુક્તિમાં પરાયણ એવા સૂક્ષ્મબુદ્ધિશાળી કેટલાએક આચાર્યો કહે છેકે-અનુભવ સંગત એવી યુક્તિથી માન્ય કરવું પડશે કે 'શુભ કર્મથી સૌખ્યાદિ અને અશુભ કર્મથી દુ:ખાદિ થાય છે.' (૧૯)

આજ વસ્તુને પ્રસ્તુત ગ્રંથકાર જણાવે છે—

**तथाहुर्नाशुभात् सौख्यं, तद्बाहुल्यप्रसङ्गतः ।**
**बहवः पापकर्माणो, विरला शुभकारिणः ॥ २० ॥ १३२ ॥**

ઉપરોક્ત આચાર્યો એમ કહે છે કે-અશુભ કર્મથી જો સુખ માનીએ તો જગતનો મોટો ભાગ સુખી દેખાવો જોઈએ, કારણકે વિશ્વમાં અશુભ કર્મ કરનારા ઘણા જીવો છે અને શુભ કર્મ કરનારા અલ્પ જીવો છે. ( ૨૦ )

આજ વાતની પુષ્ટિમાં પુન: જણાવે છે કે—

**न चैतद् दृश्यते लोके, दुःखबाहुल्यदर्शनात् ।**
**शुभात् सौख्यं ततः सिद्धमतोऽन्यच्चाप्यतोऽन्यतः ॥ २१ ॥ १३३ ॥**

જગતમાં ઘણા સુખી જીવો દેખાતા નથી, પરંતુ ઘણા દુ:ખી જીવો દેખાય છે; માટે 'શુભ કર્મથી સુખ અને અશુભ કર્મથી દુ:ખ' એ નિયમ નક્કી થાય છે. (૨૧)

અનુભવવાળી યુક્તિ ભલે સાધક હો? પણ તે આગમ સાપેક્ષ સાધક છે, પરંતુ આગમ નિરપેક્ષ નહીં. એજ વાતને હવે અન્ય આચાર્યોના અભિપ્રાયથી જણાવે છે—

**अन्ये पुनरिदं श्राद्धा, ब्रुवत आगमेन वै ।**

**शुभादेरेव सौख्यादि, गम्यते नान्यतः क्वचित् ॥ २२ ॥ १३४ ॥**

આગમને વિષેજ અપૂર્વ શ્રદ્ધાવાળા અન્ય આચાર્યો કહે છે કે-'શુભ કર્મથી (પુણ્ય કર્મથી) સુખ અને અશુભ કર્મથી (પાપકર્મથી) દુઃખ થાય છે' એ વાત આગમ પ્રમાણથી જ સિદ્ધ થાય છે, બીજા કોઈથી નહીં (૨૨)

આજ વાતમાં યુક્તિ બતાવે છે—

**अतीन्द्रियेषु भावेषु, प्राय एवंविधेषु यत् ।**

**छद्मस्थस्याविसंवादि, मानमन्यन्न विद्यते ॥ २३ ॥ १३५ ॥**

આવી અતીન્દ્રિય સૂક્ષ્મ બાબતમાં છદ્મસ્થ જીવો માટે પ્રાયઃ આગમ સિવાય યથાર્થ પ્રમાણ બીજું કોઈ હોઈ શકતું નથી. (૨૩)

આગમ નિરપેક્ષ યુક્તિ દ્વારા શુભાદિકથી પુણ્ય વગેરેની વ્યવસ્થાને કરનાર એવા આચાર્યની યુક્તિ સદોષ છે, એ વાતને જણાવે છે—

**यच्चोक्तं दुःखबाहुल्यदर्शनं तन्न साधकम् ।**

**क्वचित् तथोपलम्भेऽपि, सर्वत्रादर्शनादिति ॥ २४ ॥ १३६ ॥**

'દુઃખની બહુલતા દેખાતી હોવાથી અશુભથી દુઃખ થાય છે' એ વાત જે જણાવી તે વ્યાજબી નથી, કારણ કે-ભલે કોઈ સ્થળમાં એમ દેખાતું હોય, પરંતુ દરેક સ્થળે તેમ હોઈ શકતું નથી. જેમ મહાવિદેહ ક્ષેત્રાદિકમાં સુખની બહુલતા છે, પણ દુઃખની નહીં. (૨૪)

શંકા અને તેનું સમાધાન—

**सर्वत्र दर्शनं यस्य, तद्वाक्यात् किं न साधनम् ? ।**

**साधनं तद्भवत्येवमागमात् तु न भिद्यते ॥ २५ ॥ १३७ ॥**

શંકા—દરેક સ્થળમાં દુઃખની બહુલતાનું જેને જ્ઞાન છે એવા સર્વજ્ઞના વાક્યથી પૂર્વોક્ત વસ્તુ કેમ સિદ્ધ ન થાય? અર્થાત્ દુઃખની બહુલતા હોવાથી અશુભ દુઃખ થાય છે, એમ કેમ સિદ્ધ ન થાય?

સમાધાન-સિદ્ધ થાય, પરંતુ તે સર્વજ્ઞનું વચન આગમથી ભિન્ન નથી, અર્થાત્ આગમમાં જ તેનો શમાવેશ થાય છે. (૨૫)

શુભ કર્મથી જ જો સુખ થતું હોત તો પાપ કરનાર જીવોમાં સુખની પ્રાપ્તિ કેમ હોઈ શકે? એના જવાબમાં જણાવે છે—

**अशुभादप्यनुष्ठानात्, सौख्यप्राप्तिश्च या क्वचित् ।**
**फलं विपाकविरसा, सा तथाविधकर्मणः ॥ २६ ॥ १३८ ॥**

ચોરી વગેરેથી અને ક્ષુદ્રદેવતાને ઉદ્દેશીને કરાતી હિંસાદિકથી કોઈ સ્થળમાં સુખની પ્રાપ્તિ જે દેખાય છે તે પૂર્વે કરેલા પાપાનુબન્ધિ પુણ્યનું જ ફળ છે, પરંતુ ભવિષ્યમાં તેનાથી ભયંકર દુઃખ ભોગવવું પડે છે. (૨૬)

આ જ વતની પુષ્ટિ દષ્ટાંત દ્વારા જણાવે છે—

**ब्रह्महत्यानिदेशानुष्ठानाद् ग्रामादिलाभवत् ।**
**न पुनस्तत एवैतदागमादेव गम्यते ॥ २७ ॥ १३९ ॥**

કોઈ રાજાએ કહ્યું કે-'તું બ્રાહ્મણને મારી નાખ તો હું તને ગામ આપીશ' આ સાંભળી સામી વ્યક્તિએ બ્રહ્મહત્યા કરી અર્થાત્ બ્રાહ્મણને મારી નાખ્યો. અને રાજાએ તેને ગામ આપ્યું. અહીં મારનારને ગામનો જે લાભ થયો તે બ્રાહ્મણને હણવાથી નહીં, પરંતુ પૂર્વે કરેલા પાપાનુબન્ધિ પુણ્યથી થયેલ છે. બ્રાહ્મણની હિંસા તો કેવલ નિમિત્ત માત્ર છે. આ વસ્તુ આગમથી જ સમજી શકાય છે, કારણ કે-'**मा हिंस्यात् सर्वा भूतानि**' ઈત્યાદિ આગમ *પ્રાણી માત્રની હિંસાનો જ્યાં નિષેધ કરે છે. તે હિંસાથી ગામના લાભને કઈ રીતે કહી શકે? અર્થાત્ ન જ કહી શકે. (૨૭)

આગમ પણ પ્રતિપક્ષી આગમથી બાધિત છે, એવું જે વાદીનું કથન તે વ્યાજબી નથી એમ જણાવે છે—

**प्रतिपक्षागमानां च, दृष्टेष्टाभ्यां विरोधतः ।**
**तथाऽनाप्तप्रणीतत्वादागमत्वं न युज्यते ॥ २८ ॥ १४० ॥**

વિરોધી આગમનું (પ્રસ્તુત અર્થના બાધક અજૈન આગમમાં) આગમ-પણું ઘટી શકતું નથી; કારણ કે-તેમાં દષ્ટ અને ઇષ્ટથી વિરોધ છે. અને તે અનાપ્ત પુરુષથી પ્રણીત છે. (૨૮)

ઉપર જણાવેલ બે હેતુમાંથી દષ્ટ અને ઇષ્ટ વડે વિરોધ બતાવીને અનાપ્ત પુરુષ પ્રણીતપણું બતાવે છે—

**दृष्टेष्टाभ्यां विरोधाच्च, तेषां नाप्तप्रणीतता ।**
**नियमाद् गम्यते यस्मात्, तदसावेव दर्श्यते ॥ २९ ॥ १४१ ॥**

'જ્યાં જ્યાં દષ્ટ અને ઇષ્ટનો વિરોધ હોય ત્યાં ત્યાં આપ્તપુરુષ પ્રણીતપણું નથી' આવો નિયમ હોવાથી નીચેના શ્લોકથી દષ્ટ અને ઇષ્ટથી વિરોધ જ બતાવવામાં આવે છે. જેનાથી અનાપ્ત પુરુષ પ્રણીતપણું પણ આવી જાય છે. ( ૨૯ )

તેમાં પણ પ્રથમ મંડલ તન્ત્રવાદિ મતને આશ્રિને દષ્ટવડે વિરોધ બતાવે છે—

**अगम्यागमनादीनां, धर्मसाधनता क्वचित् ।**
**उक्ता लोकप्रसिद्धेन, प्रत्यक्षेण विरुध्यते ॥ ३० ॥ १४२ ॥**

'માધ્યસ્થ્ય ગુણ એ મુક્તિનું કારણ છે' એ માધ્યસ્થ્ય ગુણનું રક્ષણ કરવા માટે સ્વસ્ત્રીની જેમ ભગિની–કન્યા–વિધવા–પરસ્ત્રી–વેશ્યા વગેરેના ભોગો પણ ભોગવવા જોઇએ. એ રીતે જો ન કરવામાં આવે તો એકના પ્રત્યે રાગ અને બીજાના પ્રત્યે દ્વેષ થવાથી માધ્યસ્થ ગુણ ટકી શકતો નથી. આ રીતે તાન્ત્રિક મતની અગમ્ય ગમનાદિકની જે ધર્મસાધના તે પ્રત્યક્ષ પ્રમાણથી બાધિત છે. અર્થાત્ આબાલ ગોપાલને પૂછો કે તમે ભગિની આદિનો ભોગ કરી શકો ખરા ? ત્યારે તે ( શ્રુત નિશ્રિતાદિ મતિથી ) કહેશે કે આ વાત હોઈ શકે જ નહીં, માટે દૃષ્ટનો વિરોધ છે. ( ૩૦ )

હવે તાન્ત્રિકમતમાં જ ઇષ્ટ વિરોધ બતાવે છે—

**स्वधर्मोत्कर्षा( षणा )देव, तथा मुक्तिरपीष्यते ।**
**हेत्वभावेन तद्भावो, नित्य इष्टेन बाध्यते ॥ ३१ ॥ १४३ ॥**

સ્વાભિમત જે ધર્મ ( અગમ્ય ગમનાદિ ધર્મ ) તેના પ્રકર્ષથી જ તાન્ત્રિકવાદીઓ મુક્તિને ઇચ્છે છે. જગતની નિખિલ અગમ્ય સ્ત્રીઓનો જે ભોગ કરવામાં આવે તો જ તે પરાકાષ્ઠાએ પહોંચેલ ધર્મ કહેવાય. અને તે વસ્તુ તો અશક્ય છે, માટે હેતુનો અભાવ હોવાથી મુક્તિની પ્રાપ્તિ નિર્હેતુક થઈ

જશે. અને એમ થવાથી મોક્ષની પ્રાપ્તિ એકાંત સત્ અથવા એકાંત અસત્ માનવી પડશે. આ રીતે પોતાની ઇષ્ટ વસ્તુવડે કરીને મુક્તિનો બાધ થતો હોવાથી ઇષ્ટ વિરોધ છે. (૩૧)

વિરોધનો પરિહાર કરવા માટે તાન્ત્રિકનું સમાધાન—

**माध्यस्थ्यमेव तद्धेतुरगम्यागमनादिना ।**
**साध्यते तत् परं येन; तेन दोषो न कश्चन ॥ ३२ ॥ १४४ ॥**

અગમ્ય ગમનાદિકથી મુક્તિના હેતુભૂત જે ઉત્કૃષ્ટ માધ્યસ્થ તેજ અમારું સાધ્ય છે, માટે પૂર્વે જણાવેલો દોષ હોઈ શકતો નથી. અર્થાત્ જેટલે અંશે શક્ય છે તેટલે અંશે અગમ્યગમનાદિ કરીને ઉત્કૃષ્ટ માધ્યસ્થ દ્વારા મોક્ષને પ્રાપ્ત કરી શકીશું, માટે મોક્ષનો બાધ આવી શકશે નહીં. (૩૨)

ઉપર જણાવેલ તાન્ત્રિક વિચારનું ખંડન—

**एतदप्युक्तिमात्रं यदगम्यागमनादिषु ।**
**तथा प्रवृत्तितो युक्त्या, माध्यस्थ्यं नोपपद्यते ॥ ३३ ॥ १४५ ॥**

ઉપર જણાવેલી હકીકત વચનમાત્ર છે. અર્થાત્ યુક્તિથી રહિત છે. કારણકે-અગમ્ય ગમનાદિકમાં સમાન પ્રવૃત્તિ કરવાથી બતાવાતું જે માધ્યસ્થ તે બુદ્ધિથી વિચાર કરીએ તો કોઈપણ રીતે ઘટી શકતું નથી. (૩૩)

આજ વાતને પરમાધ્યસ્થ જણાવવા દ્વારા સ્પષ્ટ કરે છે—

**अप्रवृत्त्यैव सर्वत्र, यथासामर्थ्यभावतः ।**
**विशुद्धभावनाभ्यासात्, तन्माध्यस्थ्यं परं यतः ॥ ३४ ॥ १४६ ॥**

કારણકે-ગમ્ય હો કે અગમ્ય હો, દરેક સ્થળમાં સ્વશક્તિને અનુસારે અપ્રવૃત્તિ રાખવાથી જ એટલે પ્રવૃત્તિનો અભાવ કે નિવૃત્ત રાખવાથી, માધ્યસ્થ જળવાય છે. અને તે માધ્યસ્થ્ય વિશુદ્ધ ભાવનાના અભ્યાસથી પરમમાધ્યસ્થ્ય બને છે, એ સિવાય નહીં. અર્થાત્ અગમ્ય ગમનાદિકથી નહીં જ. (૩૪)

તાન્ત્રિકનું વક્તવ્ય—

**यावदेवंविधं नैतत्, प्रवृत्तिस्तावदेव या ।**
**साऽविशेषेण साध्वीति, तस्योत्कर्षप्रसाधनात् ॥ ३५ ॥ १४७ ॥**

જ્યાંસુધી પરમમાધ્યસ્થ્ય પ્રાપ્ત ન થાય ત્યાંસુધી સમાનતાથી ગમ્ય અને અગમ્યમાં જે પ્રવૃત્તિ તે માધ્યસ્થ્યવાળી હોવાથી સારી છે, કારણકે-આ માધ્યસ્થ્યદ્વારા પરંમાધ્યસ્થ પ્રાપ્ત થઈ શકશે. ( ૩૫ )

તાન્ત્રિકને જવાબ—

**नाप्रवृत्तेरियं हेतुः, कुतश्चिदनिवर्तनात् ।**
**सर्वत्र भावाविच्छेदादन्यथाऽगम्यसंस्थितिः ॥ ३६ ॥ १४८ ॥**

અપ્રવૃત્તિથી પરંમાધ્સ્થ પ્રાપ્ત થાય છે, એ વાત પૂર્વે જણાવી છે. આ અપ્રવૃત્તિનો હેતુ ઉપર જણાવેલી પ્રવૃત્તિ હોઈ શક્તિ નથી. કારણકે-આની અંદર કોઈપિણ વિષયમાં નિવૃત્તિનો પ્રયત્ન નથી. ઉલટું દરેક સ્થળમાં ( સર્વ ભોગ્ય વિષયમાં) કામવાસનાનો વિચ્છેદ નથી. અર્થાત્ કામવાસનાનું સામ્રાજ્ય છે. કદાચ એમ કહેવામાં આવે કે-અમુક સ્થળમાં કામવાસનાની નિવૃત્તિ માની લઈશું. તો એના જવાબમાં જણાવવાનું કે-આ રીતે માનવામાં તમોએ અગમ્ય વસ્તુ માની, માટે તેની વ્યવસ્થા જણાવવી પડશે. ( ૩૬ )

અગમ્ય વ્યવસ્થા અને પરંમાધ્યસ્થ—

**तच्चास्तु लोक-शास्त्रोक्तं, तत्रोदासीन्ययोगतः ।**
**सम्भाव्यते परं ह्येतद्, भावशुद्धेर्महात्मनः ॥ ३७ ॥ १४९ ॥**

તે અગમ્ય વસ્તુ લોકમાં અને શાસ્ત્રમાં અગમ્યરૂપે બતાવેલ ભગિન્યાદિ સમજવાં, પરંતુ પોતાની મતિકલ્પનાથી કલ્પેલ નહીં.

તે અગમ્ય ભગિન્યાદિકમાં રાગ-દ્વેષ રહિત ભાવે અપ્રવૃત્તિથી દૃઢ પ્રતિજ્ઞાવાળા મહાપુરુષને ભાવની શુદ્ધિથી પરંમાધ્યસ્થ સંભવે છે. અર્થાત્ દેશ-વિરતિવંત જીવને અનિકાચિત એવા ચારિત્ર મોહનીયનો શીઘ્ર ક્ષય થવાથી એકાન્ત વિહિતાનુષ્ઠાનની સમ્પત્તિ દ્વારા ઉંચ પ્રકારનું માધ્યસ્થ સંભવે છે.

આ રીતે વર્ણવેલા જ પરમમાધ્યસ્થ્યથી મોક્ષ મળે છે. ( ૩૭ )

**[ इति मण्डलतन्त्रवादिमतखण्डनम् ]**

## अथ संसारमोचकमतखण्डनम्—

હવે સંસાર મોચકવાદી મતનું ખંડન જણાવે છે—

**संसारमोचकस्यापि, हिंसा यद् धर्मसाधनम् ।**
**मुक्तिश्चास्ति ततस्तस्याप्येष दोषोऽनिवारितः ॥ ३८ ॥ १५० ॥**

કોઈપણ પ્રાણી દુઃખી થતો હોય તો તેને મારી નાખવાથી તે દુઃખથી મુક્ત થાય છે. આ રીતે દુઃખથી મુક્ત કરવાને માટે જે હિંસા કરવી તે ધર્મનું સાધન છે. અને આવા ધર્મના પરમ સાધનથી મોક્ષ મળી શકે છે.

આવી માન્યતાવાળા સંસાર મોચકમતની મંતવ્યતા વ્યાજબી નથી. કારણ કે—તેમાં પણ તાન્ત્રિકમતની જેમ દષ્ટેષ્ટથી વિરોધરૂપ દોષ ઉભો જ છે. અર્થાત્ સકલ દુઃખી જીવોની હિંસા કરવામાં આવે તો જ તે હિંસા ધર્મનું પરમ સાધન થઈ શકે, પરંતુ તે અશક્ય છે માટે પરમ ધર્મનું સાધન ન રહ્યું, તેથી પરમ સાધનના અભાવે મુક્તિ નિર્હેતુક થઈ જશે. અને નિર્હેતુક વસ્તુ એકાન્ત સત્ કે એકાન્ત અસત્ હોય છે. આથી મોક્ષ જે છે તે કાયમ જ રહેશે. અર્થાત્ નવો કોઈ જીવ મોક્ષે જઈ શકશે નહીં. અથવા તો મોક્ષ નામની વસ્તુ જ ઉડી જશે. આ રીતે ઈષ્ટ જે હિંસા તેનાથી મુક્તિનો વિરોધ આવે છે, માટે ઇષ્ટ વિરોધ છે.

વળી આબાલગોપાલને પૂછો કે—દુઃખીને મારી નાખવાથી ધર્મ થાય? ત્યારે તે કહેશે કે ગમે તેવો દુઃખી માનવ હોય, પણ તેને મરવું સારું લાગતું નથી. અને તેને જો મારી નાખવામાં આવે તો કદી ધર્મ હોઈ શકે જ નહીં.

આ રીતે દૃષ્ટવડે—અનુભવ વડે વિરોધ આવે છે. આમ દષ્ટ અને ઈષ્ટ વડે વિરોધ હોવાથી આ **સંસાર મોચક મત** વ્યાજબી નથી. કદાચ વાદી એમ કહે કે—

જીવને કોઈ પણ લાલસાથી મારવામાં આવે તો તે ધર્મસાધન નથી, છતાં જેમ કુશલવૈદ્ય વ્યાધિ મટાડવા માટે ડાંભ વગેરે દે છે, તો તે ઉપકાર બુદ્ધિથી કરાતા હોવાથી જેમ ધર્મનું સાધન છે, તેમ દુઃખી જીવોને દુઃખથી મુક્ત કરવાની ભાવનાએ મારી નાખવામાં આવે, તો તે શુભ ભાવનાથી કરાતી હિંસા ધર્મનું સાધન કેમ ન હોઇ શકે?

**જવાબ**-જીવનના પાપની આલોચના કર્યા સિવાય અવિરતિ ભાવે શસ્ત્રાદિકથી મરેલા પ્રાણીઓ ભવાંતરમાં પણ તેથી વિશેષ દુઃખમાં પડે છે. અને અહીંની વેદના કરતાં નરકાદિકની અધિક વેદનામાં તેને મૂકવામાં આવે છે, માટે જ ઉપકારને બદલે ઉલટો અપકાર થતો હોવાથી આ પ્રસ્તુત હિંસા ધર્મનું સાધન હોઇ શક્તિ નથી.

વળી સુખી જીવો વધારે જીવતા હશે તો વિહાર અને અન્નભક્ષણાદિદ્વારા અનેક વિધ જીવહિંસા અને અગમ્ય ગમનાદિક કરશે, અને તે દ્વારા તેઓ અનેક પાપ બાંધશે, અને જેના પરિણામે ભવાંતરમાં વિવિધ દુઃખના ભાગી થશે.

તેથી તેને બચાવવા માટે સુખી જીવોને પણ કેમ ન મારી નાખવા? કારણ કે-તેમાં પણ તમારી માન્યતા પ્રમાણે ઉપકાર બુદ્ધિ જ છે. અને આ વાત જો યથાર્થ હોય તો બીજાનું હિત કરવા પહેલાં તમારા પોતાના જ કુટુમ્બના હિતની ખાતર તેને જ મારી નાખવા પ્રયાસ કેમ કરતા નથી?

ખરી હકીકત તો એ છે કે-દુઃખના કારણભૂત પાપકર્મનો વિનાશ જે રીતે થાય તે રીતે ધર્મોપદેશથી શુભક્રિયામાં પ્રેરણા કરવી જોઇએ કે જેથી તે વાસ્તવિક કરુણા-દયા ગણાય. આ વસ્તુનું પોષક વિશ્વમાં શ્રીજિનેન્દ્ર-દેવનું શાસન સર્વોત્તમ છે. (૩૮)

મોક્ષ કઈ રીતે મળી શકે, તે વસ્તુ જણાવે છે—

**मुक्तिः कर्मक्षयादेव, जायते नान्यतः क्वचित् ।**
**जन्मादिरहिता यत् तत्, स एवात्र निरूप्यते ॥ ३९ ॥ १५१ ॥**

સકલ કર્મના ક્ષયથી જ મોક્ષ પ્રાપ્ત થાય છે, તે સિવાય નહીં. અભયદાન અને સુપાત્રદાનાદિક ભલે કરવામાં આવે, છતાં પણ તેથી તરત જ સાક્ષાત્ મોક્ષ મળતું નથી; પણ સકલ કર્મનો ક્ષય જ્યારે થાય ત્યારે જ મળે છે. કર્મના ક્ષયથી જ મોક્ષ કેમ મળે? એવી જીજ્ઞાસાવાળાને જવાબ આપે છે કે-મોક્ષ જે છે તે જન્મ જરા અને મરણાદિકથી રહિત છે, અને દાનાદિકથી તો દેવલોકાદિકની પ્રાપ્તિ અને સદ્‌ગુરુના ઉપદેશ શ્રવણાદિકનો લાભ થાય છે, માટે મુક્તિનું અસાધારણ કારણ તો કર્મનો ક્ષય જ છે. અને તેનું આ પ્રસ્તુત પ્રકરણમાં હવે નિરૂપણ કરાય છે. (૩૯)

સકલ કર્મનો ક્ષય થવામાં પરતીર્થીએ (સંસાર મોચકાદિએ) માનેલ હેતુનું ખંડન કરવા માટે વિકલ્પદ્વારા કર્મક્ષયના હેતુને પૂછે છે—

**हिंसाद्युत्कर्षसाध्यो वा, तद्विपर्ययजोऽपि वा ।**
**अन्यहेतुरहेतुर्वा, स वै कर्मक्षयो ननु ? ॥ ४० ॥ १५२ ॥**

શું ઉચ્ચકોટિની હિંસાદિકથી સકલ કર્મનો ક્ષય થાય છે? અથવા ઉચ્ચકોડિની અહિંસાદિકથી સકલ કર્મનો ક્ષય થાય છે? અથવા આ બે સિવાય કોઈ અન્ય હેતુથી સકલ કર્મનો ક્ષય થાય છે? કે અથવા તો શું એનો કોઈ હેતુ જ નથી? (૪૦)

પ્રથમ વિકલ્પનું ખંડન—

**हिंसाद्युत्कर्षसाध्यत्वे, तदभावे न तत्स्थितिः ।**
**कर्मक्षयास्थितौ च स्यान्मुक्तानां मुक्तताक्षतिः ॥ ४१ ॥ १५३ ॥**

ઉચ્ચકોટિની હિંસાદિકથી સકલ કર્મનો ક્ષય માનવામાં આવે તો તે વસ્તુ અશક્ય છે, કારણ કે–સર્વ જીવોની હિંસા અશક્ય છે. આથી, હેતુ નહીં રહેવાથી સકલ કર્મનો ક્ષય નહીં થાય. અને સકલ કર્મનો ક્ષય નહીં થવાથી મોક્ષ મળી શકશે નહીં. (૪૧)

દ્વિતીય વિકલ્પમાં દોષ—

**तद्विपर्ययसाध्यत्वे, परसिद्धान्तसंस्थितिः ।**
**कर्मक्षयः सतां यस्मादहिंसादिप्रसाधनः ॥ ४२ ॥ १५४ ॥**

'ઉચ્ચકોટિની અહિંસાદિકથી કર્મનો ક્ષય થાય છે' એમ જો માનવામાં આવે તો પરસિદ્ધાંતમાં પ્રવેશ થઈ જશે. અર્થાત્ પરની માન્યતામાં દોરાવું પડશે, કારણકે–સત્પુરૂષોએ ઉચ્ચકોટિની અહિંસાદિકથી કર્મનો ક્ષય માનેલ છે. (૪૨)

તૃતીય અને ચતુર્થ વિકલ્પનું ખંડન—

**तदन्यहेतुसाध्यत्वे, तत्स्वरूपमसंस्थितम् ।**
**अहेतुत्वे सदा भावोऽभावो स्यात् सदैव हि ॥ ४३ ॥ १५५ ॥**

ઉપર જણાવેલ બે હેતુ સિવાય ત્રીજો કોઈ જુદો જ હેતુ માનવામાં આવે તો તે વસ્તુ વ્યાજબી નથી. કારણ કે—ત્રીજા હેતુનું સ્વરૂપ જ અસિદ્ધ છે. અર્થાત્ સિદ્ધ થયેલ નથી.

મુક્તિનું કોઈ કારણ જ નથી? એવો જે ચોથો હેતુ તે પણ વ્યાજબી નથી. કારણકે—નિર્હેતુક વસ્તુ કાંતો એકાન્ત સત્ હોય અને કાંતો એકાન્ત અસત્ હોય, માટે તે પણ વ્યાજબી નથી. (૪૩)

ઉપરોક્ત ચાર વિકલ્પ પૈકી દ્વિતીય વિકલ્પ યુક્તિ સંગત છે. એ વાત જણાવે છે—

**मुक्तिः कर्मक्षयादिष्टा, ज्ञानयोगफलं स च ।**

**अहिंसादि च तद्धेतुरिति न्यायः सतां मतः ॥ ४४ ॥ १५६ ॥**

મુક્તિ કર્મના ક્ષયથી જ ઈષ્ટ છે. અને કર્મનો ક્ષય એ જ્ઞાન યોગનું (જ્ઞાન–દર્શન–ચારિત્રનું) ફળ છે. અને જ્ઞાનયોગ અહિંસાદિકથી થાય છે.

આ રીતે જૈન આગમનના રહસ્યને જાણનાર સત્પુરુષોનો આ સન્માર્ગ છે. (૪૪)

**[ इति संसारमोचकमतखण्डनम् ॥ ]**

## अथ याज्ञिकमतखण्डनम्—

હવે યાજ્ઞિકમતનું ખંડન—

જેમ સંસાર મોચક મતની માન્યતા યુક્તિવિકળ છે, તેમ યજ્ઞમાં હિંસા કરનાર યાજ્ઞિકમતની માન્યતા પણ યુક્તિ વિકળ છે. એજ વાત જણાવે છે—

**एवं वेदविहितापि, हिंसाऽपायाय तत्त्वतः ।**

**शास्त्रचोदितभावेऽपि, वचनान्तरबाधनात् ॥ ४५ ॥ १५७ ॥**

એવી રીતે (સંસાર મોચક મતવાળાએ માન્ય રાખેલી હિંસાની જેમ) "**श्वेतं वायव्यमजमालभेत भूतिकामः**" ઇત્યાદિ વચનોથી યજ્ઞમાં બતાવેલી જે હિંસા તે પણ યુક્તિથી વિચારાય તો ખરેખર અનર્થને માટે જ છે. કારણકે—ભલે તે ઉપરોક્ત વિધિ વાક્યથી જણાવી હોય, છતાં પણ તેના જ શાસ્ત્રમાં પ્રસિદ્ધ "**मा हिंस्यात् सर्वा भूतानि**" ઇત્યાદિ નિષેધ વચનોનો વિરોધ આવે છે. (૪૫)

આજ વસ્તુ બતાવે છે—

**न हिंस्यादिह भूतानि, हिंसनं दोषकृन्मतम् ।**

**दाहवद् वैद्यके स्पष्टमुत्सर्गप्रतिषेधतः ॥ ४६ ॥ १५८ ॥**

જેમ વૈદ્યકમાં સામાન્ય રીતે દાહમાત્રનો સ્પષ્ટ નિષેધ છે, તેમ "**मा हिंस्यात् सर्वा भूतानि**" એ વેદવાક્યમાં હિંસામાત્રને દોષકારક માનેલી છે. તેથી તે નિષિદ્ધ છે. (૪૬)

આથી શું ?—

**ततो व्याधिनिवृत्त्यर्थं, दाहः कार्यस्तु चोदिते ।**
**न ततोऽपि न दोषः स्यात् फलोद्देशेन चोदनात् ॥ ४७ ॥ १५९ ॥**

વ્યાધિની નિવૃત્તિને માટે કોઈ સ્થળમાં દાહ કરવો પડે, તો પણ 'દાહ-માત્ર તાપાદિકનું કારણ છે' એ નિર્ણય હોવાથી, આ દાહ ફળના ઉદ્દેશથી કરાય છે, છતાં પણ સદોષ નથી એમ નહીં. અર્થાત્ દાહથી ભલે રોગની નિવૃત્તિ થાઓ, પરંતુ તાપાદિરૂપ દોષતો એમાં રહેલ જ છે. (૪૭)

આજ વાતને ઘટાવે છે—

**एवं तत्फलभावेऽपि, चोदनातोऽपि सर्वथा ।**
**ध्रुवमौत्सर्गिको दोषो, जायते फलचोदनात् ॥ ४८ ॥ १६० ॥**

જણાવેલા દાહની જેમ યજ્ઞમાં કરાતી હિંસાથી ભલે કદાચ વિભૂતિ વગેરે ફળનો સંભવ હોય તો પણ આ હિંસા અન્ય હિંસાની સમાન હોવાથી ઔત્સર્ગિક નિશ્ચે દોષરૂપ જ છે. અર્થાત્ "**मा हिंस्यात् सर्वा भूतानि**" એ વચ-નથી સૂચવેલ પાપલક્ષણ દોષરૂપ જ છે. કારણકે–આ હિંસા વિભૂતિ વગેરે ફળની અભિલાષાથી કરવામાં આવે છે. 'જે જે હિંસા તૃષ્ણાદિકથી કરાતી હોય તે તે હિંસા અધર્મજનક છે' આવો નિયમ હોવાથી યજ્ઞમાં કરાતી હિંસા પણ વિભૂતિ આદિની તૃષ્ણાથી કરાય છે, માટે તે પણ અધર્મજનક છે. આ રીતે દૃષ્ટ એટલે આબાલગોપાલ પ્રસિદ્ધ કોઈને મારવામાં ધર્મ નથી એવો અનુભવ, અને ઇષ્ટ એટલે "**मा हिंस्यात्०**" એ ઇષ્ટ વાક્યવડે કરીને વિરોધ આવતો હોવાથી યાજ્ઞિક અને **મીમાંસકની** હિંસા છે, તે વ્યાજબી નથી. અને તેથી કરીને તેને પ્રતિપાદન કરનાર આગમ તે આગમ જ નથી. (૪૮)

[ इति याज्ञिकमतखण्डनम् ]

ઉપર જણાવ્યા પ્રમાણે આજીવક વગેરે મતમાં જણાવેલી હિંસા પણ વ્યાજબી નથી. એ વાત જણાવે છે—

**अन्येषामपि बुद्ध्यैवं, दृष्टेष्टाभ्यां विरुद्धता ।**

**दर्शनीया कुशास्त्राणां, इतश्च स्थितमित्यदः ॥ ४९ ॥ १६१ ॥**

બીજા પણ આજીવક વગેરેના કુશાસ્ત્રોની પણ દૃષ્ટ અને ઇષ્ટથી વિરુદ્ધતા સદ્‌વિચારણાથી પ્રતિપાદન કરવી.

